पदप्रकृतिस्वरार्थमिदमिति वाच्यं। सदृशप्रतिरूपयोः सादृश्य इति सूत्रेणासत्त्विदेः। ऊनार्थेति। पूर्वसूत्रे अर्थशब्देन समासस्य साधितत्वादि
अर्थपरे हार्थग्रहणमविधेयपरं। तत्त्वेन शब्देनेव संबध्यते। ननु पूर्वादिभिः समदृशयोः पृथगुपादानादिति भावः। मस्येण मिश्रीकरणं। स्वरविशद
मभ्यवहार्य र्थेन स्वं। खरं व गिरणं विनाद्दं विविक्तावयवं। यत्स्पर्शं नस्य च भक्षणेनेश्वत्त्रैव प्रयोगात्। गुणागरे रोति। एतच्चवार्तिके
र्वगुणकार्स्नि इति सूत्रे पठितं। ... मिति। अत्र द्विजशब्देन समासप्रसंगः। तदपेक्षा हि षष्ठी। अथत्वे हि द्विजेन इत्यमनुष्येभ्यः। तेषां सामान्यशब्देनो
पस्थितत्वान्। निर्धार्यानुपस्थितत्वात्। अथ कथं पुरुषोत्तम इति। यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहे
तुः एतत्त्रितयसन्निधौ सत्येवायं निषेध इति द्विवचनविभज्ये निसूत्रे कैयटः। यद्वा पुरुषेषूत्तम इति निर्धारणसप्तम्याः संज्ञायामिति समासः। तेन
वन निर्धारण इत्यर्थः। स्वरे भेदाच। सप्तमीसमासे हि पूर्वपदप्रकृतिस्वरः षष्ठीसमासे तु अन्तोदात्तत्वं स्यात्। पूरणगुण। अत्र प्राचोक्तं। एतदर्थे
षष्ठी न समस्यत इति मन्त्रन्तं। एवं हि सुहितानामेव ग्रहणं स्यान्नावनामवार्थशब्देन समस्यतावत् इति धनपम्नाह। सरादिभिरिति। अत्र वाच

आधिकारविहितप्रत्ययानेन निषेधः

थुः। पूरणार्थशब्दः प्रत्यय एव गृह्यते। कृत्रिमे कार्यसंप्रत्ययादिति तन्नेदं। न हि प्रत्ययविशेषो गृह्यते पूरणार्थतं द्वितीयादिना संज्ञासूत्रे लक्षणमस्ति।
येनोक्तपरिभाषावैकाल्पमासादयेत्। कुतस्तर्हि पूरणप्रत्ययानां यथा द्व्य एव गृह्यते न तु पूरणीमनादिशब्दा इति चेत्। लोप वेलादपूरणमिति
निर्देशादिसंबंधिनि न तु पूरणभवः पटुरूपेत्यादिसिद्धं। कृपेन हि नानुबंधकं किं तत्सेवनानीति। प्रमाद एवायमित्येके। वस्तुतस्तु पूरणः उक्त
लक्षः षष्ठ इति व्याख्येयं। यत्तु पूरणेति स्वर्चनेनेनाधिकारगतिः। अयं तु भागार्थकान्प्रत्ययांतम् इति। नन्वा। अन्यप्रत्ययांतेनापि निषेधः स्यादिति। यत्त
नीयेति सूत्रे भाष्य एवास्य कृतत्वात्। अत एव शिक्षाहितीयमित्यादौ अन्यतरस्यां ग्रहणसामर्थ्यात् समास इति नोक्तं। ननु प्राप्तस्य गुणस्यानुक्तो समानेस
मासप्रसंग एव नास्ति। ब्राह्मणशब्दस्य देनैरेवान्वयात्। ब्राह्मणस्येदं नास्ते तूक्तादृष्टर्थादेन आह। मंदति। गुणवाद एवेह विशेष्यसमर्पक इ
ति भावः। यत्तु भावप्रत्ययांतो गुणवाच्यत्र निषिध्यत इति प्राचोक्तं। तन्न। उक्तोदाहरणस्य भाष्यारूढस्यासंगतिप्रसंगात्। परेपि सगुणवाचिनो
न निषेध इति तदपि तन्न। भावप्रत्ययांतस्य गुणवाचित्वा पूर्वश्रेयविरोधात्। यत्तु व्याख्यातं नाभावेतावद्भवति प्रत्ययांतस्यैव निषिध्यत इति ना
र्थः। किंतु भावप्रत्ययांत एव सन्नो गुणमाह तद्भावे तु गुणं गुणिनं च सशुक्लादिरेव निषिध्यते। सदेति। अंतरेणापि भावप्रत्ययं यो गुणमेव वक्ति तं
थाविधशब्दः तस्य न निषेध इत्यर्थ इति। तद् पिक्लिष्टं पुनरुक्तिग्रस्तेन च। काकस्य कार्ष्ण्यमित्यादावव्याप्तं च। उक्तव्याख्या पाहि शुक्लादीनामेव निषेधो

(तबोधकः) रा राम १९

६२

लभ्यते। न तु शौक्ल्यादीनां। न हि शौक्ल्यादिशब्दाः भावप्रत्ययं लब्ध्वा निष्कृष्टं गुणमाहुः। न वा तद्भावे गुणं गुणिनं च किंतु अंतरेणापि भावप्र
त्ययं गुणमात्रपरता द्रूपरसगंधादिशब्दा तुल्या एव। न च शौक्ल्यमिति कार्ष्ण्यमिति भावप्रयोगे सत्येव निवाच्यं न स्यात् शुक्लकृष्णादिशब्दैर्लभ्यते पि
शौक्ल्यादिशब्दैरलब्धत्वात्। अन्यथा तद्भावेत्यादिस्वग्रंथेनैव स्वविरोधापत्तेरिति अवहितेरा कलनीयं। यदि तु प्राचोग्रंथो योजनइत्या ग्रहस्य
हीत्विं योजनां। सदेत्यादिना च यथाश्रुते संदनादिगंध इत्युदाहरणं च। अस्यापवादं प्रथयमाह। मा वेति। ननु अस्तु नाम संयोजना। आकरग्र
थास्तु कथमनाकांक्षितदानारख्यइतिचेत्। श्रृणु। सूत्रे गुणार्थइत्यनेन केवलगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादको गृह्यते। व्याप्तिन्यायात्।
काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला इति द्विधा भाष्येउदाहरणात्। चंदनगंध इत्यादौ तु निषेधप्राप्तेन तैर्वैषगुणे रिति वचनेन समासः प्रतिप्रसूयते। गं
धत्वेन प्रतीयमानो हि गंधो न कृदाषियुर्गं समानाधिकरणः। किंतु स्वप्रधानः। इदमेव नात्यं। ननु च हरि जलमिति यदपि नष्टिगंधामिति प्रगो
गदर्शनाद्वस्तु चमिदमिति वेद्यानां। तत्र हि गंधानिति गुणशब्दः मालतीकुसुमादिषु दर्शनात्। किंतु चंदने साहित्यानि मित्तिकोन्यएव सः। न स्या
चंदन गंध इत्यत्र तस्य वस्तु स्वमेव एवं पररूपमित्यादावपि सुरभिशुक्लादयः शब्दाः तेन तद्गुणप्रतिपादकाः। एवमपि शौक्ल्यसौरभ्या
दिभिः शब्दैः सह समासो दुर्वार इति चेन्मैवं। ने हि शुक्लत्वादिप्रकारक एव गुणबोध। तद्रूपापन्नानां च द्रव्यसामानाधिकरण्यमस्त्येव। शुक्लः सुरभि

दा स्त्रिर्विरिति दिक्। फलानामिति। करणस्य शेषत्वविवक्षायां षष्ठी। ब्राह्मणस्य कृत्वेति। तादर्थ्यरूपसंबंधस्य सामान्यरूपेण विव
ण क्षायां षष्ठी। ओदनसंबंधिनी या क्रिया तां वेद न तु करमित्यर्थः। इत्यादीनि। तथा च भट्टिः। यत्कृते ऽरीन्निरग्रहीः। आदेयस्य किं कृते भोगाः कुंभक ण्डो
र्णतया विनेत्यादि। अनेकमन्यपदार्थ इति सूत्रे सर्वपश्चादिति भाष्यप्रयोगेऽपीहानुकूलः। रक्षितव इति। कैयटहरदत्तौ तु अव्ययप्रति
षेधे स्वस्यौपरीत्युदाहरंतौ अकृदव्यये नायं प्रतिषेधं मन्येते। स्वरभेद इति। कृदुत्तरपदप्रकृतिस्वरेण तिस्वरस्येवावस्थानात्। अं
तस्वरितत्वं इष्टः। तव्येन तु मध्योदात्तत्वं स्यादिति भावः। तत्सरूपस्येत्यादि। यत्तु प्राचामुदाहरणं स्वामी भूतस्येत्यादि। यत्र समर्थनं सन्निसमासे
पूर्वनिपातानियमः स्यात्। विशेषणसमासस्य कस्यादेवेति। अत्रेदं वक्तव्यं। विशे[redacted]षणविशेष्यभावे कामचारादव्यवस्था। यत्र ग्रा
यामप्रधानमुपसर्जनमिति तेन्वर्थतामाश्रित्य द्रव्याश्रितत्वेन गुणादीनामप्रधानत्वाद्द्रव्यापेक्षया गुणादीनां विशेषणत्वं नियमवस्थेष्यते। ते
किं तत्र षष्ठीसमासे विशेषणमिति ते निषेधेन। तेन च पूजार्थो। पूजाग्रहणमुपलक्षणमिति व्याचष्टे। मतिबुद्धीति। भूतं इति। न च तेनकौ
जित्यन्यायेन मतादिभ्यः कस्य वर्तमानकालेऽप्यनुमतकालमौबाधन इति वाच्यं। नेनेत्यधिकारेव पठनात् इति निर्देशेनाबाधनोपनात्। न च ज्ञा राम
र्थ एवज्ञापकं। इतिनोक्षः सुरासुरेरितादित्रयोगानुरोधेन सामान्यविषयकत्वस्येव न्या य्य तादित्यनुन्यासकारः। अन्ये तु कारकषष्ठ्या एव १२

समासनिषेधोऽयं शेषषष्ठ्यां तु समास इत्याहुः। एतेन कलहंसरामस्य महिमः कृतवानिति भट्टिप्रयोगो व्याख्यातः। इदमेषामिति। को विक
रणो वेति क्तः। अधिकरणवाचिनश्चेति कर्तरि षष्ठी। अधिकरणे चेत्येव सिद्धे सूत्रद्वयेऽपि वाचिग्रहणं स्पष्टार्थं। कथं तर्हि किं एतेषां हृतमि
ति। नायमधिकरणे क्तः किं तु कर्तरि। किमेषां हृतं निष्पन्नमित्यर्थः। कर्मणि च। यद्यत्र आकाङ्क्षा न कर्मणि षष्ठी स्यात्तेन तर्हि तृजकाभ्यां निषेधो
व्यर्थः स्यात्। तस्मादव्ययानामनेकार्थत्वात् इनीस्यर्थवशादेव। तदाह। कर्मणीति। या षष्ठीति। समस्येकवचनोऽनपदमुच्चार्यमाणा षष्ठी विहिता
परिशेषादिनावेत्यर्थः। नियमसूत्राणां विधिरूपेण निषेधरूपेण वेति द्वौ प्रवृत्तेः स्वीकृतत्वात्। तृजकाभ्यां। होतृकर्तरीत्यस्यैव विशेषणं तु तेचः क
तेप अव्यभिचारात्। तथा सुपरञ्जक मात्रमभिप्रेत्याह। कर्त्रर्थेति। जयादि स्तु कर्तृषष्ठ्या इति व्याचष्ट। तन्मते तृज्ञुत्तरार्थ इति कस्येत्यस्यानाकिं
चकर्तृग्रहणं तत् जकयोरेव विशेषणमिति युक्तं। तयोः कृत्तत्वात् न तु षष्ठ्या इति भावः। शेषषष्ठ्येति। केचित्तु जनिकर्तुः प्रकृतिरिति सूत्रे जको हेतु
श्चेति निर्देशात् नित्योऽयं निषेध इत्याहुः। न्यासकारस्त्वाह। तच्चेन मे न नू नलोके मि षष्ठी निषेधस्त्वनित्यः। तृजकाभ्यामिति विकल्पेन तत्ससानुबंधक
स्य ग्रहणं ज्ञापकादिति। सर्वापरीति। एकदेशशब्दो ऽवयवे रूढः। अत एव नेत्यकर्मधारयत्वेऽपि तत्सोमेतिचीयेः। कृत्स्नस्य विशान्त्यस्य कृत इति व तु ए
घपीह एकाणोर्वादिभिव्योंमस्तपापि ज्ञात एव निर्देशादिति। तदेतदाह। अवयवेनेति। ननु किमनेन सूत्रेण कर्मधारयेणैव सर्वकायः इति से

त्स्य निर्दिष्टं किंचिदवयववता समुदायेन तान् । शास्त्रमवयवेष्वपि वर्त्तत इति न्यायात् । अत आह । षष्ठी सादिनत्या च कार्यस्तु वृत्त्यादिप्रयोगव्यावृत्तये
स्तत्रमिति भावः । नन्विह षष्ठी दुर्लभा । अन्याराद् इति पंचमी प्रसंगात् । न च हि दिक्शब्दः शब्दो दिक्रूढ इत्यभिव्याख्यानेन संप्रति अदिग्वृत्तिना
योगे पंचमी स्यादिति चेन्न । सत्यं । अवयववृत्तिभिर्योगे षष्ठ्येवेष्यते । तस्य परमाम्रेडितमिति लिंगात् । पूर्वं नाभेरिति । नाभेर्यः पूर्वो भागः सकाय
स्यावयव इत्यर्थः । नाभेरिति दिग्योगलक्षणा पंचमी । अत्र पूर्वस्य भागस्य नाभिरवधिः न तु एकदेशीनी । अतो नाभ्या सह समासो नेत्यर्थः । का
येन तु स्यादेव । पूर्वं कायो नाभेरिति । पूर्वशब्दस्य नित्यसापेक्षत्वात्साधान्याच्च । पूर्वं छात्राणामिति । समुदायस्य समुदायिसंबंधे षष्ठी । बहुवचनं तु
उद्भूतावयवभेदसमुदायविवक्षया । यथा छात्राणां पंचम इति न [illegible] छात्राणामेकदेशिनीत्वे सत्यपि एकत्वसंख्यावैशिष्ट्याभावान्न समासः । श्रा५
सर्वोपीति । शब्दादिरित्यपि शब्दार्थः । तापका रिति । नत्वन्यथा नतायपूर्वं तमङ्गस्थोपपद्यते । नत्रो धिकायवत्सामानाधिकरण्येन निर्वाहः शंक्यः ।
अहः सर्वैकदेशसंख्यादिनाविहितस्य समासांतस्याप्रोक्त एतेभ्य इत्यत्र देशस्य चैकदेशिसमासं विना स्युस्तेरिति भावः । रात्रिरिति । ननु चैवं दिन
मध्यो रात्रिमध्यस्त्यादि न सिध्येदिति वाच्यं । तापकसिद्धस्यासार्वत्रिकत्वात् । यत्तु प्राचोक्तं । सर्वैकदेशान् हः समास इति । तन्न । एकदेशस्य नतीया राम
निर्दिष्टत्वापरनिपातापत्तेः । अथ मिश्राहक्रमान विशेषात् । यद्यपि प्रागेव सर्वैकदेशिनाह्न इति । तदपि न । अहरेवमेकदेशिन च नेनैवन ९३

स्य समास इति संभवति । अर्द्धं नपुंसकं । नित्यं क्लीबत्वमिति । अर्द्धमिति निर्देशादेव क्लीबत्वे लब्धे नपुंसकग्रहणं नित्यनपुंसकार्थमित्यर्थः । खंडं मा
वातुंसी त्रवाचीत्यतुविलिंगः । भित्तं शकलखंडे वा पुंस्यर्द्धं समे शके इत्यमरः । अत्र [illegible] मित्युक्तेति राभ्यां संबध्यते । नत्र शकलं खंड इति रूपभेदात्क्लीबत्वे रवं
नित्यनितत्वचनात्र पुंस्त्वविकल्पेऽस्त्रियामिति फलितं । न च खंड इति स्त्रीलिंगमेव किं न स्यादिति वाच्यं । भिन्नलिंगानां न द्वंद्व इति नन्वपरि
भाषितत्वात् । शकलश्चास्त्रीमिति देशेनैव निर्णयात् । अर्द्ध इति रूपभेदात्पुंस्त्वावगतौ सत्याम पिवा पुंसीति तत्र हि विकल्पेन विशेषात्स्त्री
नपुंसकं लभ्येते । प्राग्वदिति । अवयविना समस्यत इत्यादी स्यर्थः । अर्द्धं पिप्पलीनामिति । इहार्द्धपिप्पलीति एकांशपरवल्लिंगातिदेशोपि व
चनातिदेशाभावात् । विशेषिकत्वाच्चेति भावः । कथं तर्हि अर्द्धपिप्पल्य इति । अर्द्धानि पिप्पलीनामिति विग्रहे मा भूत् । खंडसमुदायेन तु भविष्यति ।
अर्द्धपिप्पली नार्द्धपिप्पली च [illegible] त्यादि विग्रहात् । एकदेशिनेति किं । अर्द्धं पशोर्देवदत्तस्य । अत्र देवदत्तः स्वामी न त्ववयवी इति न समासः । न
एतत्सूत्रं परवल्लिंगमित्यत्र भाष्ये प्रत्याख्यानं । तथाहि । अर्द्धपिप्पलीति कर्मधारयेण सिद्धं । समुदायेष्वा । अवयवेष्वपि वर्त्तत इति न्यायात् ।
सम प्रविभागादन्यत्र हि न वा प्येष्वेव गतिः । अर्द्धाहारः अर्द्धजरतीयं अर्द्धवैशसं अर्द्धोक्तं अर्द्धविलोकितमित्यादिदर्शनात् । न च समप्रविभागे
षष्ठीसमासं बाधितुमिदं सूत्रमिति वाच्यं । षष्ठीसमासस्याप्येतादिति । तथा च कालिदासः प्रायुंक्त । प्रेम्णा शरीरार्द्धहरां हरस्येति । तनी द्वितीय

य। निषेधं वा छिनत्ति। भाष्यकारास्तु परवल्लिंगमिति सूत्रे न खलु रूपग्रहणं द्विगुप्राप्तेत्यादिवा निर्किं शर्वापरेत्यादि त्रिशत्त्री चप्रसाद्यत खलुः।
अय तन्मतेनेमिक्षाद्वितीयादिसिद्धये पूरणेत्यादिनिषेधस्यानित्यत्वमा [illegible] लीयोत्सेत्ता [illegible] प्रमाणत्वादित्यादिनिर्देशानां सामान्यापेक्ष [illegible] प्रकृत श्री
त्वात्। एवं सति तान्युक्तकेषु सिद्धं। मासाप्यजे। अत्र चकारेण विधेयसमुच्चयार्थेन कारप्रश्लेषानुमाना मासापन्ने समस्यते। अचअतं चन
ते४ योः स्यादिति भाष्येस्थितं। अन्त्यकारात्पूर्वमिवाकारं प्रश्लिष्य सोन्तादिलक्षणाभावे नेति प्रोक्तः। इमं श्लोकं परिहरन्नाह। द्वितीययाऽ इति। मासा ख्यी
ति। एकारे शास्त्रत्वं नित्यत्वेन ग्रहणाल्लिंगविशिष्टपरिभाषया वा मासापन्नयोः स्त्रीत्वेन योरपि समासः। कालाः परिमाणिना। परिमीयते परिच्छिद्य
ते येन तत्परिमाणं। परिच्छेदकं तदस्य परिमाणीत्यदाह। परिच्छेद्यवाचिनेति। कालाइति। कालविशेषवाचकाइत्यर्थः। कालसामान्यस्यापरिच्छे
दकत्वात्। मासो जातस्येति षष्ठीसमासे प्राप्ते वचनं। ननु जातः पुरुषः तस्य च हस्तवितस्त्यादिकं परिच्छेदकं न तु कालः। तस्य क्रियामात्रपरिच्छे
द दकत्वादित्येतत्। सत्यं। सा सा क्रिया परिच्छिन्नापि कालः तद्द्वारा देवदत्ते परिच्छिन्नत्ति। यस्य हि जननादूर्ध्वं मासो गतः समासे इति व्यवच्छेद्यते। तत्र आन
प्र व्यवहारकालजन [illegible] नक्षणयोरन्तरालभावी मासो जननद्वारा जातानमपि परिच्छिनत्त्येव। इह तु विशेषणीनिर्दिष्टस्यापि स्तोप्राधान्यं [redacted] पितुष्य राम पंक्ति २
स्य स इत्युक्तं। अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः। एवं बहुव्रीहावपि एतावान्परो विशेषः इह जातशब्दात्षष्ठी विग्रहे तु रिसादेतु द्वाभ्यामपि ९४

शब्दाभ्यां प्रथमैव। समानाधिकरणानां बहुव्रीहिरिति वक्ष्यमाणत्वात्। विशेषणविशेष्यभावव्यत्यासेनैकार्थीभावतुल्यं। यत्तु मीमांस
काश्चित्प्राणं गतमस्येति निविष्टहृदेन तत्रैवं वक्तव्ये। उत्तरीत्या त्वनेनैवायोः किंचित्प्रधानार्थसाम्यलाभेपि अपष्ट्यर्थबहुव्रीहौ पंचविधेपिक
रणादिप्राधान्यस्याभिमतत्वात् विग्रहात्रबलाभातवृत्तिवाक्ययोर्महान्विप्रकर्षः स्यात्। हतेन विम्बः आघोदकोग्राम इत्यादौ कर्तृकर्मणोः समा
सेनाभिहितत्वाच्चकारकविभक्तिरित्यादिसिद्धान्तस्य निर्विवादत्वात्। किं च लौकिके प्रविष्टानामेव पदानां तरे परिनिष्ठितानां लौकिके प्रवेशासं
भवे तु पञ्चानपरित्यागेनानुपस्थितकल्पनमन्याय्यमसाम्प्रदायिकं च। न तु गुणत्वेप्रदानरप्रक्षेपयोर्गौरवेनु फलमुखता वदोषावहा। अत
एव वाक्यार्थेनत्सद्दानुसार्येन विषयेपिति। लौकिकवाक्यभेदेन विग्रहो हृदसेनतः। अथवा मास्तु तत्र वृत्तिः प्रधानार्थसाम्यमपि औत्सर्गि
कमिहत्यज्यतां। तथा च हरिणा। क्वचित्तु गुणप्रधानत्वमर्थानामविवक्षितमित्यपक्षस्यव्याख्यानेन द्विनार्थस्ययत्किंचिदुपसर्जनं गुणप्रधानभा
वस्य तत्र देशे विपर्यय इत्यर्थः। तद्विनग्रहणं कृतामप्युपलक्षणं तेन आक्षिकः वैयाकरणः पाचकः इध्मप्रव्रश्चन इत्यादीनां विग्रहवाक्यादीनि
इहोदाहरणं। सादेतत् विंशतिद्वयंशतिसमासतद्धितवृत्तौ लौकिके प्रक्रियावाक्येपि विचार्य गो दंड - एते शब्दाः षष्ठ्यन्ता एवेति मीमांसकाशयइ
ति चेत्। मैवं। शेषो बहुव्रीहिः त्रिकः। शेषः अस्तिसामानाधिकरण्येमनुप्राप्तत्वमर्थानां प्रथमादित्यादिसूत्रभाष्यविरोधेन दृष्टैरेव तत्र दुर्लभतादिति

दिक्।प्रकृतमनुसरामः।उत्तरपदेनेति।परिमा ण्यु त्तरपदहेतुकद्विगुसिद्धयेबहूनांतत्पुरुषोपक्रम्यइत्यर्थः।सुप्सुपेत्येकत्वस्यविवक्षितत्व
त्वादसामेवचनं।अक्षादेशादिति।त्रिपदतत्पुरुषानंतरमुत्तरपदेपरतोऽवांतरद्विगोसत्ती।निभावः।सप्तमीशौंडैः।बहुवचननिर्देशात्गणपाठ
सामर्थ्याच्चाद्यर्थविगतिरित्यभिप्रेत्याह।शौंडादिभिरिति।शौंडः।प्रवीणः।इहसप्तमीत्युक्तेविक्रियाद्यनावेननभवति।नद्धारकत्वसामर्थ्यं।यथादध्यो
दनगुडधानादौ।तेनकारकाणंक्रिययैवसंबंधइतिनियमस्यभंगोनेतिबोध्यं।अधिशब्दइति।आधेयप्रधानइतिशेषः।अधिकरणप्रधानस्य
तुअव्ययीभावएव।अधिहरीतियथा।अंतःशब्दोप्यत्रपठ्यते।सचाधिकरणप्रधानः।मध्येइत्यर्थात्तद्योगेअवयविनःआधारत्वविवक्षायां
त सप्तमी।यथाऽत्रस्थेशब्दस्येति।वनेनंतर्वनोनवसतिःइत्यत्राधिकरणमात्रवृत्तिरंतःशब्दस्तस्यविभक्त्यर्थइत्यव्ययीभावोनित्यसमासः।प्रनिरंत
रितिणत्वंअंतर्वणं।यत्तुहरदत्तेनोक्तं।तत्पुरुषस्यैवैकल्पिकत्वात्सेऽव्ययीभावइतितन्नचिंत्यं।तत्पुरुषस्यवैकल्पिकत्वेपिअव्ययीभावस्यनि
त्यत्वादहनेअंतरितितदुक्तविग्रहस्यैवासंगतेः।किंचविभक्त्यर्थमात्रवृत्तेरव्ययीभावः।वचनग्रहणसामर्थ्यात्।अन्यथावृक्षस्योपरीत्यादाव
अन्नप्र तिप्रसंगात्।तत्कथंमध्यवाचिनःप्रसंगः।किंचक्रियावाक्यांतगतविभक्त्यर्थवृत्तेरेवाव्ययस्यसमासःसंनिधानात्।तत्सामर्थ्यादेवनिपातेनाभि राम
हितेपिसप्तमीतिस्थितेः।नचैवंनद्यामितिअवयविनआधारत्वविवक्षायांसप्तमीतिवाच्येवोक्तत्वादितिदिक्।यदप्याहुः।अंतःशब्दोऽधिकरणप्रधा १५

णांविरोधे२

नःतत्सामानाधिकरण्यादंतरात्सप्तमी।वनस्येमध्येइत्यर्थात्।वनेनंतर्वनोनर्वसतिः।पूर्वपदार्थप्राधान्येतुअव्ययीभावः।वनस्यांतर्वणमिति। नरं
अत्रेदंवक्तव्यं।सामानाधिकरण्येसप्तमीत्वसंगतेः।व्यधिकरणसमासप्रकरणात्।विशेषणेत्यनेनैवगतार्थत्वात्।किंचमध्यवाचिनाव्ययी
भावेदुर्लभःलक्षणभावात्।अव्ययमितियोगविभागेनकथंचिदुपपत्तिर्ब्रूषे अपदिशमितियथा।नहितथेहापि।नित्यसमासत्वाद
विग्रहत्वंस्याच्चानुपाचवनस्यांतरितितदुक्तिर्विरुध्येत।दिक्संख्येसंज्ञायां।नियमार्थमिति।कथंनहित्रिलोकनाथेनसतांमखद्विषइति
मातुरे कालिदासः।त्रिलोकवाहस्यासंत्तात्तच्चस [redacted] द्विगुः।द्विगोरितिङीप्प्रसंगात्।नचपात्रादित्वंकल्प्यं।यदित्रिलोकीगणनापरास्या
दितिप्रयोगविरोधात्।नचोत्तरपदेइतिसमासः।त्रिपदतत्पुरुषस्येहदुर्लभत्वात्।अत्रोच्यते।लोकशब्दोत्रलोकसमुदायपरः।त्रयश्चलोको
कस्त्रिलोकः।शाकपार्थिवादिः।एतच्चद्विगोर्लुगनपत्येइतिसूत्रेभाष्येस्पष्टं।एतेनतनवरसरुचिरामित्यादिव्याख्यातं।तद्धितार्थ।एक
पिसप्तमीविषयभेदाद्विधानइत्याशयेनाह।तद्धितार्थेविषयेइत्यादिसर्वनामग्रहणे।एतच्चपूर्वापरोदाहरणेनव्यक्तं।यद्यपिस्त्रियाःपुंवदित्य
नेनापिप्रकृतेनिर्वाहःसिद्धः।तथापिदक्षिणपूर्वेत्यादिसिद्ध्यर्थंसर्वनाम्नइत्यावश्यकं।प्रतिपदोक्तत्वादिहापिस्यादित्यभिप्रायः।संख्यापूर्वइति।
मातुरुत्संख्येत्यत्र।अनपत्येउक्तोद्विगोर्लुगिति।लुप्ते।विकल्पेप्राप्तेइति।प्राचांग्रथमनुसृत्तोक्तं।वस्तुतस्तत्रपाणिनिसमासेनुक्तनेऽन्यपदार्थो

पूर्वं क्रमेण परस्परसंबंधाभावाद्द्वन्द्वे तु रूपयोरप्राप्तौ समासो वचनमिदमिति बोध्यं। न [illegible] चेत् तद्धितार्थेति सूत्रेणैव तत्पदे परे तत्पुरुषो वचनात्सा
मर्थ्यासिद्धेः। एकार्थीभावस्तादेवेनित्यसमासविधिसिद्धेः। न हि महाविभाषाप्रवृत्तेः कार्यीभावे संज्ञाया विकल्पित्वात्। न च संज्ञायाभावाभावो [illegible] ध्येनेद
निभाष्यविरोधात्। किं तु वैकल्पिकैकार्थीभावविषये नित्यैव तत्संज्ञा। इह तु वैकल्पिकत्वाद्गुणबाधितः। एवं च वार्त्तिके तत्पुरुषसंज्ञा ज्ञापकसिद्धार्थ
नुवादमात्रं। अत एव खलादिरेतत्तत्सम्यमिति कर्मधारयोत्तरपदो बहुव्रीहिः [illegible] नित्यसमर्थसूत्रे दोषे कैयटोक्तं संगच्छते। पुंवद्भावपूर्वनिपातयोः सि
द्धेहि तथोक्तं। अत एव चित्राजरद्गुरिति संगच्छते। पूर्वकालैकेत्यादेर्जरद्गवादौ हि लक्ष्यार्थे नयाभूतत्वगत्या प्रवृत्तेरयोगादिति दिक्। द्वन्द्वस्योदाह
रणं तु वाक्छद्ग्भ्यं प्रियेत्यस्य वाग्दृषदप्रियः। छत्रोपानहप्रियः। इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वन्द्वः। नेनसमासान्तं अजपि नित्यमेव। यच्च
पूर्वं तत्रैव बाधलक्षणे प्रत्यस्य युगपद्विधेरेकाह्नवद्धिसामत्वमित्यं [illegible] करणे प्रथमः षडहो द्वन्द्वेर्थे नरसामाकार्य दाहृत्य द्वन्द्वं कृत्वा बहुव्रीहि
रिति पूर्वपक्षं रचयित्वा तत्रोपष्टंभकतया कात्यायनवचनमिदमुपन्यस्तं। यच्च नेह द्वन्द्व इति सिद्धान्तयित्वा कात्यायनवचने तु समासान्तनकृत विशे
षमात्रविषयमित्युक्तं। तदुभयमपि चिंत्यं। उत्तरपदे इत्युक्ते द्वन्द्वकृते तस्यासंगतेः। स्वरे विशेषस्यास्त्वेन पाससमासान्तपर्यन्तमाग्रहेवीजा राम
भावाच्च। नित्यसमासवचनमिति वार्त्तिकस्य संकोचे प्रमाणाभावाच्च। संख्यापूर्वो द्विगुः। अनोक्तमिति। अयं भावः। पूर्वसूत्रविषय एवेमं स ९६

ज्ञा। अनेन तस्येति न्यायात्। एतदर्थमेव हि तत्र योगविभागः कृतः। अन्यथा दिक्संख्ये संज्ञायां तद्धितार्थेत्युत्तरपदसमाहारे इत्येव ब्रूयात्। ने न स
सकृत्पयपरत्वत्र इगन्तकाले निपूर्वपदप्रकृतिस्वरो न भवति। किं तु समासान्तोदात्तत्वमेव। तथा च लक्ष्यं। समकृपयस्य पर्से नेपेदुः समकक्षा गाः
मुहूर्ता यत्र लोकाः इत्यादि। नपुंसकमिति। एतच्च मूल एव व्याख्यास्यते। कुत्सितानि कुत्सनैः। कुत्सु अवक्षेपणे इत्यादिस्तेनैव चकारस्यानुक्तसमु
च्चयार्थत्वादनेनमानेनक्तः। इत्याशयेनाह। कुत्स्यमानानीति। तरर्थकानीत्यर्थः। वैयाकरणखसूचिरिति। सूत्रपनेरच [illegible] यः पृष्टः सन् प्रश्नं विस्मार ३
यितुं खं सूचयति अहो निर्मलं गगनमिति स एवमुच्यते। दुर्दुरूढ इति। दुर्ल उत्क्षेपे। दुः पूर्वः। ओणादिकः कूटप्रत्ययः। बहुलमन्यत्रापीति णिलु
क्। रलयोरैक्यं [redacted] तस्मरणात्। इः। विशेष्यस्य पूर्वनिपातार्थं सूत्रं। प्रायेणाग्रेमेव मेव। शाकप्रतिमिति कुत्सायामेवार्थे। सन्निधानात्। नेनै
हेन मीमांसकेतरसिद्धिः। [illegible] पापाणकं चाहो कुत्सनाभिधायिनोर्नयोः पूर्वसूत्रेण समासे परनिपातः स्यात्। तस्मात्पूर्वनिपातार्थमिदं सू
त्रमिति भावः। तालसविमिति। अत एव सामानाधिकरण्यान्मृगी व चपला मृगचपलेत्यादौ पुंवद्भावः। उत्तरपदोपस्थितत्वात्। मितं चापलादि द्वारक
मेवेह साधारणं धर्ममपेक्ष्यते। सन्निधानात्। वागर्थाविव इत्यादौ तु पि सन्निहितसंपर्कादिद्वारकमेव साधर्म्यं प्रतीयते। कथं न स्यात् उपमानपरत्वेनैवेत्। भ्रू
न पूर्वगतसाधारणकार्यमारोप्यत्वेन हि सामान्यवचनेनोपमानोपमेयसाधारणधर्मविशिष्टोपमेयपरत्वं बोध्यं। उपमितेति। कथं भाष्याब्धिः कानि

गंभीरदृ इति कैयटः । सामान्यप्रयोगसत्त्वेनाव्याप्तेः । उच्यते । इह गांभीर्येण सादृश्येन विवक्षितं किं तु विजनदुरवगाहत्वादिना । तस्य चाप्र
योगोऽस्त्येवेति निर्बाधः समासः । विशेषणं ॥ ननु विशेषणविशेष्यभेदे कामचारात् लावककपाचकादावित्र नीलोत्पलादावपि अव्यवस्थितः पू
र्वनिपातः स्यादिति चेन्न । अत्राहुः । जातिशब्दस्य गुणक्रियाशब्दयोः सममिव्याहारे विशेष्यसमर्पकत्वेनैवान्वयेन नीलोत्पलं पाचकब्राह्मण इति व्यव
स्थितत्वात् एव प्रयोगः । गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चानियम एव । खंजकुब्जः कुब्जखंजः पाचकपावकः पावकपाचकः । खंजपा
चकः पाचकखंज इति । अत्र च मूलमुपसर्जनमिति महासंज्ञा । अप्रधानं ह्युपसर्जनं । गुणक्रिययोश्च द्रव्यप्रत्याप्राधान्यं स्पष्टमेव । यद्वा विशे
षणविशेष्यभावोऽस्त्य संबंधिकतयान्यतरोपादानमात्रेणेतराक्षेपसंभवे उभयोपादाने निरूढविशेषणपरिग्रहार्थमिति रूढिस्थापा उक्ता भाष्य
काराद्विव्यवहारादवसीयते । पूर्वापर । अपरस्येति । एतच्च पाश्वादिनिसूत्रे भाष्ये स्थितं । बाहुलकादिति । एके च मुख्याः वीरयन्तं पराक्रमेतेर
न२ बो निबोध्यं । श्रेण्यादि कृतादिभिः । एकेंद्रियत्वेन पण्येन वा येजीवंति तेषां समूहः श्रेणिः । कृतादिः कृतमिति । एकदेशाकरणात्तद्देवाकृते । सन्महत् । गुण
क्रियाशब्दैः सह समासे सन्मादीनां पूर्वनिपातनियमार्थं सूत्रं । [illegible] । समानाधिकरणाइति अर्श आद्यजंतः । औपचारिकं वा । समानाधि राम
करणपदद्वसमर्थः । भाषितपुंस्कादित्यादि । एतच्च स्त्रियाः पुंवदिति सूत्रे स्फुटीकरिष्यते । ननु तेनैव कर्मधारये सिद्धं । जातीयदेशीयपोस्त ९७

णाकृतेमकेदेशांतरस्याकर २

नेसिताद्विति सिद्धं । न त्विमं नेन सूत्रेणेत्याह । हरणीत्यादि । नवेसादिचास्त्री पुंसलक्षणेति । स्तनकेशवत्यादियुक्ता स्त्री पोटेत्यमरव्याख्याता ख्या
रः । हरदत्तस्तु नपुंसकं पोटेत्याह । तत्र मूलं मृग्यं । अमरेण नपुंसकपर्याये पृथगेवास्य पाठात् । कडारादय इति । नात्र कडारत्वं कुत्स्यते । अतः कु
त्सितानि कुत्सनैरिति गतार्थता न शंक्या । प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्रवृत्तेः । कथं तर्हि जनयति कुमुदं श्रोत्रिं पूर्तवकोवा लभ्यस्यानामि
ति । वक्त्रधूर्तइति युक्तं । सत्यं । प्रमाद एवायमिति प्रामाणिकाः । प्रशंसावचनैश्च । वचनग्रहणं रूढिशब्दपरिग्रहार्थं । येनु यौगिकाः प्रशस
्त्रा मनरमणीयादयः । पंच विशेषवचनाः श्रुविमद्वादयः । योगो प्राहस्ता प्रशंसंतीति सिंहो माणवक इत्यादयः । तेसर्वेप्युदाहर्यंते । कुमारः
श्रमणादिभिः । एवकारः स्फुटस्तिह्नद्योतननार्थः । ज्ञापकं तरस्याविसंभवात् । तथाहि । सुतावलनी ति सूत्रे जरती ग्रहणं लिंगं । नहि पुंवत्त्वे श
ब्दस्य पुंस्त्वे जरती सामानाधिकरण्ये न्याय्यं । यत्तु अस्मादेव्यपः [illegible] विधोपुंसि जातेरिति गणसूत्रे पुंसीत्युक्तिरपि हेतुराधिकेति । तत्र एका
र्थास्य ऊहवति ग्रहणेन मूलशैथिल्यात् । चतुष्पादो गर्भिण्या । मेतुकुलात्प्रजातित्यनुवर्तने तेनेह न । कालाक्षी गर्भिणी । चतुष्पात्किं । ब्राह्मणी स
गर्भिणी । प्रकृताहरणे विशेषणमिति समासः स्यादेव । पूर्वनिपाते विशेषः । मयूरव्यंसकादयश्च । चकारोऽवधारणार्थः । समासांतरं व्यावर्तयि
ति । पूर्वत इति । तथा च गुणवचनत्वात् पूर्वनिपाते प्राप्ते इदं वचनमिति भावः । अन्ये त्वाहुः । मयूरव्यंसकौ मयूरव्यंसकः । उपमानानि सामान्यवच इव

नेरिति सिद्धे पुनर्विधानं तत्पुरुषे तुल्यार्थेति स्वरो माभू- दिति। सादृश्यपमानसंग्राहकेनेन विहिते समासे प्रवर्त्तते। अश्रीनपिबनेति। उदाहरंति
रा मारूपस्यान्यपदार्थस्य प्राधान्यात्स्त्रीत्वाट्टाप्। एवमग्रेपि। अंतरमिति। अंतरशब्दोभिन्नवाची। मात्वं कार्त्स्न्येवधारणे। अंतरमात्रशब्दान्नांस
हनित्यस्य समासः नञ्। उत्तरपदार्थप्रधानोयं समासः। तथाहि। आरोपितत्वेन त्वाद्योत्यते। आरोपमात्रं चाविषयत्वं तु संसर्गः। तथा चात्राब्राह्मणश
ब्दादारोपितो ब्राह्मणइति बोधे ध्यद्ब्राह्मणभिन्नइति पर्यवस्यति। अतएवानुपसर्जनत्वादस्मिन्नेत्त्रित्यादौ सर्व नामकार्यसिध्यति। तत्पुरु
षसोत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधं। एतदेवाशिश्चित्ते नञ्समासग्रहणेनेहलिंगं। मीमांसकादयस्तु ब्राह्मणभिन्नत्वा
दिशा ह्यबोधएवेत्याहुः। तन्मतेसद्दृत्यादेरनिस्सर्वद्दृशादित्वेसमस्तत्वात्सर्वनामसंज्ञाकार्यगणकार्यं च न स्यात्। यत्तु तत्सादृश्यमभावश्च तदन म
न्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता इति पठितं। अब्राह्मणः। अपापं। अनश्वः। अनुदरा कन्या। अपशवो वा अन्ये गो
धर्म अश्वेभ्यः। अधर्मः। इत्युदाहरंति। तन्नु यथायथमाधिक्यमिति सकथं चिन्नेयं। सर्वथापि नञ्समासस्योत्तरपदप्राधान्यं भाष्योक्तं नान्यपृ
नयं। अनएवानेकमन्यपदार्थ इत्यत्रानेकशब्दादेकवचनं प्रयुक्तं। भाष्येपि। सेव्यमानेनेकयाशवनापगयेति। कथं तर्हि पतत्यनेकजलधेरिवोर्म राम
यइति। उच्यते। अप्यारोपितैकत्वानां प्रत्येकमर्थतया नञ्समासवत्बहुत्वाभिप्रायं बहुवचनं। यद्वा समुदायबहुत्वे बहुवचनं। रथोष्ठ्योगजश्वमसे ९८

प्र कमनेकस्तनः अनेकश्चानेकश्चेत्येकशेषात्। यत्तु शाब्दीनेकक्रियांपाचसाण आहुः। नञ्विशिष्टेनोत्तरपदेन सादृश्यादयोलक्ष्यंते। तत्सर्वो
यंग्रंथसंदर्भविरुद्धं आकरविरुद्धं चायदपि विचारसिंहं मणावुक्तं। समासेनोत्तरपदप्राधान्यं माभूज्जानवता। नञर्थमिलितेन चसदृशादि
निलक्ष्ययेदिति। तदयुक्तं रीत्या भाष्यविरुद्धमिति स्पष्टमेव। यदि तु स्तानंत्यमेवावलंब्यते नहि कथं चित्समर्थयितुं शक्यं। तथाहि। अस्तलक्ष
णैव। तथापि नञ्समासेउत्तरपदप्राधान्यमयुक्तकार्यमिति लक्ष्यंते। अनञ्समासइतिज्ञापकान्नोपेयप्रतिपत्त्यर्थ उपाया अव्यवस्थिताइतिन्या
यात्। समासेतिनिवदनवाक्येनञोऽसमस्तत्वात्क्रियायोगेनान्वेपइति धनयति। नञ्संबोधनान्तं कृत्वोर्थः कारकं प्रथमोविभक्तिः। धातुसंबंधाधिक नञ्
म॰ रतिष्यन्नसमस्तनञ्। तथा पश्यभावेन षष्ठी चेत्कृदिति द्वयं। साधुत्वमप्रस्यास्य क्रियेयेवावधारितं। युक्तं चैतत्। तं पचसि पुत्रं पश्य इत्यादौ न क
ञ्समभिव्याहारे क्रियायां एव निषेध प्रतीतेरनुभवसिद्धत्वात्। भवति प्रयोगेपि तथैवन्याय्यत्वात्। घटो नास्ति। घटोस्ति। अहं नवमास्मीत्यादौ वचने न
पुरुषव्यवस्थादर्शनात्। अन्यथार्थाभावेव्ययीभावस्यदुर्वारत्वात्। यत्तु नञ्तलाधेयताभाववान् घटइत्यर्थवर्णनं। तन्न। क्रियान्वयेकारकविशे
षणं दुर्लभत्वात्। तस्मात्कारकविशिष्टक्रियायां नञर्थस्यान्वयः शाब्द इत्येव तत्त्वं। भाष्यवार्तिकस्फुटलक्षणं सोपपदादिकरीत्याप्युत्तरपदार्थप्राधान्येऽव्य
यीभावः। उत्तरपदार्थप्राधान्येन तत्पुरुषइतिविषयविवेकस्य सुलभत्वात्। यत्तु वदंति। यदाभावसामान्येनञ्वर्त्तते तदाव्ययीभावः। अभावविशे

अविवक्षार्थान्तुरूप एव। तस्य नञर्थत्वाभावेन दृष्टविपर्यासार्थप्राधान्यासंभवादिति गम्यम्। पापाभावोऽपापं इति स्वोक्तं तु रूपोदाहरणे विभा अ
स्व वत्वेनैवाभावभानेनाव्ययीभावं दुर्वारत्वात्। यदपि विशेषस्य नञर्थत्वं नास्तीति। तदपि न। निर्विशेषस्य सामान्यस्याभावात्। विशेषरूपेण
वाच्यत्वं नास्तीति चेन्न। नहि अविघ्नमित्यादिरव्ययीभावो वार तज लांजलिरेव स्यादिति न किंचिदेतत्। नञो लोप इति। तिङ्नेन समासाभावा र
प्राप्तेर्वचनं। अपचसीति। कुत्सितं पचसीत्यर्थः। नभ्राडिति। नञ्समासे तु अनेकधैवेत्यवगन्तीति भावः। नगादिति डा बध्य। छिन्नयोरुन्यक्ति
योगे विहितोऽङ्गपरियोपि स्वभावान्नैव प्रयुज्यते। तत्रापि आविः प्रादुःशब्दौ मुक्त्वान्येषां कृत्योनिर्नैव योग इति माधवग्रंथे स्थितं। तथैवोदाहरति।
ऊरीकृत्येति। आविःशब्दस्य तु साक्षात्प्रभृतिषु पाठात् गतियोगे गतिसंज्ञाविकल्पः। स्यक्तियोगे तु अनेन नित्यमिति विशेषः। कथं तर्हि चारुणाम
द विशेषकमथाविश्वकृषोभवदसाविवरागइति माघः। अभवन्नुगपहिलोलजिह्वा पुगलीहोभयस्तक्रभागमाविरिति च। तिरंकृत्वाः कवयइ
तिहस्तः। वस्कृतस्य तेषां गम्यानोरिति सूत्रस्य प्रयोगनियमार्थत्वे प्रकृतेनुपपन्नत्वात् अपि संज्ञानियमार्थत्वपक्षे दोषलेशोपि नास्ति। तिरसंपतितश
हृकौ स्वभे। एतेन पुरो रामस्य जुहुवांचकार ज्वलनेवपुरिति भट्टिर्व्याख्यातः। हस्ते पर्यस्येति। हस्ता गमनं हिया। हस्तेत्युक्ता परिग्रहश्च चेति। आयन्तु राम
दाहरणे। द्वितीयं प्रत्युदाहरणं। अपरिग्रह इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति। अभिलाषेनातिलप्य नतिरूप्ति ११

पर्यंतं पिबतीत्यर्थः। पुरस्कृत्येति। ननु श्रद्धाया अपगमात्तत्प्रतिघातो गम्यते। प्रत्युदाहरणं तु कणेहत्वागतः। स्तनस्तंडुलावयंः कण
स्तस्मिन् हत्वेत्यर्थः। पुरस्कृत्येति। नमस्तुरसोरिति सत्वं। कथं तर्हि अभिमुखं पुरः पश्य सिद्धेश्वरस्य इति। स्थितमित्यध्याहारेणादोषः प्रत्यगिति
त्वात्। एतेन नमस्य स्थिता कथमपि पुरः कौतुकाधानहेतोरिति व्याख्यातं। अस्तं च। अव्ययमिति किं। अस्तंकाण्डं सिप्तमित्यर्थः। अदः कृत्येति
यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणं। तिरोऽन्तर्द्धौ। अन्तर्द्धौ किं। तिरोभूत्वा स्थितः पार्श्वतो भूत इत्यर्थः। विभाषा कृञीति। तिरः कृत्वेति।
गतित्वाभावपक्षे सत्वमपि न। तिरसोऽन्यतरस्यामिति सत्वविधौ गतिग्रहणानुवृत्तेः। केचित्तु पराभवे तिरस्कारशब्दप्रयोगमनुरुन्धानाः स
तिनिमाधव ५ त्वविधौ गतिग्रहणं निवर्त्तयं [redacted] वाचनं नियम्यन्ति। निवचने नहि वचनाभावः। अर्थाभावेऽव्ययीभावः इह। विशेषेणेदं तत्ताविपात्यते
नतु संज्ञासन्नियोगेन। मतन आचार्य इति। अनेन गतार्थत्वात्। अस्वपदविग्रहेण नित्यसमाससतां च दर्शयति। अतिमालइति। एवमभिग
तो मुखमभिमुखः। उद्गतो वेला मुद्वेलः। प्रतिगतोऽसंमत्ययसः। उपपदमतीति। अतिङिति नोपपदस्य विशेषणं किं तु समासस्य एतच्चानुवर्तते
तमयपोरिति सूत्रे भाष्ये एवस्पष्टं। नचाहि किं रत्नस्यानधिकारादकिंरत्नयहणानर्थक्यमितिवाच्यं उपपदसंज्ञार्थत्वादिति शंक्य। अतिङ्इति स नि
मासप्रतिषेधात् संज्ञानर्थक्यमिति सिद्धोतितेनद मित्येवाह। अतिङ्न्तश्चेति। ननु सुपेत्यधिकारात्तिङन्तेन न भविष्यतीतत्राह। अ

तिङ्ग्रहणमिति। सर्वस्तत्रइति। कुप्रादयः सुबंताः सुबंतेन समस्यंते। ततः गतिः सुबंतोऽतिङंतेन समस्यत इति व्याख्येयमित्यर्थः। तथा चे=
गीयत्पुस्तकरीत्या गतुपपदस्योरेव लाभस्तथापि तिङ्विषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा उदाहृता पिज्ञाप्यत इति भावः। यदा का
रकांशे कृत्कारणेनेति स्वतंत्र एव कुलग्रहणं तु कार्थसाधकं बोध्यं। प्रागिति। कृदंतमाद्युत्तरपदात्स्वतंत्रस्य ते प्रागित्यर्थः। अथमांतं सुग्रहण
२८४ मिहानुवर्त्तत एव। अत एव राजदृशीत्यादौ हृचपि देनलोपादिकार्यं सिध्यति। परिभाषायाः फलं दर्शयितुमाजिमित्युदाहरति। व्याघ्रीति। व्याजिघ्रतीति
व्याघ्री। आतश्चोपसर्गे इति कः। पाघ्राध्मेति शप्रत्ययस्तु संज्ञायां नेति वक्ष्यते। व्याङोर्घ्रेति हेन गतिसमासः। ततः परद्वि घ्राहस्य सुबंतत्वाभावेऽपि सेन तत्
हिं सुबुत्पत्तये संख्या घपेत्यंतं ततः प्रागेव लिंगयोगः लिंगनिमित्तश्च प्रत्ययः शा वेवस्यान्न तु ङीष्। घ्राहमात्रस्य जातिवाचित्वाभावात्ततो घ्राशब्द
न समासे सति अदंतताभावाज्जातिलक्षणो ङीष् स्यादिति भावः। उपपदमुदाहरति। कच्छपीति। कच्छेन पिबतीति कच्छपी। व्याघ्रीवत्। सुपीति पा
गविभागात्कः। यत्तु प्राचा उपपदमतिङिति व्याख्यातं तन्न। तथा सति अथमांतसुबुग्रहणनिवृत्त्यापत्त्या बहुविघ्नापत्तेः। तथाहि। तिगतिड
त्यत्र निसोस्ततं संपतेत्यत्र मोनुस्वारः राजदृशीत्यादौ हेन लोपश्च न स्यात्। प्रादिते त्यादौ अतो गुण इति पररूपं च स्यात्। एतेना निष्कि। एथानाहा राम
रकोव्रजती ति प्रत्युदाहरणमपि प्रत्युक्तं। यद्यपि कुगतीति सूत्रेऽतं अत्र सुप् सुपेत्यनुवृत्तेस्तिङापि समासः। उरीकरोतीत्यादितर १००

तं३

प्यसत्। तत्रशेषः। कृतेनातिङ्ग्रहणेनैव विरोधात्। तिङा समासस्तु सहेतियोगविभागबललभ्यश्छांदसश्चेति प्रागेवोक्तम्। लोके तु प्रभवती
त्यादौ उपसर्गः पृथक्पदमेव। कोप्यादिपाठिनोऽमैकपद्यभ्रमे तु धातूपसर्गयोः संहितायामित्यत्रोक्तं। कथं तर्हि अभ्यआपाहीत्यादौ पदपा
ठे उपसर्गे अवसानमिति चेत्। पदपाठस्यापि व्याख्याविशेषतया तत्रानुकरणशब्दे नोपसर्गत्वाभावात्स्वतंत्रवदनुकरणमित्यतिदेशात्स्वैक
ल्पिकत्वाद्वृत्तदेनेभ्य इति सूत्रे त्यदाद्यत्वं कुर्वता एकशेषं चाकुर्वता सूत्रकृतैव तथा ज्ञापितत्वादिति दिक्। अमैवाव्ययेनेति। तुल्यविधानमिति। ए
तच्चाध्याहारेण लभ्यं। तदेवेति। नियमस्वभावत्वे व्यार्थकथनपरोऽयमेवकारः न तु स्वतंत्रः। अव्ययेनेति किं। तुमकारः। अस्तित्रियमय
ग्रहणे अमैव तुल्यविधानं तदेव समस्यत। इर्वस्तत्रारंभसामर्थ्यादव्ययविषय एव नियम इति चेत्। न हि अमंतविषयकत्वे किं न स्यात्। अमं
तेन यः समासः सोऽमैव तुल्यविधानस्येति। तथा चाग्रे भोजं भित्यत्र मा भूत्। अग्रे भुक्त्वा कालो भोक्तुमित्यत्र तु स्यादेवेति भावः। तृतीयाप्र
न्य भृत्यंतरस्यां। उभयत्र विभाषेयं। अमैव तुल्यविधिरित्यप्राप्ते। यथा उपदंशस्तृतीयायामिति। यत्तु अमा चान्येन तुल्यविधानं तस्य समासे यथा
ऽव्यये यथाभिप्रेताख्यान इति। उच्चैःकारमाचष्टे। इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः। आदिर्णमुल्यन्यतरस्यामित्याद्युदात्तत्वं। अस
मासे तु उच्चैरित्यंतोदात्तं स्वरादिषु तथा पाठात्। अमैत्यनुवृत्तिमभिप्रेत्याह। अमंतेनेति। नेनेह न। पर्याप्तो भोक्तुं। तत्पुरुषः। समासो

ब

न्तापेक्षयाऽव्ययवषष्ठी। आंगुलमिति। द्विगोर्निति मितिद्वयस्य चोलुक्। द्वंद्वाद्यमिति। नतु रूपस्यासंभवादितिभावः। ननु अहस्थासोश त्रि
२ श्चेति कर्मधारयोक्तः। पूर्वोत्तरयद्दयोरन्यं नस्य गोणेऽसंभवादिति चेन्न। मुख्यसंभवे गौणग्रहणायोगात्। हिमं नवि। शिरावह्नोरात्रे च द्वंद्वसमा
मिस्त्वे द्वंद्वे समासांतनदृष्टिराच्। अहोरात्र इति। ज। निरशणिनामिति समाहारद्वंद्वः। रात्राह्नाहाः पुंसि इति पुंस्त्वं। यत्तु प्राचोक्तं एकवद्भावात्क्लीब
त्वेति तन्न। सनपुंसकमिति स्परात्राह्नाहाः इति पुंस्त्वेन परत्वाद्बाध इति वक्ष्यमाणत्वात्। आक रविरोधाच्च। द्विरात्रमिति। संख्यापूर्वं रात्रं क्ली
बमिति वक्ष्यते। अह्नष्टखोरेव। नत्वहिन इत्येव सिद्धे नियमार्थमिदं एवकारः स्पष्टार्थः। अह्न एव टखयोरिति विपरीतनियमस्तु न भवि
ष्यति। आत्माध्यानेः खइति प्रकृतिभावाल्लिंगात्। अनित्यत्वादिति। अत्र च लिंगं शाक्तिकलोगत्वात्कुवेरस्य च घटीग्रहणं। अह्नोह्न एतेभ्यः। अह्नः
सर्वैनिस्तत्रेऽहरादयो निर्दिष्टाः। चकारेण संख्याव्ययेऽनुकृष्टा। तत्र सर्वेषां वृद्धिस्थलाविशेषेपि अहः शब्दस्य इह न गृह्यते। असंभवादित्या — वानुक्तंईनेन खेभिता
शयेनाह। सर्वादिभ्य इति। समासांतेषु परइति प्रकरणबललभ्यमेतन्। प्राचा तु दृष्टिपरत इति व्याख्यातं तदपि सामर्थ्यलभ्यमिति कथं चिन्नेयं
भाष्येतु अह्नादेशः प्रत्याख्यातः। अह्न एभ्यः। अस्माट्टचोपवादः। अह्नष्टखोरेवेति नियमाद्विलोपोन। अह्नलोपोन इति व्याख्यादानाम अ राम
ह्नोदंतात् रेफादिति। यदि तु सर्वत्र उत्सपि प्रयोगोस्ति न हि शादिस्त्वपि बोध्यं रषाभ्यामित्यधिकारात्। अत्र पाचः। अह्न इति षष्ठ्यास्थानेयत्प १०९

येन प्रथमा। अदंतनिर्देशान्नेह दीर्घाह्नी प्रावृडितिवदंनि। नत्रव्यस्य पादिवर्णनक्रेरोव्यर्थः। दीर्घाह्नीत्यत्र आनिपदिकांते निणत्वं व्यावर्तयि
तुं स्कन्दादित्स्येव वक्तव्यत्वा दाकरस्य न यथोक्तताभेस्याशयेनाह। अह्नोनस्येति। भाव स्तु अह्नोनस्येत्युक्त्वा अदंतनिर्देशादिवदंतो व्यापा
तः स्यादेव। कालात्र इति। एतच्च संख्यावित्सायेंनिस्तत्रेर्न्य सपदमंजर्यां ओहोदू भागेमाधवग्रंथे च स्पष्टं। यत्तु न संख्यादेः समा
हारे इति सत्रे द्व्यहस्तत्र्याः ओहत्तु गिनि द्विनिकाशादिभिरुक्तं तदयुक्तमिति भावः। प्रसंगाद्दाह। द्विवर्षा मितिरादा विति। यत्तु प्राचाकालमितिपरि
षिकायां द्विवर्षस्याप्रवमीश्रुपाथदशमीकालास्य गाधायसाद्व्यह्नी काललघुगादिभोत्तरयुनोवाधानरेकादशी निम्नोके द्व्यह्नीति प्रयुक्तं। सा
दशमीद्वयोरह्नोर्भवा द्व्यह्नी सादि चन द्विवरणे व्याख्यानेन सर्वथा मादिकमिति भावः। तथाहि। इहादिद्वेतिऊ। पूर्वाह्नेगेरितिवा। आद्येपि अणं
न्तात्तु जेनतादृजेनतादद्योनाद्यः। इतिकारा घ्रक्तस्याण् इह पामादिकत्वाल्लुकालुसत्वाच्च। न च प्रत्ययलक्षणं। अणस्योकार इति वा
रव्यानात्। नापिद्वितीयः। वज्रोपोकारस्यदंनादितिव्याख्यानात्। अत एव हिद्वि निकेतस्तत्र कीनार्थे प्राग्वतीयस्य ठ ओलुकि ठावे केरेउदाहृ वा२
तः। द्विविस्तोताराद्वपूर्वं। नापि तृतीयः। टचः समासांतत्वयानदंतस्यतद्धितार्थेप्रत्ययोपसर्जनत्वात्। अत एव शापि वृत्ताक्लिनाप्रोक्तमभीष्टानी

वो आसणी आपिशलेरुदाहृतं। भाष्यमतेऽचाटवाघनाञ्च। नापि चतुर्थः। अपरिमाणेत्यादिङीपो निषेधात्। तस्माद्द्वावेव युक्तः। स्यादेतत्।
टाबप्युक्तः। स्त्रीत्वस्यैव दुर्लभत्वात्। तथा चाह्नोऽह्न एतेभ्य इति सूत्रे कैयटहरदत्तावाहतुः। राजाह्नाहाः पुंसीति वचनात्स्त्रीयां त्वभावात्
टजचो नास्ती ह विशेष इति [illegible] मिवं। भाष्यानवबोधात्। इत्थं हि कैयटाद्याशयः। सर्वादिषद्वहूर्वादिकृष्ट जपवादोऽविहितः। तत्र सं
ख्यापूर्वस्य तद्धितार्थद्विगोर्विशेष्यनिघ्नत्वेन स्त्रीत्वसंभवेऽपि टजं तस्य तद्धितं प्रति उपसर्जनत्वादनुपसर्जनाधिकाराज्जस्यादि ङीति
र ङीपः प्राप्तिरेव नास्तीति तत्र टजचौ विशेषः स्पष्ट एव। पुण्याहमित्यत्र तु उत्तमैकाभ्यां च स चो निषेध अह्नादेशस्य चेति मतभेदेन ख्यव स्त्रि
तौ इतरेषां च गुणीं तु राजाह्नाहाः इति वचनात्स्त्रियां टजिति न स्त्रीति स्यादेतत्। भवेदयं वृद्धानामाशयः। यद्यपत्र द्विगोर्विशेष्यनिघ्नत्वे प्रमाणं
स्यात्। तदेव किमिति चेन्न। उच्यते। अमरसिंहेन पुंस्त्वे सभेदानुचराः सपर्यायाः। सुरासुराः इति पुंस्त्वाधिकारे अह्नाहांताः स्वे उभे रात्रं
रत्न नाः प्रागसंख्याः इत्युक्तं। अयं भावः प्रायः सापत्न्यपूर्वाः परोपगाः तद्धितार्थद्विगुः संख्यासर्वनाम तदंतगाः इति च ततः परमुक्तं। एवं च राम
हअह्नाहांताः इत्यनेन पुंस्त्वं प्राप्तं तद्धितार्थद्विगुरिति परोपगत्वेन परत्वादेव बाध्यते। तथा च। तेनैव पठितेन। परं विरोधे शेषं तु स्वेयं शि १०२

भ

दप्रयोगत इति। तस्मादमरग्रंथः उक्तार्थे प्रमाणं। किं च परवल्लिंगमित्यस्य राजाह्नाहाहत्यपवादः। यत्र तु द्विगुप्राप्ते सादिना उत्सर्गो
निषिद्धः तत्र तदपवादस्याप्रवृत्तिः स्पष्टैव। एतच्च माधवेनापि ध्वनितमित्यनुपदमेव वक्ष्यामः। किं च। भवाद्यर्थतद्धितांतं परोपगमिति विशेष्यलिंग
निर्विवादं। तद्धितलोपे तु यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन भवाद्यर्थवत्त्वात्तादेरप्यभिधानं न्याय्यमेव। प्रकृते लिंगानुशा
सनस्य केवलायां प्रकृतौ उपक्षीणत्वात् लुप्ततद्धितायां प्रवृत्तेः। लुपि युक्तवद्व्यक्तिवचने इति लिंगातिदेशोऽप्यत्र प्रमाणं। प्राकृतलिंगानुशासनानां
लुप्तप्रत्ययेषु प्रवृत्तौ तद्वैयर्थ्यापत्तेः। अत एव लवणः सूपः लवणा यवागूरित्यादौ न क्लीबत्वं। अत एव च कुमारीश्रालण इत्यादिषु आ
चारक्वौ वंत शक्तिकर्तर्ये द्विवचने प्यपि विशेष्यनिघ्नत्वे वाचकस्य स्पष्टा। ह्यस्की इति ङीपं वदता माघेनापि स्त्रीत्वं स्वीकृतमेव स्पष्टं बहुनाप्यदि स
मर्थनीयमेवेत्याग्रहस्तर्हि आधाराधेयभावव्यत्यासेन समर्थनीयं। द्वे अहनी यस्या इति। द्विनद्या धारभूतेत्यर्थलाभाद्वा। उपात्तस्यापी
ति। यथा प्रथमयोरिति प्रथमाद्वितीययोर्ग्रहणं। द्विवचननिर्देशात्। तेषां होपि उत्तमग्रहणसामर्थ्यादित्यपोईयोर्ग्रहणं। उत्तमो च एक
ब श्चेति विग्रहे सौत्रं द्विवचनमिति तेषामाशयः। संख्याः प्राचां। द्विगोरिति। स्त्रीशब्दाद्धितं द्विगोरित्यर्थः। आजलमिति। समाहारे द्विगुः। आन्म

हन्नः। पदाधिकारेत्वदं न स्यात् पिग्रहणान्महच्छब्दोन स्यात्। कथं नर्हि परममहत्परिमाणमिति। परममहतो द्रव्यस्य परिमाणमिति षष्ठी
तत्पुरुष इति हरदत्तः। यत्तु वर्द्धमानेनोक्तं इष्टकेषीकामालानामिति सूत्रे तदन्तविध्युपसंख्यानसामर्थ्यादुत्तरपदाधिकारे तदन्तविधिर्नास्ती
ति। तत्काश्यकैयटविरुद्धं। तथाहि। पदाधिकारे प्रयोजनं। इष्टकचितं। पक्वेष्टकचितमित्यादि भाष्ये उदाहृतं। कैयटेन च पदशब्देनोत्तरपदं गृह्यते चिन
इति व्याख्यातं। एतदेवार्थतः काशिकायामुपनिबद्धं। ननु इष्टकेषीकेत्यत्र सूत्रे तदन्तविधेरुपसंख्यानमस्ति। महतीशह्रस्वेतिस्यन्नुशाचोक्तं जाती
यपाशादौ नीशह्रस्यापात्त्वं वक्तव्यमिति। तत्र जातीयेति तावद्यर्थं। पुंवत्कर्मधारयेति आन्महत इति च सूत्राभ्यामेव रूपसिद्धेः। नीशह्रस्य
त्यपि अपाणिनीयत्वादुपेक्ष्यं। अष्टन इति। कपालेउत्तरपदे हविर्विषयाच्चेअष्टन आत्त्वं वक्तव्यमित्यर्थः। अष्टाकपाल इति। संस्कृतं भक्षा इ
त्यणः अथ ईषर्वे मित्तु गिरिव्याचरव्युत्तरमिरभसात्। द्विगोर्लुगनपत्य इति लुग् बोध्यः। गवि च युक्त इति। एतच्चैवार्तिकारूढं इत्युक्तं। यत्तिहर्व प भाष्य
दं महतिस्वरसिद्धये विस्पष्टोदरात्मनिगणत्वेश्वारणी वकुरुत्वं विंशतो उपलभ्यमानस्य नादृशास्वरस्य हेतुनिर्वाहात्। स्वरान्तरेपीष्टापत्तौ वा राम
न कामाभावादिति दिक्। एकादिः। अदुकि अकारोच्चारणसामर्थ्यात् सवर्णरूपेन। केचित्तु स्पष्टतार्थमादुकं दीर्घमिमाहुः। रात्राह्नाहाः पुंसि। पर १०३

त्वादिति। यत्तु शाचाएकवत्द्वावाक्लीवतेत्युक्तौ अहोरात्रमित्युदाहृतं तच्चेत्संबोधनमात्। यत्तु वदंति रात्राह्नाहानामेवानेन पुंस्त्वं विधीयते। तदंत
स्य तु परवल्लिंगमित्येव सिध्यति। अत एव भिन्नविषयत्वान्न विप्रतिषेधशंका। एवं च समाहारे स न पुंसकमित्येव भवति। परवल्लिंगापवा
दत्वादिति। तन्न। उक्तरीत्याह्वाहन्महादावपि क्लीवत्वं स्यात्। न चेष्टापत्तिः। प्राचापि द्व्यहस्त्र्यह इत्युदाहृतत्वाद् आकरविरोधाच्च। अमरोप्या
ह। न तु त्रिंशदहोरात्र इति। मासेन स्यादहोरात्र इति च। तस्मात्तदंतस्यैवायं पुंस्त्वविधिः। द्वंद्वतत्पुरुषयोरिति प्रकरणादिति स्थितं। संख्या
पूर्वमिति। तथा च लिंगानुशासनसूत्रं। अपथं पुण्याहेन पुंसके। संख्यापूर्वा रात्रिरिति। अमरोप्याह। रात्रेः प्राक्संख्यपाश्चितमिति। गण
रात्रं निशा बह्व्य इति च। पुंस्त्वाधिकारेपि स एवाहः रात्रान्ताः प्राक्संख्यका इति। एवं स्थिते द्विरात्रस्त्रिरात्र इति वृत्तिकारहरदत्तादिभिरुक्तं पुं
स्त्वं प्रामादिकमेवेत्यवधेयं। अर्द्धर्चाः पुंसि च। इह केचित् अर्थभेदेन व्यवस्था। तथा च शाश्वतः। मकरंदस्य मद्यस्य माक्षिकस्यापि वाचकः। प
ईर्चो द्विगुणे पान्यां तु न पुंसकयोर्मधुरिति। अमरस्तमाद्ये मधुन द्वयोरित्याह। पाद्यंनोनस्यनेति। स्त्रीत्वमिति विशेषः। सुदिनाहमिति। सुदि
नेत्राद्यः प्रशस्तपर्यायः। तथा च प्रयोगः। सुदिनासु समासु कार्यमेतत्स्वविविन्मीन विशेषतः स्वयंवेति। पथः। कृष्णं नहि विधातु रधोविपथः कं
दस्थाकापथसमाः इत्यमरः। व्यपथो विपथकापथा विनिरमसकोशाश्च। अत्रादुः। प्रमाद एवायमिति। वक्तव्यं तस्य प्रयोगनो विसस्मार चाद्य विपथ

न ह

निषा सेना नीति पथः। अकारांतो यं। तथा च त्रिकांडशेषः। वादः पथ्यम्‌ मार्गः स्यादिति। तेन समासे पुंस्त्वं। नैवं विपथ सिद्धावपि कापथो न
स्यात्। कोदेशस्य दुर्लभता दिति वाच्यं। ईषदर्थे चेति न संभवात्। कुत्सायाम् अर्थतः पर्यवसानात्। उद्दंतवध्ये। परवल्लिंगतापवादरूपता। नतु
रूप एवेदं प्रवर्तते नान्यत्र। विपथा नगरी। बहुव्रीहिरयं। पंथानमतिक्रांता तिपथा। इहापि नाह्निगुप्रासेत्यादिना परवल्लिंगतयोः प्रतिषेधा
थ दिति भावः। एवं च न्यायसाम्येन द्वाद्वेत्यत्रापि शत्राह्नाहाउत्तस्य प्रवृत्तिर्नेति भाष्ये वनोक्तप्रायं। पदुपचनी ति। क्रियाविशेषणत्वाद्वितीयांते।
धातूपात्तभावनापति हि फलांशः कर्मीभूतः। तथा च फलसामानाधिकरण्ये द्वितीया। अत एव सकलाविसादेः कारकपूर्वकता द्युणः। यत्र
ति तु भावनांशे करणत्वं यथा धात्वर्थविशेषो न्वेति तत्र विशेषणानां तृतीयांतता। ज्योतिष्टोमेन यजेतेति यथा। एतच्च करणे यजइतिसूत्रे तिप
दमंजर्याः स्पष्टं। नैवं ज्योतिष्टोमेन भक्तिपूर्वं यजेतेति न सिध्येदिति वाच्यं। भावनाविशेषणत्वेनानुपपत्तेः। तत्रापि संदर्शनप्रार्थनादिमिथ्यापि न
२ तात मानता क्रियायाः। हविर्मकर्मत्वविवक्षायां तद्विशेषणं द्वितीया। अन्यथा प्रथमैवेति विवेकः। सामान्ये नपुंसकमिति तु अनियतलिंगविषयकं।
तेन ओदियचनिशा नरादिरिति पुंस्त्वमेव। विशेषणरक्तो कोष्ठमेवोध्यः। पर्यायस्यैवेति। कथं तर्हि नृपतिसभामगमन्नैव यमानाइति। चक्रवधे। राम
गजपतिवत् राजविशेषता दिति रक्षितः। विभाषा सेना। श्वनिशामिति। हस्तचतुर्दशी ताकुः। तस्यां किल केचिद्धूतान् उपवसंति। तथा च निर्यगयि, १०४
०कारणे शावरभाष्ये मुनसप्तदशमासुपवसनः प्रथमइति॥ ॥इति तत्पुरुषः॥ ॥७॥

यस्य विकस्येति। यद्यपि प्राद्ययोगताद्यर्थे प्रथमयेत्युक्तं तथापि द्वितीयाश्रितादिभिरिति वत्स्य समाकेन विस्तृहसमस्यनइति नोक्तं
दुत्स्वर्थः। वार्तिककृता प्रथमयेत्युक्तावपि स्त्वतकृता नोक्तमिति वा। अन्यस्य पदस्येति। पदेन हि प्रकृत्यर्थोपसर्जनः प्रत्ययार्थो भिधी
यते। तथा च द्वितीयाद्यर्थे इति फलितं तदाह अप्रथमेति। समानेति। एतच्च शेषपदाहृत्वं। ग्राममित्यादि ग्रामकर्मकप्राप्तिकर्तृ उदके
विग्रहार्थः। उदककर्तृकप्राप्तिकर्मेति समासार्थः विग्रहे स इति प्रयोगे तु तस्याप्यप्रमेवार्थः। यद्यपि प्रकृतेत्यार्थस्यकर्तुर्धात्वर्थे प्रति
विशेष्यतेति तथापि व्यपेक्षावादिभिरगत्या समासे भिन्नेव व्युत्पत्तिः स्वीकार्या। किंच कर्तृविशिष्टप्राप्तेः परार्थत्वेन स्यैव नाभावेत्
योदकस्य न दमेदोवाच्यः सच बाधितः। न हि कर्तृविशिष्टप्राप्ति रूढकमिति संभवति। अपि च व्यस्ते समीचीनमुदकमिति वस्तमस्ते पि
उदकविशेषणत्वप्रयोगः प्रापः। स च बहुत्वस्य विशेषणयोगेनेतिवचनेनैव वारणीयः। सिद्धांते तु बहूनां वृत्तिधर्माणां वचनैरेव साधने।
थ स्यान्महदो रवें तस्मादेकार्थीभाव आस्थितः। चकारादिनिषेधो व्यकुसुत्वतिभंजनं। कर्तव्यं तेन्यायसिद्धे तस्माकं नदितिस्थितं। ऊढरथादि
अनडुत्कर्तृको वहनकर्मीभूतो रथः। रथकर्मको वहनकर्ता तु समासार्थः। रुद्रसंप्रदानको पहरणकर्मपशुः। पशुकर्मकोपहरणसं
प्रदानं। स्थाल्यवधिको दुरणकर्म ओदनः। ओदनकर्मको द्धरणावधिः स्थाली सादिरर्थः। कर्मार्थेना समासेनाभिहितत्वात्प्रथमा। प

श यमार्थेति। नारीसखेति। अनयोर्न समासः। अष्टतान्त इत्यत्र नाप्यर्थो व्यधिकरणमिति। अत्रापि पूर्ववदेव हेतुः। इत्यंशे पञ्चग्रहणफलमुपनिब ना
द्धं। नन्वेवमन्तरंगं इत्यादिप्रयोगे त्विरेव न स्फलं। एकसंज्ञाधिकारे ऐवत लिद्धिरिति भावः। अनेकं किं। बहूनामपि यथा स्यात्। तदुदाहरणं
तु मूल एव स्फुटी भविष्यति। एवं चात्र सुपि लिसेशानुवर्तनेन तु सुपेति। यत्तु सुसुपेत्यनुवर्तनिकं सुबन्तं सुपा सहेति व्याख्यानं तन्न।। द्विपद
अं बहुव्रीहावसिद्धिप्रसंगात्। प्रादिभ्य इति। प्रादिभ्यः परं यद्धातु तस्येत्यन्तस्य परान्तरेण सह समासो व्याख्येयः। सप्रसिद्ध्यर्थमिति प्रादीपयीचेति।
इदं तु वाचनिकं पूर्वपदान्तर्गतस्योत्तरपदस्य धातुजस्येति भावनलोपो वाच्यः। एतच्च प्रादीनामेव वक्तव्यो विशिष्टार्थरीति नामाश्रिस्य सुत्यजं।
स्त्रियाः पुंवत्। ऊङोऽभाव इति। यदि तु ऊङोऽन्योऽनूङिति पर्युदासः स्यात्तर्हि ईबाधितमेवस्याथेनन नः किमिति चेत्। ऊङविङोपस्यं जनपदशब्दा
त्क्षत्रियादञ् इत्येङविङः दरदोपसं। [illegible] नयोः स्त्रियामतश्चेति लुक्। इङविद्दरत्। सा चासौ वृन्दारिका च ऐङविडवृन्दारिका। दा
रदवृन्दारिकेति न सिध्येत्। नसत्तस्त्री प्रत्ययः कश्चिदस्तीति भावः। विषानन्नादित्येतत्स्वरूपं पूर्वत्रापि योज्यं। वैयधिकरण्येन स्वरसतो बहुव्रीहे
दुर्लभत्वात्। अलुगिति। इह भाषितपुंस्कमननन्तीति भाषितपुंस्कात्परतैः क्लिप्। एवं च समानाधिकरण एव बहुव्रीहिः। लुगर्थं च यलोपाप्रसक्ति राम
ति यद्यपि सुवचं तथापि शाब्दमतनुरोधेन क्लिष्टं व्याख्यानमिति स्वबधेयं। यथा श्रेति। एवं चकस्त्रेकेषां क्लिप्यन्नपावोऽनाकारः। हरदत्तादिर्थं १०५

अ

(पुंसिवाध कृशधार। स्त्रियाः च कप्रत्ययोरन्तात्पुर्वः)

यविरोधादिति भावः। तुल्ये इत्यादि। अयं भावः। भाषितः पुमान् यस्मिन्नर्थे तद्भाषितपुंस्कं प्रवृत्तिनिमित्तं तदस्या स्त्रीति अर्श आद्यच्। तेन
व न तुल्ये प्रवृत्तिनिमित्ते ऊङ् भाषितपुंस्कशब्दाः स्य लभ्यत इति। स्त्री चाके इति। एतेन स्त्रिया इत्यस्य स्त्रीप्रत्ययपरतां वारयति। तथा हि सति इत्यंश
त्रार्थः स्यात्। अनूङः स्त्रीप्रत्ययस्य पुंसीव पुंवदिति स्त्रियेत्यर्थः। यथा मरूस्वमिवंदस्मिन्नर्थो मेजल्लमिति ... अभावं बोतिदिश्यते न
इत्। नन्वयमेव वरार्थोस्तु यथोक्तं शाचाऊङ्पुंस्का स्वरस्यानूङः स्त्रीप्रत्ययस्य पुंवत्सा सुंवङा वास्त्री प्रत्ययलोप इत्येति चेन्मैवं। अ
स्यार्थस्याकरएव अनेकधा दूषितत्वात्। तथा हि। अस्मिन्पक्षे पटुभार्य इत्यत्रोत्तरपदे निमित्ताभावान्नोनिरतेः अचः परस्मिन्निति स्थानि
वत्त्वे सति यणस्यात्। किंच वनंडस्यापत्यं स्त्री वनेडी। वनंडा वेति यञ्। तस्य लुक् स्त्रियामिति स्मृपसेलुक् शार्ङ्गरवादित्वान्ङीन्। वनेडी
चासौ वृन्दारिका च वानेडवृन्दारिकेत्यादि भाषितपुंस्कं न सिध्येत्। किंच गार्गी चासौ वृन्दारिका च गार्गवृन्दारिकाः ऊङ्पिनिरतो पितत्रोरिति लुङ्
स्यादस्त्रियामिति निषेधात्। नस्याद्यथा करसेव यालं। लौकिकेति। यत्तु वित्राणं गवामयमिति मा नोसके विगृह्य तन्न तद्धि लौकिका लौकिके
भावः२ बहिर्भूततया उपेक्ष्यमिति। पतञ्चमासआन इत्यत्र प्रपंचितं। स्त्रिया असिति। अंतरंगान् पीति न्यायादिह पूर्वं सवर्णदीर्घो न प्रवर्तते। अन्यथा एका
देशस्य परादित्वेन सुपो लुक्। चित्रगुरित्येव अकारेण लभ्येतेति भावः। नेद मिति। इष्टसिद्ध्यनुरोधेन पूर्वपदं हरित्रियासिप्यतेन तु सर्वत्र तथा वो
तीष्यते। अत्र ऊनो निरस्तावलिमर्थगतस्य स्त्रीत्वस्याभिरतत्वात् स्त्रियामिति प्रवर्तते। अपि चैवं ऐडविडवृन्दारिके ×४

ज्ञः सहोभस्त इति सूत्रे हरदत्तेनैतस्य मेवोक्तमिति भावः। आनङिति। तथा च समर्थसूत्रे भाष्ये होतृपोतृनेष्टोद्गातार इत्यत्र चतुर्णां द्वंद्वेन
ती यस्य आनङुदाहृतः पूर्वपदार्थे पेतु समनसिध्येत्। न चात्र नेष्टा पूर्वपदं। नापि नदंतं। होतुरेव पूर्वपदत्वात् इति भावः। अत एवेति। पूर्वप
दानाक्षेपादेवेत्यर्थः। विनाजरदिति। न चेह द्वंद्वात्स्यकस्य पूर्वपदस्य पुंवद्भावोऽस्तु तथा च टाबपि निवर्त्तेतेति वाच्यं। द्वंद्वांतु गतियोः स्त्र्य
प्रत्ययप्रकृत्योः प्रत्येकं भाषितपुंस्कत्वेपि तदाहृतद्दस्यातेषा तानू तथा चेपट्ठी मूर्ध्वोभार्येयस्येति विग्रहे पट्ठी मृदुभार्य इत्युदाहर
ताभाष्यप्रकारेण सर्वमिदं ध्वनितमिति भावः। दृढभार्येति। पूर्वपदं तु गतिनं उत्तरपदमाश्रित्य प्रथमस्यापि पुंवद्भाव इति भावः। जरत्स्त्रियेति।
पूर्वकालैकेति सूत्रे जरत्शब्दस्य प्रथमानिर्दिष्टत्वादुपसर्जनत्वेऽपि तिलिंगविशिष्टपरिभाषया जरत्याः पूर्वनिपातः। कर्मधारयोत्तरेति।
एतेनाहृतस्य द्वावन्यमिति प्रयोगो व्याख्यातः। इह च षट्के बहूनां बहुव्रीहौ पूर्वपदं न पुंवदित्युक्तत्वात् रूपे विशेषवत्कः। अतिदिशया
वपि विशेषांतरं वक्ष्यति। यत्तु प्राचा नीलोज्वलवपुरित्युदाहृतं तत्र स्वरे विशेषो बोध्यः। तथा हि। बहुव्रीहौ नीलशब्दस्य प्रकृतिस्वरः। कर्मधार
यपूर्वपदे तु कर्मधारयस्यांतोदात्तः इति महान्भेदः। प्रमाणीयस्येति। करणार्थल्युडंतेनास्य समासः। शब्दो विशेष्यलिंगः। टिड्ढाणञिति ङीप्। राम
कथं न हि प्रमाणपांस्मृता विनिश्चायकं भाष्यं। भावे ल्युडंता त्वेकरो नीतिलिविपचाद्यजिदिटाप्। यद्वा। प्रमाणमिवाचरतीति आचारक्विबंता १०६

त्वचाद्यचूं। भवादृशः प्रमाणमयते यातिमूलभूतांश्च मिंयतः। क्विबेनाद्यनेनास्याप्रमाणस्मृतिरुच्यते इत्यादिग्रंथेन अयतेः क्विबंतस्ये
दं रूपमित्याहुः न चेह ह्रस्वत्वस्यापत्तिरिति तु वीरः आगमशास्त्रमनित्यमिति तु अगतिकगतिः। इह तु गत्यंतरमुक्तमेव। यदप्याहुः योऽयति
य तिलोपो हिवल्लादिप्रत्ययाश्रय इति। तदप्यापातनतः नच प्रत्ययग्रहणस्याप्रकृतत्वात् गोधेरः पचेनेद इत्याद्युदाहरणविरोधात् स्यात्प्रांतो
वत्। पत्तिगवित्तिनांस्त्व नेत्राद्याः यदद्यायक्रमेलोदाहरति। वृत्तीधिति। यद्यपि वृहदादिपुङीषो वैकल्पिकत्वात् तदभावे बहु इत्यादि सिध्य
तितथापि प्राचीका निष्टवारणायेदं। यत्तु प्राचा तत्र नत्सर्वनाम्नो वृत्तिमात्रे इत्यनेन गतार्थत्वादुपेक्षितं। दर्शनीयतरेति।
यत्तु प्राचा पटुतरा पटुतमेत्युदाहृतं तत्सामादिकं इति ध्वनयन्नाह। बहुरूपेति। बहुश्रेयसीति। प्रकारवचने थाल् न च हि किं सर्वनामबहुभ्य
ति इत्यधिकृतं। वृकभिति। वृकज्येष्ठाभ्यां तिल्तातिलौ च छंदसीति तिल्। अजथ्येति। अजाविभ्यां थ्यन्। शासीति। वृद्धत्वाथादिष्वपि
ष नासनसि लादिषु ईय इत्यर्थः। ततलोपेति। अत्र वदंति। जातिसंज्ञात्वमिति लिंग धर्ममात्रं गुण इति। एवं च क्रियाशब्दानामप्यनेन पुंव
द्भाव इति भावः। अत एव प्राचा तत्कोपाध्याय इति सूत्रे पाचिकानां। पाचिकात्वमित्युदाहृतं तत्सोत्रे ण च त्वतलोरिति प्रतिविश्लि व्याख्यानं तं
दित्तत्वं भाष्यादिविरोधादुपेक्ष्यं। तथाहि एकतद्धिते चेति सूत्रे एकताएकत्वमित्युदाहृत्य पुंवद्भावेन सिद्धमित्यारांक्य भगवानाह एकमेतनन्त्व

त्तलोपुंगुणवचनस्येति। अत्र कैयटः एकशब्दस्य संख्यावाचितायां गुणवचनत्वेप्यसहायार्थवृत्तेर्नोऽन्यथात्वादिति भावः। एवं हि वदता भु ३
क्तादय एवेह गुणा इति ध्वनितं। अतस्तथैवोदाहरति। भुक्तवंस्त्रुक्तेति। अत एव च प्रत्युदाहरति कल्याणीति। कल्याणीत्वमिति। तथा च स्त्रि
याभिति स्त्रैव्यापिनी। तास्त्वहृतेरिति कैयटेन प्रयुक्तं। तथा पुंयोगादिति सूत्रे स्त्रियाः संविधानात्वादिति तेनैव प्रयुक्तं। प्रगृह्यसंज्ञाप्रक
रणेपि विभक्तैरेव संज्ञित्वात्तादि तत्प्रकृतं। स्यादेतत्। गिरीशस्य मेनेशारदः कृतार्थतां। क्षावमानुपगता स्वतनुवेलं चूडता रहसि नर्दभुताभिः सा
टी५ मुमोच रतिं दुःखलेनां इत्यादिप्रयोगाणां का गतिरित्यत आह वारदइति। सामान्ये इति। तथा च पत्नीनियज्ञसंयोग इति सूत्रे पत्न्याः फलभुक्ति
गृहीतत्वादिति रतिर्ग्रंथयुगादायकर्तृत्वमात्रं विवक्षितं न तु स्त्रीत्वमिति ङीप्रत्ययत इति हरदत्तो व्याख्यत्। परः सन्निकर्ष इति सूत्रेप्येकेकव
र्णवर्तित्वोदाहरइति भाष्ये कैयटोप्येवमाह। एतेन नेष्टं पुरोहारवती त्वमासीदिति भाषो व्याख्यातः। रोहिणेयइति। रोहिनशब्दाद्धृणादिदाता
द्विति ङीप्प्रकारो पुंवद्भावे तु सति न स्यो नित्वेत्तो रोहितेयइत्यादि भावः। गृह्यतइति। व्याख्यानमेवात्र शरणं। वात्तुपर्याय इति। अत्र च
व्यन्तसपत्न इति निर्देशो लिंगं। रिपोर्वैरिसपत्नारिद्विषद्द्वेषणदुर्हृद इत्यमरः। विवाहनिबंधनमिति तज्जन्यसंस्कारविशेषेरूढमित्यर्थः। सा राम १०५ पानी
पत्न्यइति भाषितपुंस्कत्वात्पुंवद्भावे कृते यस्येति लोपः। एतच्च स्पष्टत्वात्तेनोक्तं स्पष्टं। यत्तु पारक्षणइति माधवेनोक्तं भावकर्मणोः पत्नेन लक्षणेन प

क्तिसापत्न्यं। अभाषितपुंस्कत्वात्पुंवद्भावो नेति। ननु द्वितीयं सपत्नीशब्दमाश्रित्येत्यस्य विरोधः। यत्तु नित्यं सपत्न्यादिष्वित्यत्र न्यासकृतोक्तं
समुदायोच्चारणं पुंवद्भावबाधनार्थमिति तन्न। समानस्य सभावोऽर्थद्वयेऽर्थे च निपातनाश्रयणेन समुदायोच्चारणस्य तावतैवोपपन्नत्वा
त्। अन्यथा संबुद्धिकस्वादीनामपि बाधापत्तेः। किं च नसित्यादिष्विति सूत्रे भाष्यकारेण सपत्नीशब्दाच्छिवादित्वादणि भस्याढे इति पुंवद्भावेन
सापत्न इति प्राप्यश्चिवादिषु केवलयौगिकस्य ग्रहणेन स्वाशयेन सापत्न इति प्रयोगो वाऽरितः। निपातनेस्य पुंवद्भावनिवृत्त्यर्थत्वे तु न त्वं वि
रुध्येतेति दिक्। भार्वत्वा इति। वावस्थायामेवाभत्वेपि पुंवद्भावो विधीयते। अन्यथा हि लनेइकादेशो भत्वात्पुंवद्भावे सन्निपातपरिभाषया कृ
द्वि देशो न स्यात् आनिषिद्धकवत्। भाष्यकारेणेति। अनेन सूत्रवार्तिकयोः सक्लिसंभवोपि ध्वनितः। उत्तरं हस्ते पूर्वस्याप्रवृत्तत्वात्। निष्कर्षे तु वैय
र्थ्यमस्पष्टमेवेति भावः। इष्टरूदाहरणमाह। सर्वमयइत्यादि। नामयडादीनां परिगणितत्वात्सिल्वादिबहिर्भावो नूनं सूत्रेण गणनार्थता अत ए
व सर्वतः सर्वत्रेत्यादिनोदाहृतं। सर्वकाम्यइति। न च स्त्रियाः पुंवदिति सूत्रेण गणनार्थता। न कोपधाया इति निषेधात्। न चास्यापि तेन निषे
धः। शोक्यः स्त्रियाः पुंवदित्यादिप्रकारेणोक्तस्यैव तेन निषेधात्। अस्याइष्टस्तु तस्मिन्प्रकरणे समाविष्टत्वात्। सर्वधीयइति। अप्रकरणी। प्रियादि त।
द्विति परत्वादस्याप्रावृत्त। पूर्वस्यातिरति घटकानेकभागमध्ये किंचिदपेक्षया पूर्वस्येत्यर्थः। अत एवेत्यादिनैरत्या द्वे परस्य न पुंवद्भावः। लिंगा

द्विति। अन्यथा एषा ह्य एतयोः कात्सर्वस्य आपि विधीयमानमित्वं निर्विषयं स्यादिति भावः। यत्तु प्राचोक्तं सर्वनाम्नः समासे पूर्वं पुंवद्
तिपच्च्या वस्तुः वार्त्तिकार्थमनुवदति सर्वनाम्न इत्यादिना। सर्वनामशब्देन संज्ञोपसर्जनभिन्नाः एवं गण पठिता उपलक्ष्यन्ते तेन सर्व
नामकार्यत्वं तस्याः पुत्रः सर्वपुत्रः अतिसर्वपुत्र इत्यत्र नातिप्रसंग इति तदेतत् सर्वमापातरमणीयं। तथा हि। समासे इत्यनाकारं वृत्ति
मात्रे इति भाष्यात्। मयडादौ तेऽव्याप्तं च। तथा च श्रीहर्षः प्राह। निजा मयोऽध्याम पिपावनीमयं भवन्मयो ध्यायति नाव नीपति रिति। किं
च। ब्राह्मणी पूर्वं इत्यादावतिव्याप्तिः न च जातेश्चेति निषेधः सोऽत्र प्राप्तिमात्र विषयकः स इति सिद्धान्तात्। रूपवती पूर्वं इत्यादौ जातिवाच
व्याप्ति कत्वाभावेनातिरादश्च। वार्त्तिकार्थमित्यत्र निस्तद्वीयः वार्त्तिकग्रंथे एतदभावात्। न चात्र विवक्षितव्यं। वक्तृ कस्तो रित्यस्य निरालंबनतापत्तेः
सर्वनामशब्देनस्याद्यपि न साधु। उक्तोदाहरणयोर्लक्षणं विनापि सुस्थत्वात्। दक्षिणपूर्वायै इत्यादावुपसर्जनतयाऽव्याप्त्यापत्तेश्च।
ननु मास्त्य ग्रहणसामर्थ्यात् सर्वनामता उपलक्षणं। न तु विशेषणं। तेन वृत्तेः प्राक् सर्वनाम्नः संप्रत्यसर्वनामत्वेऽपि पुंवद्भावो लभ्यत इत्या
केर स्थितं मयापि स्वग्रंथे उक्तमिति चेत्। न हि उपसर्जनभिन्नालक्ष्यं न इति लघु[?] स्पष्टत्वदुक्ते व परोहत इत्यत्र वधीयतां। नचैवमतिसर्वपु राम
ति त्रेऽव्याप्तिः। अतिसर्वशब्दस्य कदाप्यसर्वनामत्वेन तत्रातिव्याप्तेरुक्तिसंभवाभावात्। इत्यास्तां तावत्। स्वभिन्नामिति। यात्वात्मानमेव १०८

दर्शितो यांमन्यतेन तत्र स्त्रियाः पुंवदित्येव सिद्धं एकस्या एव रूपभेदेन कर्म[illegible]त्वकर्तृ[illegible]त्वयोः सत्त्वेपि वास्तवाभेदेन सामानाधिकरण्याभि
धानादिति भावः। माद्रिकायत इति। मद्रेषु भवा माद्रिका। मद्र वृष्योः कञ्। पाकाभार्येति। अर्भकवृषुक्पाकाद्वर्णेऽसी इति कप्रत्ययान्तो यं उणादिषु नि य
पातितः। न त्विह तद्धितः नापि वुः वयसि प्रथमे इति ङीप् वाधितां ऽजादित्वाटाप्। वृद्धिनिमित्तस्य। वृद्धिशब्देनेति किं। तावती भार्यास्य ताव
द्भार्यः। आ सर्वनाम्न इत्याकारविधौ वृद्धिशब्दो नास्ति। फलोपधानेति। निमित्तशब्दः फलोपहितपरः स्वरूपयोग्यपरत्वे तु वैयाकरणभार्यो
न सिध्येदिति भावः। अकेनेति। सह नञा विद्यमानमानं पूर्वस्य चेति ङीषभावः जातेश्च। जातेः परे इति। जातिवाचकात्परत्वमात्र निहितं विवृ
क्षितं न तु जातेरित्येवं विधानपर्यंत मोग्रहः। भाष्ये हास्तिकमित्युदाहरणे औपसंख्यानिकस्य नायं निषेध इत्युक्तेः नेन हस्तिनी भार्यइत्यादौ
ना तल्लक्षणस्यापि निषेधः सिध्यतीति भावः। यः प्रत्यय इति दावादिः। प्राचां तु विशिष्य ङीषे वोपात्तः। तन्निर्मूलं। शूद्राभार्य इत्यादावव्याप्ते
श्चेति भावः। ब्राह्मणीतिचार्दृ रवादित्वान्ङीन्न प्रत्युपाचाङ् पुंवदिति व्याख्याय ब्राह्मणीभार्य इत्युदाहृतं न परस्परविरोधात् उपेक्ष्यं।
सौत्रस्यैवेति। व्याख्यानमेवात्र कारणं। संख्यया। सामानाधिकरण्यस्यान्यपदार्थे वृत्तेश्च विरहाद्दृविशेणप्राप्तौ वचनं। उपदशा इति। उप
दशः समीपे समीपे वर्तते। आदौ ऽव्ययीभावः। द्वितीये तु बहुव्रीहिरिति विवेकः। स्वरूपतोऽवि निर्लुप्तषष्ठीकमित्याह। तिरादौ स्वरूपेति। अन्ये

षामपि दृश्यते। अत्र प्राचोक्तं दर्शियहणं कर्मण्यमिति हारबहुव्रीहौ पूर्वपदांतस्य दीर्घत्वमात्रं बोनवीति। तत्रात्वं चेत्यपाणिनीयं। अत एव
मुष्टामुष्टिवाहा शाहर्वी निउदाहरणमप्यप्रामाणिकमेव। भाष्यादिविसंवादात्। अत एव दर्शियहणं स्पष्टार्थमिति। सौर्यनकस्यमिति प्रामा
णिकः पंथाः। अर्वाचीनास्तु आत्वमाहुः। तथा चपंचिकायां त्रिलोचनदासेनोक्तं। नाम्येन पूर्वपदस्यात्वं दृश्यत इति। एवं च प्राचा केचिदिति व
क्तुमुचितं। पाणिनीयस्तु त्वाशयमध्ये निक्षेपस्तु नुचित एवेति दिक्। ओर्गुणः। नद्धितेकिं। पृद्धी। गुणेकिं। शिवि। यद्यपि ओरो दिति सूत्रे नेपि
भस्य तद्धिते इति संज्ञाद्वयं पूर्वकं तमस्त्वेव तथापि विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वको विधिरिति भावः। यद्यपि ओदिति न
परस्तत्कालस्य संज्ञेव। तथापीह तकारउच्चारणार्थः। ओरोदु सेव्यास्तु। स्वं रूपं शब्दस्येति तु प्रत्याख्यातमिति भावः। तेन सहेति तुल्ययोगे।
तुल्ययोगे किं सहेव दशभिः पुत्रैर्भारं वहति गर्दभी विद्यमानता वाचा सहशब्दः। दशसु पुत्रेषु विद्यमाने ष्वित्यर्थः। वोपसर्जनस्य। उपसर्जनस्ये वि
ति न सहस्य विशेषणं अव्यभिचारात्। किं तु तेर यदेन सन्निधापितस्य समासस्य। तच्चावयवद्वारकं। उपसर्जनसर्वावयवकस्य समास
स्य। बहुव्रीहिरिति यावत् व्यधिकरणे च षष्ठी। नदेतदाह। बहुव्रीहेरवयवस्येति। नेह न। सहकृत्वा। सहयुध्वा। प्रापिकमिति। सहशब्दः प्र राम
मापाः। उदश्वेरः सकर्मकादिस्तादिनिर्देशादिति भावः। स्वरे विशेषइति। उविसमिति चितइत्यंतोदात्तत्वं स्यात्। असमिति तु पूर्वपदप्रकृतिस्वर इ १०९

यत्तु व्याचख्युः स्वमासांतविधेरनित्यत्वात्तसन्नकृत इति। तदापाततः। एवं हि षजविनं भविष्यतीति प्रत्युदाहरणस्यासंगतिप्रसंगात्। २ तथैव ३

त्यर्थः। संख्यायाइति। संख्यांतस्य तत्पुरुषस्य अंतावयवो ङ ज्वाय इत्यर्थः। एकविंशतिमित्यादौ तु न। अन्यत्राधिकलोपात् इति वार्तिकका
रोक्तेः। स्थूलाक्षेति। यत्तु माधावनस्कंदाह तेस्थूलाक्षिरिक्षुरितिनच्च। अक्ष्णो दर्शनादित्यच्च प्रसंगात्। नेतुर्नक्षत्रइति। नक्षत्रे यो नेतृशब्द
स्तदंताद्बहुव्रीहेरित्यर्थः। नेतानायकः। ननु स्थूलपूर्वादिति। स्थूलपूर्वाद्बहुव्रीहेरेवेत्यर्थः। उरःप्रभृतिभ्यः कप्। नासिकायाइत्यपेक्ष्यते।
केवलादेवावचनं प्रत्ययनिरस्त्यर्थं। उपसर्गाच्च। उपसर्गयहणं प्रादीनामुपलक्षणं। नासिकाशब्दस्याकिंसार्थत्वेन तं प्रत्युपसर्गतायोगात्
तदाह प्रादेरिति। नकुनेति। प्रणं नय प्रतरं व स्यो अर्छं प्रनः प्रशाइत्यादावव्याप्त्यतिव्याप्तिप्रसंगात्। शोभनं प्रातरस्येति। प्रातःशब्दे न प्रात
स्तनं कर्म लक्ष्यते। अन्यथा प्रातःशब्दस्याधिकरणप्रधानतया सामानाधिकरण्या संभवात् इत्याहुः। णपदादिषु त्रिषु निपातनात्स्फाः। य
मादिति केवलात्। इह बहुव्रीहिणा पूर्वपदमाक्षिप्यत इत्यनुपदमेव वक्ष्यति। न च केवलादित्यनेन विशेष्यत इत्याह। केवलादिति। यत्तु प्रा
चा केवलादित्यनयविशेषणतया व्याख्यातं। तस्रोत्रेण च केवलादिति धर्मशब्दस्य पूर्वपदस्य च विशेषणमित्युक्तं। पाणिनीयमतदर्पणे च
केवलादिति कैवल्यं धर्मशब्दपदयोर्मतमित्युक्तं। नत्सर्वमापाततः। धर्मपदविशेषणे प्रयोजनाभावात्। धर्मशब्दोत्तरपदो तु रपदं तद्याह तिः
फलमिति चेन्न। तत्र धर्मपदस्य बहुव्रीह्यवयवत्वेन पूर्वपदात्परत्वस्याभावात्। त्रिपदे बहुव्रीहाविति। इह सर्वनाम्न संख्ययोरुप संख्यानमिति

खत्राङ्गस्य स्वत्वं निपातो न भवति। आहिताग्न्यादेराकृतिगणत्वादिति हरदत्तमाधवौ। आपदि स्थितमिति। ननु नन एवं केवलग्रहणं व्यर्थं।
पूर्वपदशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यमपदव्यावृत्तिसंभवात् उत्तिष्ठेत्तमेवं। पूर्वपदाक्षेपेणास्य यथा हकत्वेनैव केवलपदस्य
सार्थकत्वात्। कर्मधारयेति। यत्त्वाहुः। साध्यो धर्मोऽस्येति साध्यधर्मा। संदिग्धश्चासौ साध्यधर्मा चेति विग्रहः। स च संदेहः साध्यधर्मद्वारक एव पर्यव
स्यतीति। सोऽयं रथाक्षेशः। उत्तरीत्यैव साध्यस्य साक्षात्संदिग्धत्वलाभात्। ननु कर्मधारयपूर्वपदत्वेऽपि चूडुर्लभः। केवलादित्यस्य समासा
नात्मकादित्यर्थ इति चेत्। मैवं। तदुपेक्षितार्थस्याकरग्रंथानारूढत्वात्। अस्मदुक्तार्थस्य त्वभ्यादिगणे धर्मधारणेऽभिधानान्माधवग्रंथे स्पष्टः।
इति निवृत्तिधर्माहिंस्रानीभवतीति प्राचां प्रयोगोऽपि अस्माकमेवानुकूलं दिक्। दंतेवेति। तथा च हर्षचरिते इमे जंभ स्तुतं दिवेति। दक्षिणेर्मा। लुब्धो व्या
व्या धः। अत एवाहर्द्धमेति। कवयस्तु हिंसामात्रे प्रयुंजते। वाली हेमाक्षमोली गुणनिधिरिगुणनिमितो दक्षिणेर्मेति यथा। केशाकेशीति। नत्रेतेन
प्रकरण तिबहुव्रीहिः तेन हि ग्रहणं युद्धानीव कर्मव्यतिहारोऽपीति शेषालुप्यते। द्व[redacted]स्य यस्य तिष्ठद्गुप्रभृतिषु पाठाच्च दंतस्याव्ययीभावत्वं। नन्वेवं अव्य श्र
यीभावसंज्ञया बहुव्रीहिसंज्ञया बाधात् समासस्वरेणैवांतोदात्तत्वं सिद्धं न तिष्ठिति चत्वारेण। अत्राहुः। विशेषणार्थं तत्। तिष्ठद्गुप्रभृतिष्विकार राम
मात्रपावे हि सुगंधिरित्यादावतिव्याप्तिः स्यात्। यद्वा दंडादंडी स्यादौ संज्ञयोः समावेश एव। उपजीव्यविरोधस्यान्याय्यत्वात्। एवं च स्वरार्थमपि चिन्तं। ११०

ल४

दिदंडीति। द्विदंडि आत्मैशोत्यत्र इच्चुन्। समुदायनिपातनस्य विषयविशेषपरिग्रहार्थत्वात्। उभाहस्तीति। निपातनादेवार्थं चेवि
नापि प्रयोगः। उभ हस्तीति पक्षेऽयं चूः। उभयाहस्त्याभरं। प्रसंभ्यां। जानुशब्दस्येकृतेऽपि अर्थगतमनुपपदमिति बंधनं वादित्समाधिंत्यजा
नुनो ऽशिति द्विवचननिर्देशः। नस्कलंतु स्कानषष्ठी त्वस्फुटीकरणं। जानुनइ स्फलत्केकिं पंचमीयं प्रसंयाधिकाराच्च नुरपि प्रसपइतिसंभा
व्यते। नेदनत्वधनपन्याहा। नुरादेशाइति। छंदसि नु स्वतंत्रोपिदवपने। उपज्ञुवाधोनमसासदेम। धनुषश्च। धनुरंतस्येतिधनुरंतादिति
नु प्रमादः। अथ कथं स्व लावण्याशोसाधृतेधनुषमाक्षायन्नत्एवदिति पुष्पदंतः। समासांतविधेरनित्यत्वात् अनित्यत्वे प्रमाणं तु अंभा
दिगणे राजन्शब्दस्यपाठः। सहि प्रनेरंभादयस्तत्पुरुषेउत्पत्ता दात्तनार्थः राजाहः सखिभ्यष्टचो नित्यत्वे तु किं तेनेति दिक्। आविभागे गुड़ागधम्म॥ः
नेति। एवं च गुणवाचिन एवेह ग्रहणं न तु द्रव्यवाचिन इति फलितोऽर्थः। इत्याणीति। अस्ति च गंधशब्दो द्रव्यवचनः वहतिजलमियं पिनष्टि गं
धानितिय पिप्रयुज्यते स्वमोविवित्रोः इतिदर्शनात्। गंधस्तु सौरभेन स्येगंधकेगर्वलेशयोः। स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इति के
शाच्च। एतेन महीभृतः पुष्पसुगंधिराददे भग्नवालसहकारसुगंधोऽद्वत्यादिव्याख्यातं। एतच्च सर्वं हरदत्तग्रंथे स्पष्टं। केचित्तु नेदं कांतशा
हनस्वाभाविकत्वं विवक्षित्वा आगंतुकस्यनेत्याहुः। तथा च माघः। आघ्रायि वांतोगधवहः सुगंधः इति। व्याख्यातं च जयमंगलायां। गंधस्य

उत्सृतिसुसुरभिभ्य इती कारः समासांतो न। गंधस्येत्वे तदेकांतग्रहणमिति वचनात्सुगंध आपणिक इति पथेति अत एव भ्रमद्वा
ल सहकारस्सुगंधाविलासादीनां माघादिकं तदुर्घट इति हलनोक्तं अल्पाख्यायां समासवक्तव्य इत्यधिकरणपदे बहुव्रीहिः अत एव ज्ञापकात्
यह्यास्तेपोगंधोस्मिन्निति सेव विग्रहः। गंधशब्दस्य विशेषणत्वेपि अस्मादेव ज्ञापकात्स्वरनिपातः। इति विश्वइति। एतेनाल्पपर्यायोयं गंधशब्द
इति प्राचोक्तं थो व्याख्यातः। अल्पाख्यायामिति सूत्रस्यापीहैव स्वरसः। यत्तु वदंति गंधशब्दोत्र लक्षणयाल्पत्वं गमयतीति तन्न क्लिष्टं
क्रियाहकस्योक्तत्वात्। पादस्य लोपः। यं लोपः समासांतो न स्यात् दादेः परस्य सादेः स्यात् तेः षिक्तः कृच्छ्र प्रसज्येत समासांतापेक्षस्य
अयणान्ते अत आह अयं समासांत इति कथं पुनरभावो भावस्यावयवः स्यात् तत्राह हस्त्यादिहारेणेति। औपचारिकमवयवत्वं वचनबला
दिति भावः। वयसि। कथं तर्हि सादस्य रोपात्सुदती स समजेति। न स्यात्रवयो गम्यतेऽतः सुदती निभाव्यं। अग्रांतः। शोभना दंता अस्याः समका
जातान तु न्यूना इति कथं विदिहा विवयो गम्यत एवेति। उरः प्रभृतिभ्यः कप्। लक्ष्मीशिति न घृतश्चेति सिद्धे नियमार्थमिह पाठः। एकवचनां
तस्यैव नित्यो यथा स्यात् अन्यत्र शेषाद्विति विकल्प एव तेन अलक्ष्मीकमलक्ष्मीश्चेतसा शोसितं स इति सिद्धं। अलक्ष्याल्लक्ष्म्या यस्येति विग्र राम ११२
हः। यत्तु प्राचोक्तं न घृतश्चेति कप्। बहुलक्ष्मीक इति सामादिकमिति व्याख्यानांतरं। नियमशास्त्रस्य निषेधमुखेन प्रवृत्तिरिति पक्षमाश्रित्य

वा योज्यं। अनर्चकीति नापीति। कथं तर्हि सुपक्षी नगरीति प्राचामुदाहरणं स्वयमप्युक्तं कथं पोदुवरितात्। न च नस्तुन्नादिति निषेधः।
पचः प्राचीनानामेव स इति वक्ष्यमाणत्वात्। सत्यं समासांतविधिरनित्य इति कथंचित्समाधेयं। सुपथीति सुपथो रनाकस्तंत्रीभाष्या
द्विसकृकं। नंद्यादिनेति। एतच्च प्रक्रमते स्वरस्वादि यथानो बहुव्रीहि प्रकरणे कृतभावार्थमिति पुनः पुनः भाष्यकारोक्तेः पर्यालोचनया
लभ्यते। यत्तु वदंति। प्रतिपदोक्ताः समासांताः स्वविषये बाधकाभवेतीति न। किं अनुक्तसमासांतपरेण शेषग्रहणेनेति। तन्न। कस्तू
रिसादाना समासांतेरवितार्थन यथा परेण कपा बाधापत्तेः। बहुनाडिरिति। उपसर्जनह्रस्वः। सप्तमीविशेषणे। कंठेकाल इति। यद्यपि कंठेकिं
विद्वत्तौ नि निमित्तिकाल इति विशेषणं नदेदं बोध्यं। अन्यदा तु सप्तमीग्रहणं विनापि विशेषणत्वादेव सिद्धं। चित्रगुरिति। यद्यपीह उपस
र्जनं पूर्वमिति सिद्धं तथापि बहुव्रीहौ सप्तम्यंतके न तत्कौडिन्यन्यायेन उपसर्जनपूर्वत्वं बाध्येत। अतो विशेषणग्रहणं। सर्वनामेति। कथं
तर्हि नः परोयस्मात्स [redacted] नपर इति। कथं च जहत्स्वार्थ चमिरिति इह हि जहत्स्वं परं यं सं जहत्स्वः सोथेयि त्वेति बहुव्रीहिगर्भे बहुव्रीहिः। न
थान्नस्य परशाहुयोः सर्वनामत्वात्पूर्वनिपाते न भाव्यं सत्यं। सत्वभाष्यादिप्रयोगाज्ज दंतादिस्तादासिद्धं। सारंगजग्धीति। अस्तांगहर्षपदा
देति ङीष्। कथं वारस्मितमिति। नपुंसके भावे क्त इत्यस्य पत्तत्पूर्वनिपातः। निष्ठाद्वाहेन विहितस्यैव हयहरणादिस्ताहुः॥ ॥इति बहुव्रीहिः॥ ११

चार्थे द्वन्द्वः ॥ चार्थ इति । चशब्दद्योत्य इत्यर्थः । असामर्थ्यादिति । एकार्थीभावाभावादित्यर्थः । तथाहि । बहुव्रीहि घटकपदानां कर्मधारये न भे-
देनैव द्वन्द्वघटकपदानां चार्थे तु भविष्यति एकार्थीभावआवश्यकः समर्थः पदविधिरिति परिभाषितत्वात् चार्थे द्वन्द्व इत्यत्र केचित् । न चैकवाक्यि-
विषयाणां समप्रधानानां परस्परं विहाय इतरान्वयः संभवति । येन समुच्चयान्वाचययोः स्यात् । किं तु मिलितानामेवान्वयो वाच्यः । मिलनं
च समुदायः स च वर्त्तिपदार्थश्रुति विशेषणं विशेष्यं वेति द्वैधं । तत्राद्ये इतरेतरयोगद्वन्द्वः । द्वितीये समाहारद्वन्द्वः । उभयथापि समुदायस्य द्व-
न्द्वेनोक्तत्वात् चशब्दाप्रयोगः । न चैवं नीलोत्पलमित्यादावपि चशब्दो न भवेद्विग्रहदर्शनादेकार्थीभावसत्त्वे तद्द्वन्द्वो दुर्वार इति वाच्यं । सामा-
नाधिकरण्यविशेषवि[illegible]हितत्वात् विशेषणं विशेष्येणेति तत्पुरुषसंज्ञया द्वन्द्वसंज्ञाया बाधात् । यत्तु केचित् कर्मधारयसंज्ञया बाध इत्या-
हुस्तन्न तुच्छं । तस्याः एकसंज्ञाधिकारबहिर्भूतत्वात् संज्ञानां च कृत्यप्रत्ययादिषु समावेशस्य प्रसिद्धत्वान्नाप्यप्रत्ययः । सामानाधिकरण्या ५४
विवक्षायां तु द्वन्द्व इष्ट एवेति दिक् । होतापोतारौ इति । अनयोः सत्यपि द्वन्द्वे परस्याभावादानङ् । अजाद्यदन्तं । कथं तर्हि ... विशेष-
णालिनी । लोचनाधरकृताहतरागेति भारविः । अत्राहुः । अनित्यमिदं प्रकरणं समुद्राभ्राद्घ इत्यादिनिर्देशात् । द्वन्द्वश्च प्राणितूर्यसमाहार राम
एवेति । विपरीतस्तु नियमो न भवति समाहारेऽप्यपगुरादीनामेवेति । तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणात् । न द्विसमो द्वारेकवच- ११३

न नस्य मा भूदिति कृतं । तिष्यपुनर्वस्विति यथा । उदगातामिति । इह यदा कृत्तिकालापेक्षया उदितेषु प्रतिष्ठितेषु चावाभ्यां नक्षत्राभ्यां नक्षत्रेणान्यानि ति-
संवादकृतानि च विस्तरस्तु कौस्तुभे स्तेनं प्रसीदतु यते । कर्कं धीमधीयते कठाः । वेशंपायनान्तेवासिनो लिनिः । कठचरकाल्लुक् । अध्येतृ
हृ कृते काल्लुक् । कलापिनोऽण् । सब्रह्मचारी साधुपसंख्यानात् [illegible] लोपः । अध्वर्युशब्दो यजुर्वेदे लक्ष्यते तेन दाह्यजुरिति । पदान्यधीते पदकः । क्र-
मादिभ्यो वुन् । एवं क्रमकः । पदान्यधीते क्रमोऽध्येतव्य इति सम्प्रदायस्याविच्छित्तिः । अध्ययनतः किं विनाशुनौ । अविप्रकृष्टेति किं । याज्ञिकवैयाकरणौ । हे
जातिरप्राणिनां । कथं तर्हि हिंसिता नुपिविधास्त्वरुरोला इति भारविः तरुसहिताः रोला इत्याख्येयं । विशिष्टलिङ्गो नदी । सूत्रे च तारो
पिशाच अवयवधर्मेण व्यपदिशि [illegible] द्वन्द्वे बोध्याः । नदीग्रहणं च देशानां । जनपदो हि देशः । अत एव पर्वतानां नु केलासश्च गन्धमादनं च केला-
सगन्धमादने । चकारेणाप्यते इति । चकारेऽनुवर्त्तते विधानार्थ इति भावः । गवाश्वादिति येषु किंचन्न सन्नाशुध्यते कां स्यामित्यादिसूत्रकृत्संस्कारेणापि प्र-
वेन स्तुष्यति ते पात्रमित्यर्थः । अनिरवसितानामिति निषेधबलादेव शूद्रा इति वर्णिकितपरः । न तु शूद्र इत्यमा तिपरः । गवाश्वमिति । इह पशुद्व-
न्द्वे विभाषा प्राप्ता । दासीदासमिति । अत्र पुमान् स्त्रियेत्येकशेषो बाध्यते । अत एवार्ति किं गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्वरूपमिति गणपाठस्य-
पमेयांविरक्षितं । न तु प्रकृतिरपदनिर्देशमात्रेण स्वपरिस्यर्शस्तिनावउनादेशाभावपक्षेन भवति । अपशवो वा अन्ये गोअश्वेभ्यः । पशवो गोअ-

श्वाः। पशुग्रहणमिति। विकल्पार्थमित्यनुषज्यते। नपुंसकत्वार्थमिति। अयं भावः पशुद्वंद्व इत्येव सिद्धे अश्ववडवग्रहणं प्रतिपदविधाना
र्थं। तेनाश्ववडवमित्येकवद्भावपक्षे पूर्ववदश्ववडवावित्यनेन द्वाभिलासन्नपुंसकमित्येन देव भवति। न छेदेन हि एकवद्भावभाजं परामृश्य
विधीयमानं नपुंसकत्वं एकवद्भाववदेवशतिपदविहितं भवतीति। अन्यथेति। न च पूर्ववदश्ववडवावित्यस्य निरवकाशत्वं शंक्यं एकवद्भाव
विरहपक्षे सावकाशत्वात्। विप्रतिषिद्धं चानधिकरणवाचीति। विप्रतिषिद्धग्रहणाभावे तु सन्न स्यात्। अद्रव्यवाचिनामेवेति नियमादिति भावः। यत्कुर,
तिष्ठतां कोमक्रोधाविति प्रत्युदाहरणं नवा। तत्रापि शीतोष्णं सुखदुःखमित्यादावविवक्षितकस्यैकवद्भावस्य दुर्वारत्वात्। नियमार्थं हि द्वंद्वमिति
स्थितं। न चाद्रव्यवाचिनां वेद्द्वन्नित हि विप्रतिषिद्धानामेवेति न दोषः कल्प्यः। शीतोष्णे उदके इत्यत्र पाक्षिकैकवद्भावापत्तेः। नेवेष्टापत्तिः। अ
नधिकरणवाचीति किं। शीतोष्णे उदके इति। शीतोष्णयोः सहाविरोधापत्तेरिति दिक्। दधिपयसी इति। व्यंजनत्वादिकल्पः प्राप्तः। अधिकरणैतावत्वे
च। समासार्थस्याधिकरणस्याश्रयेणैतावत्त्वे विवक्षिते परिमाणानियमः तस्मिन् गम्यमाने इति व्याख्यातं इत्येकं स्यादिति। अत्र व्याचख्युः समाहा
रद्वंद्वस्यैवायं निषेधो न तु नियमस्य तथा हि सति नियमे प्रतिषिद्धेपि चार्थे द्वंद्व इति समाहारे द्वंद्वः स्यादिति। तन्नेति ध्वनयन्नाह। नियमो न स्या राम
८१ दिति। अयं भावः। प्राचां पक्षे दंतोष्ठावितृदाहरणमेव न सिध्येत्। प्राप्तएवं गानां समाहार एवेत्यनेनेतरेतरयोगद्वंद्वस्य निषिद्धत्वात्। ननु समा ११२

हारद्वंद्वोपि प्रकृतसूत्रेण निषिद्ध इति चेन्न। न हि सावकाशमेव स्यात्। द्वंद्वद्वयस्यापि निषेधात्। एवं च पंचखट्वीहास्ताद्विकरेषु भिख्याभिः साधुनामा
धुकरी सहस्रेत्यादीनां साधुत्वं स्यात्। किं च समाहारद्वंद्वनिषेधो व्यर्थः न्यायवल्लेनेव नद्वारणात्। तथा हि। वर्त्तिपदार्थस्य संख्याविशेषबो
धनाय समाहारद्वंद्वस्य प्राप्तिरेव नास्ति सविशेषणानां वृत्तिर्नेति वचनात्सापेक्षत्वेनासामर्थ्याद्वा। कथं तर्हि दिशा पंचपट्ट्य इति समाहारे द्विगु
रिति चेत् प्रधानभूते समाहारे संख्यान्वयाद्विगृह्णात्। न चोक्तन्यायेनेतरेतरयोगद्वंद्वोपि न स्यादिति वाच्यं तत्र प्रधानस्य सापेक्षत्वात्। उक्तं
व्य० ५ हि भाष्ये। भवति वै प्रधानस्य सापेक्षस्य वृत्तिरिति। न्यायेनेतन्। प्रधानस्यैकदेशत्वाभावात्। सामान्याप्रयोगे इति लिंगादिति दिक्। विभाषा स
मीपे। यद्यपीह समाहारद्वंद्वो वेति व्याख्यानेपि न क्षतिस्तथापि प्रक्रममनुरुध्याह। नियमो वा स्यादिति। उपदशा इति। एकवद्भावपक्षेऽव्ययीभा
वस्यैवानुप्रयोगः। यदि तु बहुव्रीहेस्तदा उपदशाः स्यत्पाणिपादस्येति वक्ष्यात्। उपदशां पाणिपादस्येत्येवं वेष्यने इत्याकारः॥ आनङ् ऋतो द्वंद्वे। इह
नरपदेन पूर्वपदं नाक्षिप्यते तेन मध्यमस्यानङ्। न दाहहोतृपोतृनेष्टोद्गातार इति। पुनश्च समर्थसूत्रे भाष्यकैयटयोः स्पष्टं। ओजः सहोंभस्तम
सस्तृतीयाया इति सप्तदंतजयंतु इत्यन्तरं। यत्तु प्राचोक्तं पूर्वपदस्यानङ् स्यादिति। यच्च व्याख्यातमभिदं द्वंद्वपूर्वपदकार्यविशेषणमाहस्वेनेति। मत्वा
भिहितेनोत्तरपदेन पूर्वपदमाक्षिप्यते इति स्फुटं नेत्सर्वमाकारविरोधादुपेक्ष्यं। प्रसिद्धसाहचर्यस्येति। द्वंद्वे रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्र

प्रयोगाभिव्यक्तिरिति सूत्रे ऽभिव्यक्तिग्रहणेनास्तं नेतसहचरितमुगले द्वंद्व इति निपातनादिभावः। द्वंद्वं रहस्ये:। देवताद्वंद्वइति। काशिकानुरोधेना
नुवर्तितं। आश्वलायनसूक्ते ज्योतिर्लिंतयोरे देवताद्वंद्वे पि प्रयुक्ते ऽग्नीषोमीयप्रयोगे ष्वामीति। अग्निवृद्धिरिति अग्निः स्तूयते ऽस्मिन्सूक्ते तु विशेषः संप्र
दादिस्तादधिकरणे क्तिः। स्तंभमाभूदिति। अकारे सन्निसकारस्यश्रवणं भवतिनेन प्रयोगे विकाराभावो नुमीयत इति भावः। विसर्गमिति। नया
चक्रे विहिकारो नेत्येवं शास्तुमेवं लक्ष्यानुरोधादिति भावः। मातरपितरौ। मातृशब्दस्यारङादेशो निपात्यते। वाकृत्वं चेति। बहूनां द्वंद्वे तु वाकृत्व
कृत्वचे। द्वंद्वग्रहणे द्वंद्वेन तु वाकृत्वमनुवर्तते॥ ॥ इति द्वंद्वः॥ ॥ विरूपाणामपीति। एतच्च सूत्रं श्वव्रैरेवसुलभं रूपमनेन तु निवृत्तस्तासौ च त्यरूपेणाहूस्या
र्थेपरतथापिव्याख्यानात्। वृद्धोयूनेति। अपत्यमंतर्हितं वृद्धमिति पूर्वाचार्यैः परिभाषितस्येह ग्रहणं युनातृतिमेलसाहचर्याच्चेदाह गोत्रंशिष्यत
इति। भागवित्तीति। भागवित्तिशाह्लादंगोत्रार्थकादिनंता यूनि वृद्धाद्दत्तो वा रेत्युवद्वृलमिति कुत्सायां ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते
न तु सुवतमात्रकृतं वैरूप्यं। गार्ग्यवात्स्यायनाविति। इह प्रकृत्यंशो वैरूप्येन गोत्रादित्वं तुं च क्वापप्रयुक्तं चेल्लक्षणंपस्पष्टं कर्तु द्विवचनां तेन नि
वि ग्रहमाह। गार्ग्यायणस्येतिवि: पुमान्स्त्रिया। ननु हंसश्च वरटा च हंसौ त्वत्रापि प्रसंगः हंसत्वजातिसाम्ये पि शब्द वैलक्षण्यपस्पष्टं। तु पुंस्त्वमात्रप्रयुक्तता रास
दिति चेन्नैवं सरूपग्रहणानुवृत्तेः अनुवृत्तौ तापवं तु भ्रातृपुत्राविति सूत्रे। नन्वेवमपि गोरियं गो श्रायं तयोः सहोक्तौ एतोगावावितिनियमनो ११४

न स्यात्स्वलक्षणविशेषाभावादिति चेन्नैवं। न हि तरकृतविशेषविरहरूपे विशिष्टाभावेनास्य प्रवृत्तिं चेह विशेष्याभावादस्त्येव। इंद्रेंद्राण्याविता
दौ तु नैकशेषः पुंयोगकृतविशेषात्। पिता माता। श्वशुरः श्वश्रूः। नन्वेतेन सूत्रद्वयं व्यर्थं तथा हि यः शिष्यते स लुप्यमानार्थाभिधायीतिन्यायेनाभि
न्निषये पितृत्वादेरेवमातरमपि वक्ति श्वशुरशब्दश्च श्वश्रूं। न च शक्तिरेव नियतरूढलक्षणावेत्स्यन्यादेन तु। न चास्य सूत्रं विनापि सुलभं। न च पूर्वसूत्रे न स
मूहवत्तद्दमपि सैन्यद्वयं द्वंद्वनिवृत्त्यर्थमिति वाच्यं इह द्वंद्वस्यापि पक्षे इष्टत्वादिति चेन्न। मैवं। पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः शक्तिवि
षये केवलयोः प्रयोगं वारयितुं सूत्रारंभात्। अनभिधानमाश्रित्य प्रत्याख्यानं तु दुर्ब[illegible]मिति दिक्। त्यदादीनि सर्वैः। सर्वैः किं। पत्यासत्या ल
त्यदादिभिरेव सहोक्तावित्यर्थमित्यन्वयः। त्यदरमिति वाह पूर्वविप्रतिषेधादिति भावः। त्यदादितइति। आदितात्तसिः। त्यदादीनां शेषे स धा
ह विवक्षिते तु यः पुमान् यच्च नपुंसकं तद्द्वयोर्न लिंगप्रतिपादकानि भवंति। अर्थात्त्यदादीन्येव। अद्वंद्वेति। द्वंद्वादिविशेषणं नामा[illegible]कं गु
च किं तु विशेष्यनिघ्नं नैवेतिभावः। तदेवेति पिप्पल्याः अर्थमित्यर्थः। साचेति अर्थपिप्पलीत्यर्थः। इहसर्वं चेति। एतेन कृतं द्वंद्वानामेकशेषद्
नि भ्रमं व्यावर्तयति। ननु तथैव किं न स्यादिति चेन्न। एकशेषस्यानंरंगत्वात्। न च द्वंद्वं दुरग्रहमात्रं। किंतु फलेपि विशेषोस्त्यासाहतेनेति। पक्ष
द्वंद्वापवादएकशेष इति केचित्। तदुपेक्षं नापवादशास्त्रं बाधकमात्रं प्रवर्तयेत्यानेयः। इको गुणवृद्धी इति सूत्रे न कैयटस्वदपवादो वेस्तत्रप्रष्टा॥ ॥

इत्येकशेषः। प्रसंगादाह। परार्थेति। अभिधानमिति करणे ल्युट्। अनेनेन दर्शयति। न केवलं यथाक्रमं समर्थाप्यवयवशक्त्या सर्वत्र निर्वाहः। किं
श्री तु विशि ष्टविषयकं शक्त्यंतरमेव स्वीकर्तव्यम्। अत एव वृत्तौ विशेषणस्य पदार्थैकदेशत्वान्न विशेषणसंबंधः। ऋद्धस्य राजपुरुषस्याप्रयोगः॥
बहुव्रीहौ यज्ञादेः वाक्ये तु सर्वमिदं न भवत्येवेति वैलक्षण्यं। किंच। अवयवशक्त्यैव निर्वाह इत्याग्रहे मीमांसकानां बहुव्रीहेरन्यपदार्थे शक्ति
र्न सिध्येत्। योगरूढिश्च तत्र हादीनां दुर्लभा स्यात्। क्रमशः शक्त्यनुसारेण निरूढलक्षणयैवेति निर्वाहान्न चेष्टापत्तिः। अपसिद्धांतादिति भावः।
अविग्रह इति। लौकिकविग्रहरहित इत्यर्थः। अस्वपदेति। समस्यमानपदावयवघटितविग्रह इत्यर्थः। कृष्णश्रित इति। इह कृष्णस्य पदविधौ
कष्टश्रु अजस्र इति समस्तानुवादे सामर्थ्यात् प्रथमातुनासमासः आक्षिप्यते नैव वा निपात्यते। इति हरदत्तादिग्रंथस्पष्टं। नित्यं तर्थक्रं नन सहेति
योगविभागेनाप्येन तु सुसाधं॥ ॥इति सर्वसमासशेषः॥ ॥ऋक्पूरानुदंतस्येति। न हावकधुः शब्दांतस्येत्यर्थः। यदि तु अक्षेसमासाथस
तिने नियाख्यायेत नहि दृढधूर्क्षैर इत्यत्रैव स्या [redacted] न्। नाक्षधूरित्येत्र यदि चाक्षेशब्दपदेनेति व्याख्यायेत ततोऽक्षधूरित्यत्रैव स्यान्न तु दृढ
धूरक्ष इत्यत्र तस्माद्यथाश्रित्याशाचोक्तमेव न्यायः। कृतसमासांतस्येति। येन विधिस्तदंतस्येति तत्र प्रयोजनं महदक्षस्तेन सूत्रणं दीर्घविधानाविति राम
वार्तिके आपत्तिरिति स्वापइतिभाष्ये चात्र प्रमाणमित्यवधेयं। जनपंसमीपमिति प्रतिकूलाः संगता आपो स्मिन्निति विग्रहः। समापोदकप ११५

जनमिति। देवा इत्यंते स्मिन्निति सुस्त्यस्यायज्ञभूमिः। समापं थाहस्य पुंस्त्वं लोकादिस्याहुः। भाष्ये तु क्लीबमुदाह्रियते। अवर्णांता इति। द्यौनश्रिति
स्त्वे पर आह। ईत्वमनवर्णांतादिति वक्तव्यं। द्वहेमाघृत। प्रापं। परापमिति भाष्योक्तेः। गतिश्चेति सूत्रे वहिर्भिन स्वाभावी तस्योगादिस्वरणत्वेष्ठ
दोष इत्यपक्रम्य अवीतं। प्रेपं। परेपमिति भाष्योक्तेश्चेति भावः। उदनोर्देशे। दीर्घोच्चारणं अवग्रहार्थमिति साकरः। वहुदोन्यत्। अनूपे गोमानो
भिरित्यादौ अनूपशब्दं नावरद्वृत्ति। अनुगता आपो स्मिन्निति अनूपो देशः। जलप्रायमनूपं स्यादित्यमरः। प्रतिसाममिति। अव्ययीभावः। प्रादि
समासः। बहुव्रीहिर्वा हठ्च्मूने इत्याद्यपो बहुव्रीहयः। पद्मनाभ इति। पद्माकारा नाभिर्यस्येति। गौणेन पद्मशब्देन सामानाधिकरण्याद्बहुव्रीहिः।
यद्वा भक्ष्याहिता समस्याः परनिपातः। एतेनाण्नोभाव्याख्यानः। नत्र अपोः संज्ञा छंदसोरिति ह्रस्वो विशेषः। गवाक्ष इति। गवाचोऽधिकरणः। अत्
तुर। निपात्यंते इति। निपातनफलं तु समासविशेषनियमः टिलोपादिकं च न दाह। आधाइति। बहुव्रीहय एवेत्यर्थः। नेन नयेन तुसमे अचत्
रउत्येवेति भावः। त्रिचतुरा इति। त्रयश्चत्वारो वेति विग्रहः। संख्ययाव्ययेति बहुव्रीहिः। बहुव्रीहौ संख्येये डजिति डच्। ऽपरादेभ्। अक्षिभ्रुवमिति। प्रा
ण्यंगत्वादेकवत्। उरोष्ठवमिति। सक्थियक्ते विपुमान् इत्यमरः। जानुभ्रुवंबाधिवदस्त्रिया मिति च। सरजः पंकजमिति। रजोनेहि सरजसम पहाय
श्री कृतकालीनां प्रसवमित्यादि सरजसमकरंदनिर्भरासु प्रसववितृतिषु रूधांविरजः। इति प्रमादएवाय मित्याहुः। गोष्ठश्वेति। एतेनैव समासमानतु रूप

एवेति नियमं दर्शयति । षष्ठीतत्पुरुषे तु गोष्ठेभ्य एव । ब्रह्मवर्चसमित्यादौ षष्ठीतत्पुरुषो । वर्चो दीप्तिः पल्यं मांसमस्तीति पल्यः । मांसमो जीत
दायं वर्चः पल्यवर्चसं । अवतमसमित्यादि अवहीनं तेन तच्च तमश्चेति विग्रहः । अंधमिति । गाढमिति फलितोर्थः । अत एवं ध्वांतेनादेंतमसं सीलेभ्य । ध
तमसं तमः । विष्वक्संततमसं इत्यमरः । श्वसो । वसुशब्द इति । एतेन श्वः वसुशब्दादीयसुनि अवसीय इति व्याचक्षाणा आकरविरोधादुपेक्ष्या इति
ध्वनयति । वसीय इति । तथा च श्रूयते श्वः कामयेत वसीयान्स्यामिति वसुमान्यज्ञो वसीयान्स्यामिति । श्वसशब्द इति । यद्यप्ययमन्य
त्र कालविशेषवर्त्तने तथापीह समासे उत्तरपदार्थभूतां प्रशंसामाशिषो विषयमाह । आशीर्विषयता घोतकोयमिति यावत् । एतच्च रति
सोके । श्वसशब्दस्येहार्थ एव नास्तीत्यपि सुवचं उत्तरपदार्थमाव[redacted] र्त्तितं वा स्कुटकं च पाणिनि यमतत्पणे । अर्थे परपदस्येह श्वः
शब्दः कालवाच्यपि । अभिधत्ते स्वभावेन तेन सो मंगलार्थकामिति । अन्वव । रह इत्यस्य प्रकाशासुच्यते । अनुगतमवहीनं तं च रह इति प्रादिस
मासः । अनुगतं रहो स्मिन्नित्यादि बहुव्रीहिर्वा तन्त्रमिति तसं । परेणानुधिगम्ये हि यइ होवहितं तप्तवन्नतान्तसंचतन्द्रह श्वेतितन्तमेत्तेरहसं विदुः ।
बहुजनात् । इत्यतः प्राणिति । प्राग्वहुव्रीहिग्रहणं कर्त्तव्यमिति वार्त्तिकोक्ते विंतितत्पुरुषं प्राचा तु बहुव्रीहौ समास उक्तो निषेध इत्यतो नन्दनंदनं साहि राम
दा वित्यध्याहारेण वा योज्यं । तेन तम्भभी अत्सूभी इत्यादि सिद्धं । तत्तत्पुरुषात्तनञ्च इति षष्ठी ॥ ॥ इति समासत्रप्रकरणंसमाप्तं ॥ ॥ श्री समा० १
११६

षष्ठी चानादर इति षष्ठी । पश्यतेत मनाहृत्य हरती त्यर्थात् । देवाना मिति । मूर्खा हि देवानांप्रीतिं जनयंतीति । देवप्रभुत्वातानूप्रभुनइवचो
पमस्य पशुनः शोपः शोपशाद्वो हि अकारांतो प्यस्ति । शांझो नीपादिता दोषेण हि कः एवं शत्ययः । तथा च मंत्रः । यस्या मुखं नः प्रहरामशेषमिति
एवं पुच्छलांगूलाभ्यामपि बहुव्रीहिः । कपिविशेषेणामेतास्संज्ञाः बद्धस्वत्रालल्णदो प्रसिद्धाः । मातुः पितुर्भ्यामिति सूत्रे समास इत्यनुव
र्त्तितं तस्य फलमाह । समास इति । इह पाक्षिकमपि पत्वं तेत्यर्थः । इत्यतत्पुरुषः समासः । घरूपा । अं उगितश्च वादेदित्यनेन डीबर्थः । प्राप्ति
तेरर्थः । तसिलादिष्विति पुंवद्भाव स्त्वतन । जातेश्चेति निषेधात् । एतेन पुंवद्भावं वाधित्वा परत्वाक्रस्व इति व्याचक्षाणः परास्ताः । आमलकीतर
ति । आमलकी शब्दो वृक्षे नित्यस्त्रीलिंगः । एवं कुवलीशब्दः । नपा । इदं सूत्रे श्कतादन्यः शेषः स च द्विधेत्याह । अंतेति । निर्मूलमिति । यत्तु र
त्तिकतोक्तं पुंवद्भावोत्र पक्षे वक्तव्यः । श्रेयस्तरा विद्वत्तरा । प्रकर्षयोगात्प्राकृत्वी । तस्यां विवक्षितत्वात् सिद्धमिति । अत्रेदं वक्तव्यं । पुंवद्भावइत्या
दिषु नित्यतानुवृत्तादप्राप्तौ पक्षे । तत्रकृता हि तसिलादिष्विति नित्य एव पुंवद्भावउक्तः न तु पाक्षिकः । भाष्यवार्त्तिकयोरपि नाधिकमुक्तं
प्रमाणानामभ्रूपेत्यादि ग्रंमः । कथमिदं वचनं यत्ता नेपुंवद्भावोयः प्राप्तः सोत्र पक्षे वक्तव्यः इति तत्पुंवद्भाव एव वक्तव्य इति । आयेपुंवद्भावे सि
थेप्राप्यमिदं वचनं स्यात् । तथा च इतः प्रागेव तदुदाहृतं निःश्रेयसी तमा विदुषीतरा विदुषीतमेति दीर्घ ऊ इति शिक्षा निरूपालि सेयं तु नाम
श्रेयसितरानिः १

कर्षयोगादि त्यादितद्दीर्घग्रंथस्त्वसंगतएवस्यात्।सहिउपसं ख्या [redacted] नंप्रसार्येचेद्इतिन्यासकृतांवनाशितःप्रत्याख्यानंचनस्यपुंवद्भावप्र
लकृत्वेसत्येवस्यात्नतुनन्निवृत्तिफलकत्वेनकृतनत्वकृतनदपिनंख्याप्यग्रहणंनदंतात्तद्धितविधानार्थमित्युक्तत्वात्।स्त्रीश्चइत्यलिंगाद्यन
नरमेवप्रियकुलत्वनप्रकर्षादिविवक्षेतिभाष्येनिर्णीतत्वाच्च।द्वितीयस्तुसंभवेद्यदितस्तित्यादिमध्येनरत्वम्पौनःपुनिकेपातनोपौतुसर्वैरेव
दिगत्याप्तोस्ततीयनरादर्शनीयतमेतिशेदाहृतंनचवृत्तिग्रंथेषुविद्वुपीनमेत्यादिदीर्घपन्यासः स्थितं[redacted]प्रदर्शनपरोनतुत्रैरूप्यपरइतिवा
च्यंप्रकर्षयोगादित्यादिग्रंथशेषविरोधात्।तस्मादसंगतएवायंवृत्तिग्रंथइति।एतच्चसर्वंइतिमन्यमानइतिचदत्ताहरदत्तेनध्वनितं।न्यासकार
स्यतुइदमुपसंख्यानमितिभ्रमः प्रत्याख्यानंयुक्तमितिभ्रमश्चास्त्येवेतिनतद्ग्रंथदर्शिनांस्पष्टमेव।एवंस्थिते पक्षेपुंवद्भावोवक्तव्यइति
प्रक्रियाग्रंथःन्यायसिद्धमिदमित्यादितद्व्याख्यानग्रंथश्चवृत्तिन्यासोक्तार्थानुवादोमूलेवैषिल्यादनादर्त्तव्यइतिदिक्।।पादस्यपद।पदेतिसो
त्रोविभक्तिलुक्।।कृतःशेषः।शेइतिशेस्तस्यपस्येदमेकदेशानुकरणं।उदमेघइतिसादृश्यानुउरूपस्येयंसंज्ञा।उदपेषमिति।स्नेहनेपिषइ
तिणमुल्।।उदधिर्घटश्चेतिउदकंधीयतेस्मिन्नितिविग्रहः।कर्मण्यधिकरणेचेतिकिःप्रत्ययः।उदमंथइति।द्रवद्रव्यसंस्कृताःसक्तवोमंथः।न राम
नीयेतिवियोगविभागात्समासः।।षाढःसंप्रसारणं।इहनेसुरूपइत्सनेनपूर्वपदमुत्तरपदंचआक्षिप्यतेइत्याशयेनाहपूर्वपदस्येति।उत्तरप ११८

दान्तलुक्इति।समासप्रयोजनंतुलोकान्मुक्तस्यापत्यंलौकान्मुक्तिः।लौकान्मुक्ताःपाःलौकान्मुक्तेयः।इहलोकांतिकृद्वृत्तार्थंकृतेत्वाल्लिङ्केनेति
समासशास्त्रेपठितानाएवलोकादयोगृह्यंतेइत्याशयेनाहएवमिति।ओजःसहः।कथंतर्हिसितननेशतमोरत्नमन्यतइतिभारविः।अत्रदुर्घटवृ
त्तौ।उत्तरपदाधिकारेतदंतग्रहणंनास्ति।किंतुकेवलपदाधिकारएवेतिन्नभाष्येपदांगाधिकारइत्यत्रइष्टकेषीकेत्यादेःप्रयोजनत्वेनोदाहर
णात्।यदपिहरदत्तादयआहुःउत्तरपदात्क्षिप्तेनपूर्वपदेनेहओजःप्रभृतयोविशेष्यंतेपूर्वपदस्यतेभ्यःओजःप्रभृतिभ्यइतितेनतान्तमःशब्दःपूर्व
पदं।किंतर्हिसितननेशतमःशब्दः।यत्रतुनदंतविधिप्रसिद्धेनतत्रोपात्तेनाक्षिप्तंविशेष्यते।यथाइष्टकेषीकेत्यादावितितदपिचिंत्यं।भाष्यवार्त्तिकवि
रोधात्।[redacted]विशेषणविशेष्यभावव्यवस्थार्थमेवपदांगाधिकारइत्यादीनांप्रवृत्तिरितिकैयटवदेवस्वयमपिव्याख्यानत्वात्।भारविप्र
योगस्तुलक्षसमाधेयः।वृत्तेर्वृत्तिः।नेशानमलोवृत्तंइतिषष्ठीतत्पुरुषः।नपुंसकेभावेक्तस्यप्रयोगेशेषविवक्षायांषष्ठीतत्सत्रतत्रेनेशानमोवृ
यस्मिन्नितिबहुव्रीहिः।यदावृत्तुवर्त्तनेघञर्थेकविधानमितिभावेकः।त्रोपंप्राग्वत्।।इरिणइतिवक्तव्यमिति।इहआत्मनेस्वेत्यंशोविचारि
कांतर्गतःनतुसत्रेमितिकेचिदाहुस्तन्न।चादर्शनमितिभावः।नपाहिंसनिउत्तरसत्रेआत्मनइतिनलभ्येतपरस्यचेतितदुत्तरसत्रेचव्यर्थ
मेवस्यादितिस्पष्टमेवविवेकिनां।।बहुव्रीहौश्च।इतिएकस्यापिवस्तुनोदेपरिकल्प्यवृत्ति पदार्थत्वंअन्यपदार्थत्वंचविवक्षणीयमितिभावः।

वैय्याकरणास्त्वाम्। व्याकरणे भवो वैय्याकरणः। अणृकगयनादिभ्य उत्यण्। सा चासावाख्या चेति कर्मधारयः। आत्मनेभाषा इति। य
द्यपि यमास्त्वाशाध्याय्यां न दृष्टा तथापि वैयाकरणैर्भवत्येव धातुसूत्रगणोणादिवाक्यात्मकं पंचप्रस्थानं व्याकरणमिति स्वीकारात्। अस्या श्च
धातुपाठे दृष्टत्वात्। ननु प्रकृतिविकृतिभावविरहान्नतरर्थता षष्ठ्याउ नित्ययसमासो न स्यादत आह योगविभागादिति। एतच्च यज्ञिप्या सावष्टु
स्तसोक्तं। अलुग्विधिसामर्थ्यादित्यपि हसुवचं। तदुभयोश्चाहरित्स्पृशिनि। हृदयंदिवं चस्ट्यशनीतिविग्रहः। कर्मण्यधिकरणत्वविवक्षया सप्त
मी। भाष्ये तु कर्मत्वेव सप्तमी। स्फुट अलुग्विधिरेवसोपक इति तदाशयः। अमत्यइति। दिगादिलाघत। ओर्गुणः चानोथिषाचाहुयत्स्थाने न शासंप्र
२५ गिल्वाश्रुजइत्कदाहतं। तदाकरविरोधादुपेक्ष्यं। अस्तुज इति तु हल्लंतादित्येव। अमृतंताविति। कारीयं भाज्यभागयोः। अनुग्नेस भिरवा। अ स्य
स्फुमेस्तोमोअब्रवीत्। इत्यतु वाक्यतत्र चाम्रेश्ताह्येस्ति। नन्वेवंप्रकृतिवदनुकरणं इत्यनिर्देशेन अस्तुइतिसोः प्रत्ययत्वात्तरेतानप्रथमापाभ
भावे मनुष्वव्दुर्लभः। अतिदेशायष्टतेनुसोर्लुक्प्राप्तिरेव नास्तीतिचेत्तसं। अतिदेशास्यवैकल्पिकत्वाच्चोक्तदोषद्वयमपि। वैकल्पिकत्वे प्रमाण
नुपन्नेदत्तेन्य इति सोत्र निर्दैशातकः। प्रकृतवातिंकमपि तथैवनिध्येयं। यत्तु भाचामनिधितिपठित्वा अश्नुमतिरिस्फुरदाहृतं तद्धाप्यारेनदृष्टं। यत्तु राम
वदंतिमतुविनिपातेसतम्यंतान्मतुपः कथंसंभव इति चिंत्यमिति। तदेवचिंत्यं। पाठांतरस्यानाकरत्वात्मतुपः संभवस्योक्तत्वाच्च। पक्षमनोहर इति। ११७
सिद्धम् ५

दयोरिति चा। इहोत्तरपदेन पुत्रपत्नी विशेष्येते। न तु विपरीतं। तेन कारीषगंधापरमपुत्र इत्यत्र नातिप्रसंगः। मालभारीति। मालां बिभर्ती ति
[illegible]ना छ्रस्त्वेणिति। केचितु हारिधिविनिपठंति। कारेसत्यागदस्य। सत्यंकारः सत्ययकरणं। अशापथेपि परत्वाद्दुत्वं बाधित्वा मुन्। अग
दंकारो वैद्यः। अस्तु कारोनुपगमः। अस्तीतिनिंडं न प्रतिरूपकमव्ययं। धेनुंभव्येति भव्यगेयेति कर्तरि कृत्यः। धेनुभ्यासो भव्यावेति विग्रहः।
भविष्यंती धेनु रित्यर्थः। गो न मस्त्रतो तु सा न कथमेषु अधेनुंधेनु भव्येति ब्रूयादितिश्रयुक्तं न त्राषत्वान्नुमागमोनेति नेच्छा रुयापयामिता क्षरारेवा
पोहरदत्तः। लोकं पृणइति। एणतिः पूरणकर्मेति हरदत्तः प्रीणन इति तु पश्यत एव। अनभ्याशमित्य इति। अभ्याशं समीपं। न ह्यभ्याशमनभ्या
शं। हरं एतिस्वशास्तित्यादिनाइणः क्यप्। भ्राष्टमिंधइति कर्मण्यण्। ■ घञंतेन वा षष्ठी समासः। तिमिंगिलइति। महस्य विशेषः। गिरते मूल
विभुजादित्वात्कः। गिलगिलेचेति। गिलं गिलतीति गिलगिलः। तिमीनां गिलगिलइति विग्रहेदरमारवे। नित्यमवेति पूर्वविप्रतिषेधे नेतिभा
वः। सज्योतिरिति। समानं ज्योतिरस्येति बहुव्रीहिः। यस्मिन् ज्योतिषि आदित्ये न क्षत्रे वाउप निपतितं तदस्तमयपर्यंत मनुवर्तमानभा
वो चेत्सज्योतिरित्युच्यते। छंदोदरादिनिपाद्योपदिष्टं। निरूक्तादिशास्त्रसिद्धानामसमासपदानां तु पृषोदरादित्वमिति सिद्धिः। अनेन तु स
इति मासपदानामितिविवेकः हरदत्तः। वस्तुतस्तु समासविषयकमेवेदमिति ननियमः। हंससिंहशाहंवोरपिशाचाकारिकापास्तुदाहृतत्वात्।

हेतेः पवाद्यविस्तगागमः। हिंसेस्तु पराद्यपि हकारसकारयोः स्थानव्यत्ययः। यदि तु भवे दिस्याद्दिश्लोकस्यापि प्रकृतसूत्रोदाहरणता
यां नाग्रहः। किंतु नेस्त्वत्र कृत्याभिरनेकधेत्यनेनाव्यासोनदाहरदनोक्त्वा विवेकोपि निर्वाध एवेति दिक्॥ आकृतिगणोयमिति। नेनोन्यदपि
सिध्यतीति यथा। लुंपेदवश्यमः कृत्ये तुंकाममनसोरपि। समोवाहितततयोर्मांसस्य पचियुड्घञोः। अवमिति निष्ठोषः कृत्यप्रत्ययांनेउत्तरपद
वश्यमूशाहृस्यानेमकारं लुमान्लुंपेत्तवश्याकामशाहृमनः। शाहृपरे तु मूरशाहृस्यांतं। तुमिति षष्ठ्यर्थे प्रथमा। युड्घञ्ग्रस्ये पपरीयः पर्ययातु तःते
स्मिन्परेमांसस्यांतमकारं लुंपेदित्यर्थः। अवश्यसेव्यः मंतुकामः गंतुमनाः सहितः संहितः सततः संततः। मांसपचनी मांस्पाकः। इहस्य
गांतलोपाभावेपि निपातनाहोध्यः। हदसितु अपस्मयादित्वेनापि निर्वाहउक्तः। अपरस्परः क्रियासातत्यइतिसूत्रेसातत्यइति नि
र्देशेनैकदेशानुमतिहाराध्वर्वाचापपठितो यं श्लोकोनापि नइत्येयाहुः। नहिवृतीति। एष्वपरे दीर्घइति। उत्तरपदे इतिनिबोध्यं। उपनह्यतेऽस्माअनत
संपदादित्वात्कर्मणि क्विप्। निवर्तनेइति नीवृत्। प्रवर्षतीति प्रावृट्। मर्माणि विध्यतीति मर्माविद्। रुचवदीसः रोचनेइति नीरुक्। [redacted] तिंस नि
हतेऋतीषट्। सहेः रतनान्तिभ्यांचे सत्रसहेरिति योगविभागादनुक्तसमुच्चयाद्वा सस्य षत्वं इतिन्यासकारः। पूर्वपदादिति षत्वमिति हरदत्तः राम
परितनोतीति परीतत्। गमःक्वाविति सूत्रे गमादीनामिष्यतइति वचनात्तनोतेर्नलोपः। यत्तुवेदभाष्ये। ऋतेन मित्रावरुणावितिमंत्रस्यव्या ११९

ख्यायामुक्तं। ऋतस्य वर्धयितारावित्यर्थेऽतर्भावितण्यर्थाद्वृधेः क्विप्। नहिवृतीसादिना पूर्वपदस्य दीर्घइति। नर्त्तिंसं। प्रहृतस्त्रेदधेर
नुपात्तत्वात्तदन्येषामपीति दीर्घस्तत्रबोध्यः। वनंपुरगा। एषसयेनषष्ठ्यास्थानेप्रथमे साहं वनशाब्दस्येति विध्यर्थइति। असंज्ञात्वेन पूर्व
पदात्संज्ञायामिति सस्याप्राप्तेरितिभावः। अतएवाह निपातनादिति। यच्चुत्याचक्षते। हलदंतादिति सप्तम्या अलुगिति न चेतिभावः। प्रथम
मि। सप्तम्यर्थस्य प्रातिपदिकार्थेतर्भावादिति भावः। निषादइति। निषीदत्यस्मिन्पापमिति निषादः। पुलिंदोमनुष्यजातिः। हलश्चेसधि
करणेघञ्। कथंतर्हि प्रतीहारो दौवारिकः। अत्राहुः। प्रतीहारो द्वारं। नातल्वादानाच्छध मिति। एकचितीकइति। शेषिकः कृपाशुनादें सारि। ते
अत्रकेचित् दंष्ट्रेति ह्रस्वांतं पठित्वा श्वादंष्ट्र इति बहुव्रीहावचोयं दीर्घ इत्याहुः। अन्ये तु दीर्घांतमेव पठंतः तत्पुरुषस्याप्युदाहरणतामाहुः। इ
कृमि त्यादिति। केचित्तु कोटरेवनितिनालेख्यमध्ये पठंतितत्स्वामादिति भावः। किरीषवणमिति। ननु यस्य फलमेव न पुष्पं सवनस्पतिः। वानस्पत्यः
फलैः पुष्पात्तेरपुष्पाद्वनस्पतिरित्यमरकोशात्। स च उदुंबरादिः। शिरीषस्तु नैतथा नस्य पुष्पफलो यसत्वात्तत्कथमिह णत्वमितिचेन्न।
सत्यं। इह वनस्पतिशब्देन वृक्षमात्रमुपलक्ष्यते। अत्र च लिंगं लुपियुक्तवदिति सूत्रे व्यक्तिवचने इति किं। शिरीषाणामदूरभवो ग्रामः शिरीषाः
नस्यवनं शिरीषवनं वनस्पतित्वमतिदिश्यतेनतनत्वणत्वं स्यादितिभाष्यकारोक्तिः। इरिकादिभ्यइति। ओषधिजातिमितिः। शिरपाणउशी

नराइति। उत्तरी नरशब्दो देवरावरीतद्वा सिद्धुओपचारिकः। गिरिनद्यादीनामिति। वक्ष्यमेनतत्। संज्ञायां शामे असंज्ञायामशासेउभ
यत्र विभाषेयं। मापयाविणामिति बहुलमाभीक्ष्ण्ये इति णिनिः। व्रीहिवापाणीति। कर्मण्यण्। उत्तरपदं यदिति। अत्र व्याख्यानमेवशरणं
प्रांस्स्फकुमारहणमिह ज्ञापकमित्याकुस्तद्दर्शयति। अत एवेति। ज्ञापकं शिथिलमिति ज्ञापयति। किंचेति। परिपक्वानीति। अत्र कुमति
चेति नित्यं णत्वप्रसंग इति भाणीति। मनेर्ण्यन्तात्क्विप्। प्राक्तु बुलुत्वेनेः समासान्तनकारान्तमुत्तरपदं। नान्तत्वाण्डीमातां। चतुरंगयोगेनेति। च
त्वार्यङ्गान्यस्य नेन योग इति विग्रहः। आनहिनइति। व्यवधायकस्य पदस्य नहितश्चेत्परो न भवति नदानिषेध इत्यर्थः। आर्द्रगोमयेणेति। अत्र
गोशब्दः पदं। पारस्करइति। पारंकरोतीति विग्रहे कृञो हेतुताच्छील्ये टः। किष्किंधेति। किंकिं दधातीति विग्रहे आतोनुपसर्गे कः। पूर्वस्य किमो
मलोपः सुट् षत्वं च निपात्यते। रुढिशब्दांशेन कथंचित्साधाः तद्धुहगो शिन्निगणसूत्रं। नादिति। नलोपश्चेत्सूत्रे तिभावः। चर्त्वेन तत्व पत्वं
झरोझरीति लोपस्यापि सुषच रात्। दकारतकाराविति तद्धुहस्तांयथासंख्यंबोध्यं। प्रायस्येति। प्रायः प्रापं विनिर्दिष्टं चित्तं नस्य विशेषनुमि
तिस्मरंति। आकृतिगणोयमिति। तेन परः शतादस्यादि सिद्धं। अधिश्रयंतीर्जनाः परः शताः इति माघः। शतात्परा इति विग्रहे पंचमी तियोग राम
विभागात्समासः। राजदंतादित्वात्परनिपातः। सर्वनाम्नोरतिमात्रे इति पुंवद्भावः। शोकाश्रयतालिंगस्य विरोध्यनिघ्नतौ। पारस्करादित्वात्सु १२०

ङ उपाधि अव्ययत्वात्सुपोलुक् अमु उपग्निपुरुषः शब्दादिकः गोमहत्वात् लुप् इति प्रयुक्तेस्य इति अंतोदात्तप्रतिषेधो गुरवस्यात्तरपदस्य उ विसर्गस्थानिकः सकारः उपपयः कारः अतः कृकमीसनेनेत्यव्ययस्येति निषेधः ५

डिमिदिकृ। इति समासाश्रयविधयः। समर्थानां। ननु भक्तं नस्त्वेव कार्यमेव रूपं सामर्थ्यं हि हो तुं नोचितं समर्थः पदविधिरिति परिभाषया गतौ
र्थत्वात्। पकाल तनेविति अलुग्विधानाद्धि सुवंताच्छिनो त्पत्तिः तथा च पदविधित्वं तस्य एमेव। अत आह। सामर्थ्यमिति। कृतेसादि। अस्य फलं
तु तस्यापस्यमिति स्त्रे मूलएव स्फुटी भविष्यति इह समर्था स्तथमादिति युक्तं वक्तुं। महोसंगताह। प्राग्दीव्यतोण। अश्वपत्यादिभ्यश्च। प्रा
प्राक दीव्यती येष्विति। दीव्यतः प्राग्दीव्यत। अपपरिवहिरंचवः पंचम्या इत्यव्ययीभावः इत्याहुः। प्राग्दीव्यतेमितितु उचितं ज्ञास इतिचूर्ण्यतेः। ततो
भवार्थे छाच्छः। त्यपुन अमेह स्यादिपरिगणनात्। अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचारा इति परिगणनाच्च अत्र मादरि
अ१ तिविद्वारणेषष्ठी। तेनार्थस्य इष्टमाह। चइति। अचो ञ्णिति नीति सूत्रादचइत्यस्यानुवृत्तिरपि इह सुवचा। प्राग्मादिकमेवेति। यद्यपि वातुर्वल्पादिरा
कृतिगणत्वात् पृथगप्येतस्सूपपादं तथापि बहदत्तग्रंथानुरोधादेवमुक्तं। दित्यादित्या। पूर्वपतिशब्दस्योत्तरपदशब्देन बहुव्रीहिकत्वादित्यादिभि
र्दृढः कार्यइति यावत् दित्यादिभ्यः पत्युत्तरपदाण्णइति। पत्यंतादिति तु नोक्तं। बहूत्तरपदपिप्रसंगात् देवइति। ननु दितेरपत्यं प्रत्ययोदेवतापि सा
वकाशः। अपत्येनुपरतादिति श्वानित्य इतिदन्त्यास्त्यंपमनेन शर्ववित्प्रतिषेधः। एपादयोर्ध विशेषलक्षणाण्दणपवादा शर्वविप्रतिषिद्धमि
ति। अर्थविशेषेति किं। औदुपतं। उडुपतिर्नामिपत्रं। तस्येदंप चाधर्युपरिपदश्चेत्सत्रे। अयमकर्ण्यंदेनेयइति। अत्राहुः दितिशब्दात्कृदिकारा

दत्किन इति। ङीषि कृते स्त्रीभ्यो ढक्। एषस्कन। लिंगविशिष्टपरिभाषा वा अनित्यत्वादिति। आदित्य इति। आदित्यवाहा प्रत्यये यस्ये
ति लोपे हलो यमामिति यलोपः। नेत्यांलोपस्य स्थानिवद्भावः। न पदांतेति प्रलोपेन न्निषेधात्। काशिकायामिति। हरेदत्तमाधवादिग्रंथे ये।
तथा च प्रयोगः। नामुपामशानयोत्याम्याः पुनर्यानिनाइति। भाष्ये तु नेन दृष्टं। तत्र च आश्रयोगो निर्बाधः। वचहि इति। हिलोपवचनमप्रयमानो
भमात्रइत्यस्यानित्यत्वज्ञापनार्थं। तेनाशानीय इत्यादि सिद्धं। एषप्रकृतेय अनुवचनं आधुदात्तो। प्राचां ग्रंथेषु तु यएवेति पक्षमनेन दत्ताकरं। अपत्या
मु इति भाष्योदाहरणादेवेहतदंतविधिः। अन्यथा वलशाविनस्याम नु शाहस्य केवलस्यापत्येन योगाभावे विजानादिरेव विधिः स्यात्। अप
त्यवस्थामपत्येति बहुव्रीहौ पृषोदरादित्वात्तस्य गः। गो रिति। न केवलमपत्य एव किंतु सर्वेषु प्राग्दीव्यतीयेषु। गव्यमिति। गविभवं गोरि
दं गोर्ह्रद्वतास्येत्यादिरर्थः। अनेन हि गव्यमिति जेमि निरस्ते त्रेविद्यमानं हृषये नो वा तिंकृकाराः समाहिताः। केचित्तु प्राग्दीव्यतीये भ्योऽन्य
त्राप्यर्थे अयं यदिति बावक्षाणः। गवा चरति गव्यः इत्याद्युदाहुः। गोरुप्यमित्यादि। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। मयट् इति रूप्यमय
टौ। अत्वादिन्यात्र। अण्णस्नदपवादानामित्रादीनां चापवादो यं। इह पक्षमते विकल्पासो। असेअसमासे। पूर्वाचार्यसंज्ञेयं। वत्सपस्यापत्यं राम
ताक्ष्यः। असे किं। गोवल्कपिः। असइत्येतदेवेहतदंतविधिज्ञापकमिति। तेन अधेनूनां समूहः आधेनवं इति सिध्यति धेनुशाहस्येह पाठात्। न १२१

सवीम स

पत्येनमीमांसके यदुक्तं कालेऽग्निरिति पाणिनीयप्रक्रमपार्थकमित्यादिति वैयाकरणमीमांसकसंतोषाय इति अपं चितं शारदैकोक्तमे ॥४॥

चेवं धेनुकं गोधेनुकं च न सिध्येदिति वाच्यं धेनुरनअञ्कस्तु त्वादयनी निविशेषवचनस्य भाष्ये आपिशलिमतत्वेनोदाहृतत्वात्। मिति ठ
कमित्यर्थ इति केचित्। अग्निकलिभ्यामिति। अयमर्थः। स्त्रकृतासास्येदेवनेत्यधिकारे अग्नेर्ढगिति सूत्रितं नेदं सामित्यधिकारे कलेर्ढगिति
नदिदं तच्चदयमपनीयप्राग्दीव्यत इति प्रकरणे अग्निकलिभ्यां ढगिति पाठ्यं। तेन अग्नेरयस्य अग्निनादृष्टं साम अग्नेभवं अग्नेरागतं अग्ने
स्वं वा आग्नेयं कालेयमिति सिद्धं। इत्यपत्यादिविकारान्तार्थसाधारणः। प्रत्ययः। स्त्रीपुंसाभ्यां। प्राग्भवस्तु वर्तते। स्त्री एव इति। स्त्रीपुंभवः स्त्री भि
श्वरति स्त्रीभ्यो ढगित्यादि। तस्य थे इति। सामान्यापेक्षं ज्ञापकमिति भावः। अत एवोदाहरति स्त्रीवदिति। कथं तर्हि स्त्रैण लोकस्त्रीतं स्त्रीणा। पुंस्त्व
पुंस्त्वेति। आ च त्वादिति चकारादिति वक्ष्यते। द्विगोर्लुगनपत्ये। द्विगोरिति षष्ठी। तदर्थश्च हेतुत्वं। तच्चरयं तरसाम्तादिरेव भाविनोऽपि तु भाष्य
वस्तापात्। नेदनदाह। द्विगोर्निमित्तमिति। अचादिरिति। एतच्चोत्तरस्त्रादत्तौ। स्यस्यापक्षेभ्योऽन्येनेत्याग्रहणमनुवर्त्यव्यवच्छिन्नविभाषाश्रयणेन
वा। गौ नेल्लुग्विगोः। द्वेष्टि किं। पच्छादिन्योगोत्र इति प्रकरणेन यस्य लुक् प्रासः। तस्येवा लुग्यथा स्यान्नेह। केवलस्येदं कौवलं। वादरं। कृतिसु
ह द्विगोर्लुगनपत्ये चिमूर्तिगोत्रेने सेवत्स्यतां। तथा च लुगलुग्ग्रहणं अत्र मकृतुं [redacted] अजादावितिकिं। ग्लौचुकायनरूप्यं प्राग्दी
व्यतीयेकिं। तस्मै हितं ग्लौचुकायनीयं। ननु उपगु अइनितत्त्वितेओ गुणेन वाधितावरसादचो ञ्णितीति सिद्धाभाष्यं। गुण एव तु पि तत्प्रयइत्यादिरत्र का

शः किंच सूत्रेतु णोऽवादेशो व अनेतुपचायाइति सूत्र्याभा[redacted]यं तत्राह आदिर्ञिटि इति परत्वादितिभावः अंत्योपधात्वद्योरवकाचां गोः।
पाचकः॥ आदिञ्ञुडेरवकाशः सुष्कृतः सोष्कृतः औपगवः। तत्रापि ओगतइत्यादौ उभयप्रसंगे परत्वादादिर्वृद्धिरेव भवति न च पुनः प्रसंग
तुर विज्ञानं सकृद्गतिन्यायाश्रयणात्। अनेन तात्पर्यं। अ शनिकादिष्ठ पुष्करसद्वृहस्यपावः। अन्यथा। उपधावृद्ध्या पौष्करसादेः सिद्धत्वादु
त्तरपदवृद्ध्यर्थसूत्रप्रयोगोऽनर्थकः स्यात्। अकृतेति। परिभाषायाश्च समर्थग्रहणमेव ज्ञापकं। नहि परिनिष्ठित परमिस्यकृते। परिनिष्ठितं च
वि उत्पन्नानि पादिकार्याएव न तु सु[redacted]शिष्टइत्यवधेयं। तेन औपगवः दंडिमानित्यादि सिद्धं। अभिमानणितिसोत्रप्रयोगश्चात्र लिंगं। यदि तु न कृ
पद डि कृरणेनाकृतेनसह परिभाषाज्ञाप्यते पामादिगणे विघणितुतंसकोपश्चाकृतसंधेरित्यत्राकृतसंधिग्रहणेन परिनिष्ठितात्तद्धितोत्पत्तिर्हि
समर्थग्रहणं ज्ञाप्यमेकं तु॥ ननु समासस्तद्धितेन नित्यं बाध्येत न च नहि स्यान्वैकल्पिकत्वात्पक्षे सोपीति वाच्यं पत्रेसगपिवादो महाविभाषया
उ विकल्पेनेनत्रापवादेनमुक्ते[redacted]सर्गोन प्रवर्त्ततइतिचारे मध्ये षष्ठ्यावेति वाक्यग्रहणेन ज्ञापितत्वादित्याशंक्याह। देवदत्ता सादि। नानिवादिति।
रघु पतुशाचोक्तं अणं न तान्तो विति। यत्र त्व्यावे[redacted]ष्टिद्धारणं जित्यतेनेति न तु भयं प्रयोगः आदिकूमितिभावः। औत्स इति। उत्सः प्रस्रवणं तापि प्रवाहो राम
निर्झरोऽशरउत्स्यमरः। तस्यापत्यं योगसूत्रांगेयोभोम्पृ इति चेत्। जीवतिवंशेपत्युषा। पितृपितामहादिरूत्सादरुपवंश्यो वंश्याः। तत्र भवोवंश्यः। दि १२२

विति

गादित्वाद्यत्। पौत्रप्रभृतीत्यनुवृत्तंपत्न्यापि परिणम्यतेऽयास्यानादिस्याहपौत्रादेरिति। तुशब्दोभिन्नक्रमः। पुत्रेस्यस्मात्सर्वोवोध्यः। सच ए
रार्थ वकाऽइति या च है। पुत्रसंज्ञमेवेति। एकोगोत्रे। अपत्यं पत्रस्य इति। एतत्तु अधिकारवलालभ्यते। औपगवइत्यादि। उपगोरपत्यं गार्ग्यादिभ्योयञ्जान
डादिभ्यः फक्। सत्यारंभ फलं भवतु भेदेन व्यवस्थापयति। गोत्रइति। स्वगोत्रेत्तदपेक्षया एकोन संख्यातां तत्तीयेह्योः चतुर्थत्रयाणं मित्यादीत्य
र्थः। यद्येति। तृतीयेपुरुषादनितोत्पत्तिः चतुर्थद्वाभ्यामित्यादी स्वर्थः। पितुरेवेति। तथाचामरः। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियांतु सी
आहुर्दुहितरं सर्वेपत्यंतोकं तयोः समेइति। ननु प्राचामिति। तथाहि न पतंत्यनेनेत्यपत्यमिति व्युत्पत्तिः। पंक्तिविंशतीतिसूत्रेणाप्य कृतारुदिति।
व्यवहितोपिपितामहादीनामुक्तेति प्रसिद्धं जरत्कारी पुपाख्याने च। तत्र कारोप्याते त्रपत्नी इति। आद्यपक्षे हि अपत्यमितापत्यमिति
गोत्रं वृत्तिराश्रयणीयास्यात्। गोत्राद्यूनि। गोत्रप्रत्ययान्तादेवेति। ननु पुत्र प्रत्ययोनादि इति प्रथमपक्षेऽर्थः हितीयपक्षेऽनुपपन्न[redacted]प्रकृत्यनेनेत्य ७
वंच्योनेत्यर्थः। स्वियांतितिनोऽयंभावः। अस्त्रियामितियोगविभज्यते अनेन सूत्रे। तितरोहस्वरूपपरं। परिभाषा वेयं। यत्र पुत्रसंत्रविधीयते तत्रान्त्रि
यामित्यपनितन्तुइत्यर्थः। सिद्धस्यगति रिति। जीवति तु वंश्ये युवा। अस्त्रियामितितुसूत्रं पितु तु विज्ञेयत आतइत्यु। न परः किं। श्रुतंभ यः अपसंवेगे
भ्रंशः। कथं तर्हि मदायनोद्दारोस्माथमेथिलीति। अपत्यं तत्रपिशेषस्याविवक्षायां शेषिकोण। आहवृद्धिरिति। येन तुवाच्यत्नोडनेइतिभागोमोप

नोक्तं केवलस्य बाहोरपत्येनायोगात्सामर्थ्यान्निर्दिष्टविधिः । सौबाहविरिति । नञ्पूर्वत्वाज्जातेनिबाहवीत्याश्वलायनसूत्राद्बाह्वादिभ्यश्चेतिसूत्रे
बाहविरिति भाष्यकारस्याप्युदाहरणं च बाहोः संज्ञाशब्दत्वात् । औडुलोमिरिति । यद्यपि लोमन्शब्दो गणे पठ्यते तथापि सामर्थ्यात्तदन्तग्रहणं उ
डुनी वक्ष्यमाणाड्वत्लोमानि यस्य तस्यापत्ये औडुलोमिः । शारलोमिः । बहुत्वे तु इञ्ञपवादोऽकारः प्राग्दीव्यतः । उडुलोमाः । शारलोमाः । इह याश्चरोण
दिप्रवृत्तिद्वाः संज्ञास्त्यन्यत्र प्रसमयो बोध्यः । निरूढ तेन प्रथमोपस्थितेनाभिमतार्थे विधिर्निराकांक्षत्वात् । यस्कादीनां तन्नो बाहुत्वस्यापत्येवा
द्वन्द्व इत्येव । उक्तं च हरिणा । अभिव्यक्तपदार्था ये स्वतंत्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥ इति । अनर्थकं सौदिग्धार्थकमप्र
सिद्धं च क्रमेण विशेषणैर्व्यावर्त्यं । तदुक्तिषु न तत्सदृशेष्वित्यर्थः । अत एव संज्ञाश्वशुरस्यापत्यं श्वाशुरिरित्यत्र राजश्वशुराद्यदिति यन्नाभिमतं नेना
तानन्तस्य स्वसा मातुः स्वसा मातृपितृभ्यां स्वसेति षत्वं न । नारुडकिरिति । नरूडादयो जातिविशेषाः । इत्यादीनि । आदिशब्दान्नैषादकिः । चाण्डा
लकिः । बैंबकिः । वक्ष्यत इति । अत इञोऽपि विहितस्य प्रत्ययस्यैव विशेषः । यञिञोश्चेति गोत्रे यावितिगोत्रे किं । दाक्षः सुतस्य सुदेस्यत्रादेः फक्
सुतंगमादिभ्य इञ् । सौतंगमिः । तदपत्ये मा भूत् । अनृष्यानन्तर्ये । अनृषीति पंचम्याः सौत्रो लुक् । स्त्रत इति । आनन्तर्यं इत्यत्रैव स्यार्थः । वैदिरित्यत्र राम
ऋष्य एमाशंक्याह । बाह्वादेरिति । प्रवराध्यायेति । एतच्च स्त्रीपुंसाभ्यां नञ्स्नञाविति सूत्रे कैयटग्रंथे स्पष्टं । काप्य इति इत अनिञ इ १२३

निदञ् । कपेर्गर्गादित्वात्सामर्थ्ये आंगिरस एवेति नियमार्थं सूत्रं । गणे पाठस्तु लोहितादिकार्यार्थः । काप्यायनी । बौधिरिति । अनृषित्वादिञ्
बाह्वादित्वाद्वा । तनंडाश्च । यञञणोः प्राप्तयोः आंगिरसे यञेवेति नियमार्थं सूत्रं । लुकः स्त्रियामिति विहितस्येति । परिशेषितस्यैवेति बोध्यं । एतच्चांआं
गिरस इत्यस्यानुवृत्त्या लभ्यते । अत एवाह । अनांगिरसे त्विति । वक्ष्यमाण इति । अत्रिपौरुनार्षयोरिति सूत्रे णेति भावः । अश्वादिभ्यः फञ् । गोत्रे इ
त्र ति । क्वचित्तु न्यूस्त्यपि । तथाहि । अश्वादिगणे गोत्रप्रत्ययान्तास्त्र्यः पठ्यंते बिल्व । आनुडुह्य । आत्रेय इति । विजिनमिराजर्षिः तैतोरन्दे कोसलेतिभ्य
दुः । आनुडुह्यशब्दो गर्गादिष्वङ्गतः । आत्रेयशब्दो ढगन्तः । ततः सामर्थ्याद्यूनि फञ् । नहि युवानं विना अपत्यप्रत्ययेन युवा शक्यते । पुंसि जात इति यह
गणसूत्रं । पुंसि विद्यमानो यो जातशब्दस्तस्मादित्यर्थः । जातायाइति । लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा
प्राप्तः फञ् । शिवादिभ्योऽण् । गोत्र इति निवृत्तमिति । इतः प्रभृति अपत्यसामान्ये प्रत्यया इति भावः । एतच्च ख्टौ कैयटादिग्रन्थेषु स्पष्टं । यत्तु सूनि
लक्षत्वे प्राप्यकेयटपर्यालोचनया गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकार इति तन्मतान्तरमिति भावः । विपाट्छब्दोऽत्रप नेतस्य कुंजादि छ
घपि पाठात्सङ्केऽञ् । वैपाशः । वैपाशायन्यः । जरत्कारुशब्दः पृषोदरादिः । जरतः शरादिताद्धृगपि देलोपो कद्धाः उत्सल्लोपः । जारत्कारवः जारत्कारेवः
विश्रवणरवणशब्दौ पठ्यते नो विश्रवसः शब्दस्यादेशौ । प्रकृत्यन्तरे एव वा इति विपयेते समानार्थे वैश्रवणः । रावणः । इतश्चानिञः । दुलः किं इरयेर

पत्यं औदयः यत्तु काशिकायां मरीचेर्मरीचय इति प्रत्युदाहृतं न श्लिष्टं बाह्वादित्वेनेञ्प्रसंगात् तथा च मिदचोऽन्त्यात्पर इति सूत्रे भाष्ये मरीचि
शब्दो बाह्वादिषु पठ्यत इति। शुभ्रादिभ्यश्च। मृकंडुशब्दोऽत्र पठ्यते स च अदंतः। एतच्च मृगयवादिह यश्च इति सूत्रे उज्ज्वलदत्तग्रंथे स्पष्टं। मृकंडस्य तु
नेर्त्स्यार्थं निघाभ्याम् इति निर्मलमिति स्कांदे मार्कंडेयः। उकारांतपाठे तु ढेलोपो बोध्यः। कल्याण्यादीनामिनङ्। परस्त्री। शब्दात्पचापत्ये पारस्त्रै
णेयः। अनुशतिकादित्वादुभयपदवृद्धिः। परस्याः स्त्रियाः सुत इत्यर्थः। विदादिगणे तु परस्त्री परशुं चेति पठ्यते। आपद्यत इति शेषः। परस्त्रि परस्त्रि
८ या अपत्यं पारशवः। ब्राह्मणाच्छूद्रायां तेनैवो यामुत्पन्नः सा च जात्यंतरयोगात्परस्त्री न त्विह परस्त्री निकल्पा एषा दिशब्दात्तत्सुतः
विदादेरत्तु कर्मधारय इति विवेकः। तथा च याज्ञवल्क्यः। विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां। अंबष्ठः शूद्र्यां निषादो जातः पारशवो
ऽपि वेति। न चैवं पारशवेऽपि स्यादिति वाच्यं अनुशतिकादिकार्यस्यानित्यत्वात्। पूर्वोत्तरपदसंप्रमोहात् न हि ह एतावान्पूर्वपदस्यादेशः इति
विषयभागो गम्यते। स्वैरिणीसुतस्तु कौलटेयः। अत्र इनङ् धौ। उक्तं चामरसिंहेन। अथ बांधकिनेयः स्याद्बंधुलश्चासतीसुतः। कौलटेरः कौलटेयोऽपि
भिक्षुकी तु सती यदि। तदा कौलटिनेयोऽस्याः कौलटेयोपि चात्मज इति। केचित्तु क्षुद्राभ्यो वा इति ढ्रक्। तेन कौलटेर इत्यपि रूपमाहुः। तन्न। क्षुद्राभ्यः परत्वाद्भिक्षुकी राम
न श्लिष्टं तेन स्वैरिणीकल्पिकायामपि पक्षे ढक्। स्त्रीकाराद्वा इनङ् प्राप्नोति शिता न तु। नयोरैव नित्। न च स्वावेनात्रोहिनेल्लु मेल्लुकृते द्विवल्लुको नियापोल्लु १२४

ढक्
भिक्षुकी सति

कृपुन रजादिलक्षणस्य श्रेणा जातिलक्षणस्य ढकोवाधक इति भावः। यत्तिह न्यासकृतोक्तं। चटकादैरगित्येव सौत्रहा यिकं स्त्रत्रपाठ इति तद्वाप्य ३९
वार्त्तिकविरोधादुपेक्ष्यं। आरगुदीचां। उदीचां ग्रहणं पूजार्थं। वचनादेव ढक्। इग्गारकां पर्यायसिद्धेः। अन्यतरस्यां इति। अनाकारांतात्तु
कुतश्चित्त्वित्यर्थः। जरत्स्यां। जलघातनेउलयोरभेदाज्जडः। पदिगतो। पंडः। एतच्च उक्तधातोर्माधवीयवृत्तौ स्पष्टं। तत्र प एउस्यापत्यं दत्रि
मादिवोध्यं। गार्ग्य इति। ननु गृष्टिः सकृत्प्रसूता गौरिति कोशात्तत्तु पश्चाद्धोटश्च इत्येव सिद्धं। अत्राहुः। कोशेगो शिनि प्रायो वादः। सकृत्प्र
सूतास्वपि गृष्टिः। अतो यमारंभ इति वस्तुतस्तु गृष्टिशब्दः शुभ्रादिः। तथा चानो शत्तं ढगं ते प्रयुज्यते। संगाष्टेयो वृषभो गोमिरानडिति। अ
नः पाक्षिकायुदात्तार्थमिह सूत्रे गृष्टिग्रहणं। दृष्टिरिति। गृष्ट्यादित्वादिति भावः। केकयमित्रयु। केकयस्यापत्यं स्त्री कैकेयी। जनप
५ दशब्दात्क्षत्रियादञ्। मैत्रेयिकया श्लाघते इति मैत्रेयुः गणभावे न स्यर्थः। गोत्रचरणाच्छ्लाघात्याकारे इति वुञ्। तत्र हि लौकिकं गोत्रं गृह्यते। लोके
च ऋषिशब्दो गोत्रमिति प्रसिद्धः इति काशिका। एतच्च यदा मित्रयुशब्दो भेदोपचारात्तदपत्यसंतानेवर्तते तदा बोध्यं। प्रभृतास्तु गृष्ट्यादि
त्वादृष्यादित्वादृद्धयुक्तनेदापरितापि केचिदपि गोत्रेनसातिः। प्रलयाद्वा गतेमालेयांत्यादेवेन वृद्धिर्नबाध्यते विषयभेदात्। अनास
देवद्वियादेश्यादेशाः। अंगं तु उभयोर्विशेषणं नकारपीति हरदत्तः। बांहिनायन। आनाभीति। देडिन्तह त्विति। आम्भौत्तौ दित्वात्कृत्। ये

स्कन्दादिष्वेनो न पठ्यन्ते तेषामनेनैव निपातनात्फक् । टिलोपाभावस्तु निपातनादेव । अथर्वन्निति वसन्तादिषु पठ्यते । अथर्वणा प्रोक्तो ग्रं
थः अथर्वा उपचारात् तमधीते आथर्वणिकः । जिह्माशिनि निशुभ्रादिः । जिह्माशिनोऽपत्यं जैह्माशिनेयः । नाशिनोऽपत्यं नाशिनायनिः । उद
न्वो रद्वादिनि फिञ् । भ्रूणहन् धीवन् एतयोः ष्यञि तकारादेशो निपात्यते । भ्रूणघ्नोऽपत्यं भ्रौणहत्यं । धैवत्यं । इह हन्तेः तत्वे हनस्तो । विलो
पित्येव सिद्धे निपातनं ज्ञापयति धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति तेन वार्त्रघ्नमित्यत्र न तत्वं । सरय्वा उत्वस्याणि परे यादेशो नि
र पात्यते । सरय्वां भवं सारवमुदकं । देविकाशिंशपा ... विकसारवा विलम्बरः । न त्वेदविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् इति
सूत्रेण देविकाग्रहस्याचामादेराकारादेशो बाध्यः । ऐक्ष्वाक इति अणन्तमनेनैव । एवं कस्यापाद्यानं । उभयत्राप्युकारलोपः । इक्ष्वाकोरपत्यं
जनपदशब्दात्क्षत्रियादञ् । ऐक्ष्वाको राजा बहुत्वे लुक् । इक्ष्वाकूणां दुरापेर्थ । इक्ष्वाकुषु जनपदेषु भवः कोपधादण् । अस्य बहुत्वेऽपि न लु
क् । ऐक्ष्वाकेषु वनेष्वित्येषु च फलं तस्मात्कमप्याशिमइति मुरारिः । हिरण्यशब्दस्य मयटि यादिलोपो निपात्यते हिरण्यस्य विकारो हिर
ण्मयः । यस्कादिभ्यो गोत्रे अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्यमभिप्रेत्याह अपत्यप्रत्ययस्येति । राजश्वशुराद्यत् । यथाक्रममाशिजोरप राम
वादः । आत्रेयानि । प्रकृतिप्रत्ययसमुदायेन जातिश्चेद्वाच्येत्यर्थः । प्रत्ययस्तु अपत्य एव । व्यन्सपत्ने । सपत्नशब्दः शत्रुपर्यायः अमुत्पन्नं १२५

प्रातिपदिकं । वृत्तौ तु सपत्नी शब्दादिवार्थे ञित्प्रत्ययो निपात्यते सपत्नीव सपत्नः । अत एव येन सपत्ना अपनेभवंति सत्र सपत्नाः
इत्यत्र यहः पठ्यते । लित्स्वरेण मध्योदात्तः । पाणिनेति । नत्वत्र आत्तु पुंवत्वं रूपे वय चार्थे स्त्रीति भावः । दतिकारस्तु इहापत्यग्रहणेन संबध्यते
अनर्थकावेव प्रकृतिप्रत्ययौ समुदायार्थः परं सपत्न इत्याह । गार्ग्या अपत्यमिति । पितुरसंविज्ञाने मात्रा व्यपदेशात्कुत्सा । पुंवत्काराादिति । भ
स स्यादेरुत्येनेन । गार्ग्याशब्दादिति । यद्यपीह प्रकृतेर्वृद्धत्वात् स्याणित्वेनोपयुज्यते तथापि ग्लुचुकायन्याः अपत्यं ग्लौचुकायन इत्यत्रेदृश्यमितिदोध्य
गोत्रे निवृत्तिः । का विक्रेयः स्त्रियाः किं । औपगवस्यापत्यं युवा औपगविः । कुत्सने किं । गार्गेयः । कौरव्याद्रायणः इति । यत्तु कुरुनादिभ्यो ण्य इति
वक्ष्यतेन तत्र स्त्रियामादित्यधिकृतेन न इनीति लुक् । कौरवः क्षत्रियाः इति विशेषः । वावहूरूपइति । वृद्धेर्यडुं नाहु क्षेत्यपः स च कुर्वादिगणे वावहू के नि
ठ पा सामर्थ्यादेवेति भावः । उद्धकादिभ्यश्चेत्यण्णादिसूत्रेण त्यन्यो वं स्याज इति गणसूत्रं । हाविषेत्य इति एतिसंज्ञा यामगादिति चेत्स्यासिद्धत्वान्
सेनानीयं । नापित्य इति । पाचामनेनेदं । उदीचां तु परत्वात्फिञिति वक्ष्यते । नडस्य इति । उदीच्यामित्येव । इञोपवादः । दतिकारस्तु नेदं सूत्रमाह । शिवादि
षु पठितत्वात्कारिकस्त्रणमुदीचामिमं अपमनवाधने । तस्य तु वाधनेष्यत इत्याह । सर्वथापि रूपाभ्यां रूपद्वयमिति विवादः । यस्तु परत्वेहतु ध्वनरान्नाम
त्ती निस्वरे दत्तेनात्र । तेब्धिणः नस्पद निसूप्तणनत्व पौका विलक्षणेन अस्येन वाधितत्वादिति । नहि हस्य भोप्यप्टतिस्व ये पविसिनेन मूलके । ना
से

कायनिरिति। निक आस्कंदने निक्रोनीनि निकः। इगुपधत्वात्कः। चण्डालिंदाक्षिमिरिति। रिदस्य ग्राहोत्र भेदपरः। नामधेये प्रत्ययेनु सानामधेय य
स्येति ज्ञापकत्वात्सखे किञ्ज भवत्येव। दाक्षायणो क्षिनी त्वादिनाराइ त्स्मरः। पंचालानां राजेति। इह अचूडादिभ्योपि बहुवचनविषयादिति भाष्ये उ
च्यते। पूरोरिति। पूरुराज्ञस्य जनपदत्वाभावात्। तामाभावाद्यनीये। अनेन सिद्धे तद्राजसंज्ञार्थं वचनं। जनपदवाचित्वेतु द्व्यञ्मगधेत्यव
सिद्धं। पांडोर्ड्यण्। णकारो वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधार्थः। युधिष्ठिरपितृत्वाविनोपि गुणत्वाविनस्य पांडोर्नेह ग्रहणं जनपदशब्दादित्य
के हि न दधिपतिरोच्यते वा वनिष्ठते। कुरुनादिभ्यो ण्यः। कुरोहस्तुल्लक्षणे ऽणि प्राप्तेन कारादिभ्यस्त्वञि प्राप्ते वचनं। ते तद्राजाः। अञादयस्तु
तिः। ततः प्राचीनास्फूत तत्वेनन परामृश्यंते गोत्रयुवसंज्ञाकांडेन विच्छेदादिति भावः। तद्राजस्य बहुषु। तदर्थेति। तद्राजस्यापत्येन कृतेन इत्यर्थः।
रघुमदुक्षादपोरिति। एतेन चैवं वृक्कवइंत्र इति स्वरेपदस्यंजयपंक्तिवने। सिंधुतक्षेति। कुंभोजवास्तसिंधुपादिसमुपपन्नानतादिति भावः। अंबष्ठेति। कुंति स्य
मि। अवंत्यानुवृत्ते। इतोमनुष्यजातेरिति ङीष्। कुरुरिति। एयस्यलुक्। कुरु नडस्रू। अतश्च। इहतद्राजेन अकारो विशेष्यते न तु विपरीतं। अविरोध
मिन नंदन विधोस्य ऋणदीनामपि अनेनैव लुक् सिद्धे अवंतिकुंतिकुरुभ्यो लुग्वचनवैयर्थ्यापत्तेः। तेन कोसल्येति सिद्धं। नंदनदादाहतद्राजस्या राम
कारस्येति। कारू वीति। कुञ्जङः। करूः। नंवष्टिमूल वियुजादितात्कः कृतपाः। एतेनबहुषु तेषुमिसूर्धन्यप्राचः प्रत्ययः। अणिञोः। यद्यपि स्वात् प्र १२६

स्य याः प्रकृताः। व्यङः प्रत्ययत्वेन लक्ष्य सिद्धिरप्यनयोरूहा। तथाप्यादेशत्वमेवोचितं। पक्षेनेयिततसंयोगे इति नकारस्य यथा। अणिञोः शितिपवाः ओ
स्वरसात्। इत्यभिप्रेत्याह। यणादेशा स्यादिति। ननु येन नाव्यङ्न्यायेन सर्वादेशः स्यात्। ङि-चेत्स्स्यान्न्याय ङि-त्वेनान्त्याद्युपचरितार्थत्वात्। ष्य
ङो ङि-तस्य यङ्न्यायाविनि विशेषणार्थत्वादित्यत आह। निर्दिश्यमानस्येति। कौमुदगंधेति। अणः ष्यङ्। वाराहेति। इञः ष्यङ्। अणिञोः किं।
आर्त्तभागी। कृतभागस्यापि विदादित्वादञ्। ॥ इत्यपत्याधिकारः॥ ॥रज्यतेनेनेति शुक्लस्य वर्णान्तरापादानमिह रञ्जेरर्थः। कथं हारिद्रौ कुक्कुट
स्य पादाविति। उपमानाद्भविष्यति। लाक्षारोचनात्। वृत्तिकृत्तु शाकलिकस्यैवश कलकर्दमावपि स्त्रैवेत्सिसिद्धौ सपा। आभ्यामिति। भाष्यादौ तु नैतद्दृष्टं। नी
त्येति नीली। ओषधिविशेषः नक्षत्रेण। नक्षत्राचंद्रमा युक्तः कालः। इति विषयेन हि लुके वेदमसममभिद्धानाः प्रत्ययं लभंते। पुष्येणेति। पुष्यसमीपस्थे
न चंद्रमसेत्यर्थः। पाष्टिदत्ति अयं च विशेषः ष्टवस्त्वात्तु रत्न विलाल्लुप्यनेनेनाद्यस्याभ्यास नत्वोनेश्व इति विशेषगम्यमाने पि लुब्भवत्येवेति भावः।
ङः। विशेषं उदाहरणमाह। निष्पुनर्वसवीयमहरिति। अविशेषेतु अद्यपुष्यधातुराधीयोग नपत्नुपविशेषइति अणडुबच्छस्यापि लुप्स्या
दितिवाच्यं। पूर्वीपर्युक्तेनेन अश्लेषेन स्पनिराकांक्षत्वात्। एतेन वहिमध्ये पवादन्यायेपि नतं। अभिन्दृक्षीति। तथा चश्रोत्रवार्तिकं। दृष्टं सामनि
जाते चाप्यटिद्द्विर्विधीयते। इतिजानेर्थेयाद्विरणस्यावकाडिदित्वन्त्यपः। औशनं भिषजिजानेः। औशनभिषः। औशनभिषजः। इह हि प्राग्दीव्यत इति प्राग्भी

णात्कालाहृत्याबाधितः। संधिवेलादिसूत्रेण अनिप्रसक्तः इत्ययं हि रूत्कोण। अनो वादितं एनत्र मूले स्वरस्थानेन स्थितेन। वामदेवाद्य
स्येति लोपेन सिद्धे अड्यो डित्करणं स्वरार्थम्। ययतोश्चेति सूत्रेण विधीयमानेन यदत्र स्वरस्य यदेतस्य अंतोदात्तत्वे अवर्णमदेय शब्दे
माभूत्। किंतु अव्ययपूर्वपदस्वर एव यथा स्यात्। ननु कृते पि डित्वे यतो ऽनाव इत्यस्य प्रवृत्तिः कुतो नेति चेन्न। परिभाषाबलादित्यवेहि। तथा
हि। निरनुबंधकग्रहणे न सानुबंधकस्येति ययग्रहणे ऽयग्रहणं न भवति। तदनुबंधकग्रहणे नातदनुबंधकस्येति यदुग्रहणे ड्यदुग्रहणं
न भवति। इममेव परिभाषेद्वेव डित्वेन ज्ञाप्यते। नत्रो ऽबाधाः प्रयोजनेष्वरणगुणे निसूत्रेन व्ययग्रहणं तव्यद्ग्रहणं माभूत्। दिव औदित्य
त्रुदात्वेन माभूत्। द्वितीयस्योऽप्यङ् ग्रहणे च ... हणं माभूत्। श्वयतेरः। अश्वत्थेह अशिश्वियत्। परिखोरच। तदंकाग्रहणे
नेव्यं। नेह पुत्रपौत्रैः परिरतः। नवोहनि। बारावड्डति भुक्तो हि एइत्यर्थः इति निवृत्तिकाराः। अवदित इति तदर्थः। तथा च कल्पसूत्रे पुण्यक
हारः उच्छिन्न इति सर्वं जुहोतीति। सास्मिन्पौर्णमासीति सूत्राद्वा कृतवेत्यनुवर्तते। तेन सम्पन्नादेवमत्ययाः। ... डिलान्। एनेशास्त्र
णविहितो नियमः। तस्मिन्समुदायेन गम्यते। तत्स्यमिति। कथं तर्हि उखाऽग्निः न ह्यसौ भस्तु इति चेत्सत्यं। नेदार्थे दिगादित्वाद्यदित्यादु राम
दभवद्रे। दभीति। संस्कारश्चेह उखावर्णादिना। यत्तु संस्कृतार्थप्राग्वहते शिति वग्व दृश्यते सत्तर्पानात्रानेन चेदभासंस्कृतोपि रोचिके १२७

एवमुदकेन श्वयनीति। छित्वरत्कृ। इहेव सूत्रे निपातनात् संप्रसारणाभावः। इतिवाछादिति। सहि लोकिकी विवक्षामनुसारयति सू
त्रे संज्ञायामिति निवृत्तिरुक्ता प्रक्षिप्तं। पौर्णमासीति। महाराजप्रोष्ठपदाट्ठञित्यत्र तदस्मिन्वर्तत इत्यर्थे पूर्णमासादण् उपसंख्यानाद
ण्। वातेरुद्राङ्गिति शान्तशब्दो नेनुवचनः। सोमेति। हलस्तद्धितस्येति यलोपः। वायव्यमिति। ओर्गुणः। वांतो यि प्रत्यये चादेशः। उषस्यमिति
उषस्‌शब्दस्त्रीलिंगो दिवो दुहितरं देवतावक्ति। एनञ्छुपेवासं सुवर्थमित्यादिमंत्रेषु प्रसिद्धम्। शुनासीरीयमिति। शुनश्च सीरश्चेति
द्वंद्वः। शुनो वायुः सीरं आदित्य इति निरुक्तिकाराः। अन्ये तु एकमेव शुनासीर मिंद्रगुणमाहुः तथा चाश्वलायनः। इंद्रो वा शुनासीर इति मं
त्रवर्णाश्च। इंद्र शुनासीरमस्मिन्यज्ञे हवामहे। मरुत्वतीयं। मरुत्वंसं। अग्नीषोमीयं। अग्नीषोम्यम्। वास्तोष्पत्यं वास्तोष्पतीयं। वेश्म
भूर्वास्तुः रश्मिर्वा मान। वास्तोः पतिर्वास्तोष्पतिः। इहेव सूत्रे निपातनात्साधुः। गृहमेधीयम्। गृहमेध्यं। गृहमेधशब्दो ऽकारांतः। मरुतो गृ
हमेधेभ्य इत्याश्वलायनः। गृहमेधास आगतेति मंत्रलिंगं च। कालेभ्यो भववत्। कालेभ्यो ये भवे प्रत्ययास्ते स्यन्तेनेन स्यदेवते त्यस्मिन्नि
षये ते न सूत्रेण तिदिश्यते। वत्करणं सादृश्यार्थं तेन यस्माद्यो विहितः ततः स एव भवति। तथैवोदाहरति। मासिकं। प्रावृषेण्यमिति। सका
रंति। अन्यथा प्रकिया लाघवाय प्रकारमेव पर्वबदिति भावः। तस्य सस्रहः। चित्रवुंदात्युदात्ते अणो वांतं प्रतिपदमनुक्त प्रत्ययमिहोदाहरणं त

थाहि। अविन्नाद्दग्वस्थेनेऽनुदात्तादेरञ्। गोत्रांताद्वुञ्केदारादिभ्यः प्रतिपदं यआदयः इत्याशयेनोदाहरति। कार्कं। बाकमिति एवं वा
कम्बू। काकवककङ्कशाष्टा आद्युदात्ताः। प्राणिनां कुप्वीणामिति फिट्सूत्रात्। प्राणिविशेषवाचिनां शब्दानां य आदिर्गताः कवर्गपवर्गेन
नियः षासुदात्तः स्यादिति सूत्रार्थः। अथादिः प्राकूशाकटेरि धिकृतं। यत्तु रत्नोन्यासे च शोककमित्युदाहृतं तत्साभादिकं। खंडिकादिषु शुककस्य
हृस्वभाष्ये रत्नौघपठितत्वे नाऽनेनतादित्यवधेयं। गामिसादिभ्यो ण। भैक्षमिति। अचित्तवाह्ठक्प्रासः गार्भिणमिति। अनुदात्तादेर
ण्यामः। सतितस्मिन् आद्युदात्तत्वं टिलोपश्च स्यात्। युवतीनामिति। इतिकारात्सकम्भिक्षादिगणे युवतिशब्दस्य गितात्तत्ता मध्यान्ति पुंव
दिसाहुः। तन्त्रानुदात्तादेरञं बाधितुं पाठः। भस्याढे तद्धिते पुंवद्भावः सिद्धश्च प्रत्ययविधावितिप्रागेवतिप्रत्ययनिषेधो सत्यां कनितमुरुपानि
न कतिनेतनयाऽऽद्युदात्तता। तथा वस्त्वा संघेयो वामिति रूपं तन्मते सिद्धं। किंतु नेतदुच्चं भाष्यवार्त्तिकयोरिह युवतिशब्दपाठस्य प्रत्याख्या
नात्। तथा चेह औत्सर्गिकोऽण् नतु भिक्षादित्वप्रयुक्त इत्यवधेयं। यौवतं ता इति। एवं च गार्भिणं यौवतं [illegible] इत्यमरोपि। अतः सम् इति सं
पुस्खवीरयोऽवतत्पुरुषाजोः केवलमपि एतल्हारिणी इमिश्रीहर्षोक्तिश्च भाष्यमते पिनासंगतेतिभावः। आत्सणोमा णव। ततुत्रयोप्यमी रहाः राम
तेभ्यः प्रकृतोयमेवास्क। नहि वृद्धान्तप्रत्ययनिवारूपेविशेषोस्तिनवास्वरेऽभययथाप्याद्युदात्ततानुस्तुनोऽनुवर्तिष्यतेऽस्वरितत्वासर्य। १२८

अन्यतो विधानार्थंयन्नवचनं न सिद्धार्थकथनपरं तान्निक्रमाह। ष्ठलादिति। ष्ठष्ठशब्दः स्तोत्रविशेषस्य संज्ञा। ष्ठश्च इति ष्ठानां समूहः
कथं तर्हि ष्ठष्ठ्यः षडह इति। मत्वर्थलक्षणये ये हियाऽञेन। वृत्तिकृतानुवादान्तिकान्तर्गतः सहायदाद्योपि स्त्वेनास्मिन्। अनुदात्ता
देरञ्। दृहस्त्वेचित्रेचेनउदाहरणे। अविन्नात्तु। आष्टपिके शाकुलिक मित्यादौ परत्वाट्ठगेवस्यादाशयेनाह। कापोतमिति। कपोतमयूर
शाद्योमध्योदात्तौ लघावंतेइति फिट्सूत्रात्। खंडिकादिभ्यश्च। आद्युदात्तार्थवचनं। अविन्नाट्ठकोबाधनार्थं च। चरणेभ्यो धर्मवत्। पस्याः
प्रकृतेः यः प्रत्ययो धर्मविवक्षायां स ततः स्यादेव हेप्यादिरर्थः। वुञादयो हि चरणेभ्यो विवक्ष्यन्ते। चरणाद्धर्माम्नाययोरिति तुन त्रपात्तिकं न
दृष्यनेना तिदेशास्त्वेणञ्जापितमिति बोध्यं। काठकमिति। गोचचरणाद्वुञ्। छांदोग्यमिति। छंदोगौक्थिकेति ञ्यः। विषयोदेशे। तस्येतनुव
र्ततइत्याह पञ्चालानामिति। ओविकि विषयमिति। क्लीबत्वं लोकात्। सोस्यादिरिति। अक्षरेयक्राणितिवेधनम्पक्रादिच्छेदः। नहात्वं कास्यमानार्क
प्रभृतः अस्येत्यादि मनिप्रत्ययः स्यात्। यूआदिमान्तसप्रगाथश्चेत्। प्रगृह्यन्त इति प्रगाथः। अक्तर्त्तरिच कारकेई तिकमेणिघञ् पृषोदरादित्वाद्ध
नकारस्कोलोपः। कृदन्नायं। चतुर्थपंचो पादौ वाहनेप्रगाथेपुनरभ्यसितौ तत्रैमोरवस्मेत्तइत्येवमादिवचनाद्यद्वेप्यौ चौ सिद्धतेः च्छयंतेस
प्रगाथः। चेष्टुभमिति। कुद्रीकुदीरइत्यादिवत्तस्थिकेऽतेलिंगान्यत्वं। संग्रामे। प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च प्रथमात्तेभ्योऽस्येतिषष्ठ्

नार्थे संग्रामेऽभिधेये ण्यत् स्यात् । तदस्यां । प्रहरणं किं । माला भूषणमस्यां । क्रीडायां किम् । खड्गः प्रहरणमस्यां सेनायां । घञः स्यान् । रा
घञः किं । श्येनपतनमस्यां वर्तते । क्रियायां किं । प्राकारोऽस्यां वर्तते । तदस्यामिति प्रकृते पुनः सास्यामिति करणं किं । क्रीडायामित्यस्यानुवृत्तिमा
भूदिति । अत एव दण्डपातोऽस्यां तिथाविति । तदधीने नेदं द्वितीयां नादध्येन रिवेदितरिव प्रत्ययस्यानुद्विस्तदुहणमधीयाने विदुषि
च इत्थं विधानार्थं अन्यथा उत्तरत्र ऋतुवसंतादीनां अत्राद्यास्मिकृतया अध्ययनासंभवेन वेदितर्येव प्रत्ययः स्यात् वसिंहाने तु द्विस्तदुहणसा
मर्थ्यात् ऋतुवसंतादयः शब्दाः तत्र लिपादृष्टं ग्रंथे योगे ण अपि प्रत्ययं लभंते । छंदस्थ्यादि । ऋतुविशेषेति । ऋतुशब्दस्तत्र गृह्यते । तथाहि
सति उक्थादिषु पठ्येत । नापि ऋतुपर्यायाः । उक्थादिषु पठ्यते शब्दस्यागादि इति भावः । अग्निष्टोमिक इति । संस्थाविशेषवचनेनत्यापि अ
ग्निष्टोमशब्दस्य न तत्संस्थाके क्रतौ निरूढः प्रयोगः । वासवदत्तामिति । गुणरूपो ग्रंथविशेषः आख्यायिकेति अधिकृत्य कृते ग्रंथ इति स
त्रे हरदत्तः । सर्वादेरिति । सादेरित्यत्र अथर्वितः सशब्दस्य ग्रहणं सर्वादेः पृथगुपादानं एतदपि अथर्वित्सलिंगापा ज्ञापकं । सवार्तिक इ
ति । वार्तिकांतमधीते इत्यर्थः । अनेन वचनेन अव्ययीभावे अव्ययीभावे चाकाले इति सहस्य सः न तौ लुक् । इक् इति । पदशब्द उत्तरपदं यस्य राम
तस्मादिकन् स्यात् । गतशब्दात् संख्याशब्दाच्च परोऽयं पद्धितु शब्दः तदंतात् इकन् स्यात् । पौर्वपदिकार्थः । गतपदिक इति । अत्र च मिकारो वकुल १२५

अणो

२५

स्त्व

ग्रहणं कृत्वा ज्ञानपथ इति । अणमप्युदाजहार । दकन्ववद्धलं पयोत्तरपदादिस्कन्थ्यादंतयणि भितिन्यासकारः । वसंतादिभ्यष्ठक् । उक्था
दिषु वसंतादयः शब्दाः नैवावसंतादिषु तथा तु नक्षत्रमित्येव । अथर्वण इति । अथर्वणा प्रोक्तोऽथर्वा । उपचारात् । यद्वा । तेन प्रोक्तमिति प्रकृ
त्य ऋषिभ्यो लुग्वक्तव्यः । वसिष्ठः विश्वामित्रोऽनुवाकः । इत्युदाहरस अथर्वणोक्ता । अथर्वा । आथर्वण इति शेषिकः प्रकरणेनेभ्योत्कोः साधुः ।
ऋष्यंधकविष्णिकुरुभ्यश्च प्रत्ययांतात् क्षत्रियगोत्रप्रत्ययांतादार्षप्रत्ययांतात् जिनश्च परयोर्युवाभिधायिनोरणि योर्लुक्स्यात् । कुर्वादिभ्यो ण्यः । कौ
रव्यः पिता । कौरव्यः पुत्रः । ऋष्यंधकेत्यण् । श्वाफल्कः पिता । तत इञो लुक् । श्वाफल्कः पुत्रः । वसिष्ठादृष्यण् । वासिष्ठः । पिता पुत्रश्च । तिकादिभ्यः
फिञ् । तैकायनिः । ततो ण्लुक् । तैकायनिः पुत्रः । ऋष्यण एवेति । पाणिनशब्दे तु औत्सर्गिक एवाण् इति भावः । यद्वा । पाणिनशब्दो यौगिको न
तु ऋषेर्योरूढः । नु मिथो नुरूढस्येव ग्रहणं एतज्ज्ञापकाद्योनेन गवेतः पाणिनेः सिद्धमिति वार्तिकनिर्देशाद्दाक्षी पुत्रस्य पाणिनेरिति भाष्याच्चेति ला
स्वा तमित्यवधेयं । अरुकमिति । संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति संख्यायाः अनिशब्दं नाम्नाः कन् । छंदो ब्राह्मणानि । छंदो ग्रहणं देवतिदं ब्राह्मं
मिप ण ग्रहणं न द्विरोषभंक्त्यर्थं । तेन पुराणप्रोक्तानां निदिषयता । नेह याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि । कण्वादिभ्यो गोत्र इत्यण् । आप
त्यस्य च तद्धितेनिय लोपः । याज्ञवल्क्यादयो नूतना इति सूत्रकारस्यान्वर्थैकमित्यतस्तेषां व्यवहारः । छंदो ब्राह्मणानीति किं । पाणिनीया व्याकरणं । । अथ चातुर्थि

रुद्रधिसम २

कां॥ ॥तदस्मिन्। मतुपोयमपवादः। सकळलोकनिरूढेयथास्यात्। नसाधुनिकसंकेतमिनेपो। येनदर्थइतिशाहुः। देशेनन्नाम्नी। तिउत्तरस्त्र
त्रयेप्यन्वेति। नननिर्दैतं। अंनभाविनएपर्थाहृतेः कर्मणिक्तः। चातुर्थिकेत्वमिति। चतुर्णामर्थानांसमाहारश्चतुरर्थी। तत्रभवाश्चातुर्थिकाः २
अध्यासादित्वाह्न्त्रू। नह्निनार्थेहिगोतुठ्शोतुक्स्यात्। तुंअवण्। स्त्रत्रेकुमुदशाहस्वद्धिःपाठेपि एकत्रोपानभवति। प्रथमतः कुमुदानां
श्वतुर्णांहृद्वंविधायद्वितीयेनकाशादिकु [redacted] मुदानद्वंद्वेनसहपुनर्द्वंद्वविधानात्। आदिशाहुः। प्रत्येकमभिसंवध्यनेतदाह। अरीहणादिभ्यइति श्री
जनपदेलुप्। नन्ना [redacted] सेव। नेहा। उदुंबराःसंत्यस्मिन्नौदुंबरोजनपदः। नचात्रलुवेनंनामधेयं। वक्ष्यमाणेनेति। अवर्णोपिधास्वरत्वादितिभावः।
नवटिलोपस्यस्थानिवत्वं। पूर्वत्रासिद्धेनस्थिवेधात्। नन्वेकदेशविकृतन्यायेनपदत्वादुत्वंस्यादितिचेन्न। वहिरंगत्वेनटिलोपस्यासिद्धत्वान्न रं
चषाष्ठीवहिरंगपरिभाषा। नपश्यदिनिवाच्यं। कार्यकाळपक्षाश्रयणात्। नन्वेवंओत्वोसाहोरुः। घटीआमलेकीत्यादोजश्वंचस्यात्। यस्ये
तिलोपेकृतेजवाशिष्टस्यस्यादिषितिपदत्वात्। नचमत्वं। यस्येतिलोपस्यस्थानिवद्भावात्। नचपदत्वेयचंनस्पदुरुविधिनासहकार्यकालतयाश्र
त्रासिद्धत्वेनेतिनिषेधादितिवेन्न। पदसंज्ञायांयथोद्देशपक्षाश्रयणात्। अनएवरामओइत्यवस्थायांपदत्वेनरुत्वस्यादेशस्थानिवद्भावेनसमोरुत्वादेः राम
पदत्वं। अन्यथाउभयतआश्रयेंऽतवद्भावप्रतिषेधात्पदत्वंदुर्लभंस्यादितिदिक्। मद्विशाद्येति। एतत्त्वसूत्रेलेखस्यसिनंन [redacted] याहि। प्रकृतस्यमत् १३०

पएवहिदितमनिदिश्यते। प्रक्रियालाघवायद्वतुवेवराक्रियते। एवंमतुब्द्ववनंअन्यतोविधानार्थम्। शिखायावलच्। दंनशिखासंज्ञायामिति
पंचमेवक्ष्यतिनदंदेशेपिशिखावलइतिरूपस्यसिद्धेयेइदंतुनिर्दतनाद्यर्थम्। देशेनन्नाम्न्यणेवाधनार्थंच। जुंअवेत्यादि। नडाद्यंनर्गणस्त्रत्रहये रुं १
सोत्रः पथ्यालुक्। एवंतक्षन्निप्यत्रापि॥ ॥इतिचातुरर्थिकाः॥ ॥शेषोलक्षणंचेति। स्यादेतत्। लक्षणेतावद्व्यर्थं। चाक्षुषादीनान्तुसेद [redacted] मिति
स्त्रत्रेएव्दार्थद्वादीनांतुसंस्कृतंभक्षाइत्यनेनसिद्धत्वात्तथाअधिकारोपियर्थः। तंविनापिघादीनांघुघुलंतानांअपत्यादिचतुर्ध्वपियनिषिद्धमपि अप २
कृतेलीपकंलेनवसुसाधत्वात्। तथाहि। आर्द्रकाशालेत्यादयोवृद्धाः। तेषांवृद्धाच्छइत्येवसिद्धेठकारादिपुपागसायोमिनेनतःप्राक्पादयःस्युःइति
गोत्रेक्षेतितुस्त्रविधिरपाहसिंगे। अन्यथासमूहस्यापिइदमर्थान्तर्भूतिनपंगोत्रचरणाद्बुञित्येवसिद्धेकिंतेना। किंचअपत्यापाद्यर्थानामनुरत्ता
नस्यदंतिचोपतप्रावायदितत्र [redacted] दयद्रुप्येरन्। तर्हिशाम्दीयतोपिन्नत्रेवण्यादिभिःसहपद्येरन्। अपोप्येनताप्यत्यादिप्यारत्नपेशेषाधिकारःकिं
तुअर्थसाकल्यार्थः। अन्यथासन्निहितेजानार्थएवघादयःस्युः। भवादौतुशाग्दीयत्नइतिविशिष्टावधिपरिच्छिन्नेष्वर्थेषुविधीयमानाः। अणादय
एवस्युर्नतुघादयः। चोपश्राक्षानुसत्वेतुघादयःसिध्येनीति [redacted] मेवाजानाधिकारानंतरेशाद्वपष्टवित्यादिभिःसहद्याद्विसुवकेप्यस्तुमतःप्राक्पादसा
मर्थ्यादिवार्थसाकल्यलाभात्। तस्माद्वयमिदंसूत्रमितिचेतोअन्योच्यते। अधिकारस्तावदावश्यकः। शेषिकोत्सर्गःशेषिकोनेतिवक्ष्यमाणत्वा

विषय र्यस्यलाभो यथा स्यात्। द्वौ विकल्पप्रयुक्तेकार्यविशेषं बंधनयितुं क्रियमाणः। शेषाधिकारएवं ज्ञापयति द्वौपिकान्मुनुवर्थ्यायादिस्यादि। एषवच्छे
कः सन्निधौ मनुष्विधौ वेभाष्येयश्चिनः इहतु सनंनेउपन्यस्तइतिनेत्रैवव्याख्यास्यते। एवं स्थितेविधायकत्वमपिनस्यसुवेचमिति नोनीवनत्रमिनं
रः कार्यः। स्थित्रहीनादपीत्यादि। वात्वनिकमेवेदं। स्तत्तुसंघातस्यैवग्रहणं अन्यथावैयर्थ्यात् सख्यानाचुदेशोनस्यात्। कुत्सितास्त्रयइति। इहव
कुत्री। हिरपिसुत्वः अतएवनिपातनात्कोः कद्भावः। नेनकद्भावेनात्तु यसंख्योनमितिनकर्तव्यं। दक्षिणापश्चात्। पाश्चात्यइति। कथंतर्हिपश्चान्
नेः कथ्यनेनुध्यमानः इतिश्री हर्षः नवद्विग्देशकालविनिपश्चाद्धेष्टसावकाशं सकं कालवाचकात् घुयुल्लोपाधेनपरत्वादितिवाच्यं। अग्रादिपश्चाद्
मजिनिडिमचात्युघुल्लोर्वाधस्यदुर्वारत्वात्। सत्यं पश्चात्तनं निइमिपश्चात्तनाः इतिकथं चिंत्योऽयं। कापिच्या [redacted] कापिशी। शाष्टास्फस्यात्। पोऽडी रा.प.
पर्थः। तदाह कापिशायनीद्राक्षेति। घुप्राक्। अपाचीदक्षिणा दिक्। द्वितीया पोवर्णः प्रकारोनतु [redacted] वेनाध्यः। यदिदं प्राग पायुदक्। इत्यादेनयादर्श
नात्। प्रागादयो द्विविधाः। अव्ययाअनव्ययाश्च। अव्ययानानाव्ययाः। अन्येतुन। उभयेपीहग्रहणंनेविशेषात्। अथकथंसंस्काराः प्राक्तनाइवेति।
कालवाचिनोव्ययात्परत्वात् घुघुलावितिवोध्यं। ओनराहइति। यदातुउत्तरादाहिपयमेनतोलुक्क्रियतेतदा औत्तराहवा औत्तरोदात्तः स्त्रियांडीपोक्षचो राम
ध्यः। आहत्तंतक्र आस्तुदात्तः। स्त्रियां टाप्। इतिविशेषः। वस्यतइति। ख्वसस्तकेदेस्यस्त्रौमद्देश्यात् [redacted] वहुवचननिर्देशात् जानपदवाचीत्याद्यनेनतुमद् १३१

पर्यायः। दिशोमद्राणमिति। दिग्वाचकादुत्तरपदस्यजनपदवाचिनः मद्रमिन्नस्याचामादेर्वृद्धिः स्यात् जितिणितिकितिचतद्धितेइत्यर्थः। पौर्वमद्र
कमिति। मद्देकदेशोमद्रशब्दस्यदेशेदिक्शब्देनसामानाधिकरण्यात्। नद्धिनार्थेतिसमासः। उदीच्यग्रामात्। दिग्ग्रहणंनिवृत्तं। शैवपुरमिति। प्र
स्वपुरवहानांचेतिवुञ्नभवति। वृद्धादितिद्वितेयानुवर्तते। भवनः उब्ठञौ। जश्वमिति। स्तितिचेतिपरत्वादितिभावः। एतदर्थमेवहिकसः सकारः
व अतएवनायंशाकारादिः। तथाहिस्तनिसिस्तसर्वर्थस्यात्। काश्यादिभ्यष्ठञ्ञिठौ। इकारउच्चारणार्थइति। अकारएवोभयत्राप्यनुबंधः तस्यविपर्या
स्तत्रे। प्रत्ययेविशेषार्थइतिभावः। आपदादिति। अंतर्गणसूत्रमिदं। धन्वयोपधाद्वुञ्। धन्वेतिनस्वरूपग्रहणंवृद्धत्वासंभवात् तस्माशयेनाह।
धन्वविशेषेति। ऐरावतंधन्वेति। यद्यपिसमानोमरूधन्वानावित्यमरेणपुंस्त्वमुक्तंतथापिनपुंसकोपिधन्वशब्दोस्ति। आष्टकंनामधन्वेतिभाष्ये
स्वपादानात्। शाहादिभ्यश्च। एभ्योदेशवाचिभ्यश्छः स्यात्। हर्वपक्षादिशाहेभ्यस्तद्देशवाचित्वाभावेपिपाठसामर्थ्याच्छः। सुखपाश्वेति। अत्रोत्सस्येति
सकारस्यलोपः। यस्येतिचेत्यकारस्य। अव्ययानांभमात्रेटिलोपस्यानित्यतांज्ञापयितुं लोपवचनं। कुखनीयइति। कुखनेज्ञानादिः। आषाढि
तात्तसोनतच्छः। स्वकीयमिति। गहादेराकृतिगणत्वाच्छः। धदेशवाचित्वेपि हर्वपक्षादिवत्। तथाचालुव्योगप्ररव्यानादिसूत्रेनहिस्वकीयस्यैव
त्या प्रत्याख्यानमितिन्यासः। केवलात्स्वशब्दात्तु अण्। सोवं। एतच्चदाशादीनांचेतिसूत्रे आकारे उदाहृतं। स्वा यमिति तुआर्क्तिताछः। चोडास्क। स्वपरज

अर्कांधूविरिख स्य ७

नदेवराज्ञो कुर्वन्ति स्त्रयं मि। तत्र राज्ञो न लोपे यत्नः कर्तव्यः। पर्वताच्च। कथं नहि नित्रयो रंरक्षो जन्यं पार्वती। येगिरौ रन्तु दिति। उच्यते पर्वतीय
स्य राज्ञ इमे इत्यर्थे छो न त्वदण्। शेषिकाच्छेषिकोने ति निषेधस्तु नास्ति। असरूपत्वात्। युष्मदस्मदोः। इह योगो विभज्यते। तेनेन यथासंख्यं न तथा हि
युष्मदस्मदोरन्यतरस्यां। आभ्यां छो वा स्यात्। त्यदादीनि चेति वृद्धत्वात् नित्ये प्राप्ते विकल्पोयं। ततः खञ् च। एवमुत्तरसूत्रे वियोगविना योगो वोध्यः।
तेनादेशयोः खञणभ्यां यथासंख्यं न। तस्मिन्नणि च युष्माकास्माकौ। तस्मिन् खञि चेत्यर्थः। ततः अणि चौ अत एव रत्र अण् ग्रहणमिति नोक्तं। तवकममकावेक
वचने। अत्रापि खञि अणि चेति वाक्यभेदेन संबध्यते। अतो यथासंख्यं नेति दिक्। असांप्रतिके। संप्रति न्याय्यं प्रसादो पद्यते। तत्रेन्याय्ये वर्तते
तथा च प्रयुज्यते। अनाम्य रात्रो अतिरिक्तः पद्ममः सर्वाण्येव संप्रतिपन्नोपयच रात्रे इति न न्यूनो नातिरिक्तः सम इत्यर्थः। इदानीमित्यर्थेपि
तर्हि संप्रतीदानीमित्यमरात्। ततोण्। सांप्रतं। तेनाविनयादेराकृतिगणत्वात् स्वार्थे ठगिति न्यासकारः। द्वीपादनुसमुद्रं यञ्। समुद्रसमया
नु समुद्रे। अनुर्यत्समया इत्यव्ययीभावः। सप्तम्यंतं चेदं विद्यमानक्रियाहारकं द्वीपविशेषणमित्याह। समुद्रसमीपे यो द्वीपस्तत्र भवः। कच्छादिभ्यश्चेति अण्
मनुष्यतुरंप्याप वादोयं। अनुसमुद्रं किं। द्वैपमन्यत्। द्वैपको मनुष्यः। कच्छादिभ्यश्च मनुष्यतत्स्थयोर्वुञ् इति सूत्राभ्यां पथा पश्च अणन्ता। कालाट्ठञ्। राम
इहकालविशेषवाचिनामेव ग्रहणं न तु स्वरूपस्य पर्यायाणां चेति वृत्तिन्यासपदमञ्जर्यादिषु स्थितं तत्तत्कालिकी व्याप्तिः कालिकः संवं १३२

धः इत्यादिप्रयोगाः विरुध्यंते। किंच विशेषा एव वाच्ये गृह्यंत इति निर्मूलं। मुनित्रयानुक्तत्वात्। यत्तु वदंति। स्वरूपं पर्यायश्च नेह गृह्यते ज्ञापकाभावान्नतथा
हि संधिवेलादिसूत्रेण संधिवेलाद्यृतुनक्षत्रेभ्योऽण् इत्यतो विअ शिवधीयते तेन बाधनार्थमिति देवो कार्यज्ञापकमिति। तच्चिंत्यं। इदं हि
विशेषग्रहणे ज्ञापकं न तु तन्मात्रग्रहणे तथा च न स्तन्हि न इति सूत्रे सायंप्रातिकः पौनःपुनिक इति भाष्यव्याख्यानाः कैयट आह। यथा कथंचित्का
८ लशब्दाद्ठञ् इति। तथा च नदीति सूत्रे नदीवाचिनां विशेषणात्स्वरूपस्यापि ग्रहणमुक्तं तथेहाप्युचितं नंदनदाह कालवाचिभ्य इति। एतेन कालि
के प्रत्युक्तेति सूत्रे कालिके। तिकस्वपादपक्षे कालाट्ठञ् इति कालिकमिति न दध्वा सिकंमपि व्याख्यानं। वृत्सादिमते तु कालात्कालशब्दाट्ठञ् इति। को
लाद्यत्र प्रकृते द्व इति निपात्यमिति सूत्रेणैवेवं परत्वा यात्कुकृ विलक्षनि वभंत्क व्याख्ये यं स्यात्। इह गोणमुख्यन्यायेना श्री। यत्तेने न कं देवपुष्यसा ह
चर्यात्कं देवपुष्यः कालः श्री हि पलालेस्माह चर्या हि। हिपल्लालः तत्र भवंकादेवपुष्यिकं। व्रीहिपलालिकमित्याकरः। अत्र प्रमाणं तु संधिवेलादिसू
त्रे अनेन कालग्रहणेन नक्षत्राणां विशेषणमित्याहुः। ननु पुष्यादिचान्द्रानां कालो मुख्योर्थः। लवविशेष इति युसादनादिति चेत्। नैवं। पुष्या
दिसमीपस्थेन चंद्रमसा योगात्तु क्षिनलक्षणया हि कालेवृत्तिः। सेवल्लुवृद्धारा अन्याख्यायते। पौषादिनिवृत्यर्थं न त्वेतावता कालो मुख्योर्थः। अ
नन्यलभ्यस्यैव ज्ञाप्यत्वादिति दिक्। एवं स्थिते कालवाचिभ्य इति लभ्यस्य कालप्रतिपादकेभ्यः इत्यर्थो बोध्यः। श्राद्धे शरदः। श्राद्धमिति कर्मनामधेयं।

श्च ह्रान्तु रूपस्त्वनेह गृह्यते व्याख्यानात्। रूढिशब्दो गमयन्तीति नात्र व्याप्तिः। प्रसज्यत। छन्दसि स्यादिति। एवमो ह्य इत्यादिना त्ववपि विकल्पितः पदे
घुघुलौ वा औ। शौवस्तिकमिति। नन्विह इकादेशो दुर्लभः तुटः प्रत्ययभक्तत्वात् स्यादित्वाभावादिके मेवं इत्ययं चोद्यं। न च परत्वादिक्। आंगत
यातेस्य बहिरंगता सा प्रत्ययसंनियोगशिष्टत्वात् तुटो न रंगत्वान् च स्वत्वभंगेन तु कृतकरः। इ सुसुतुकोना दिति कादेशप्रसंगात्। मैवं। चुच्छणादि
सूत्रे च कृते मतुप्यनाम्नि छज्वेतिस्त्वे च रक्षितेनेकादेशो नरंगेभ्यो बलवन्निमित्तापिनत्वात्। अन्यथा प्रत्ययाद्युदात्तत्वेके न इकादेशः स्या
दिति किं चेच्छत्वेन कृतत्वेकादेशप्रत्ययस्वरं बाधितुं वितं युज्यते॥ ॥सायंचिरं॥ ॥तैषमिति। तिष्यात्। भवादौ प्रत्ययः। ज्ञानार्थं तु श्रविष्ठा
फल्गुनी तिलुक्स्यात्। सूर्यतिष्येत्यत्र तिष्यपुष्ययोर्नक्षत्राणीत्यर्थे यलोपः। प्रावृषएण्यः। ऋतुणोपवादः। प्रावृषेण्य इति। प्रावृषि भवः जाते
तु ठपं वक्ष्यति। षाभ्यामिति सिद्धे प्रक्रियालाघवार्थं णकारोच्चारणं किं च। आवृषेण्यमाचक्षाणः प्रावृषेण अत्र णकारश्रवणमर्थमपि तन्नाणेना
क्विपू। णिलोपात् लोपः। यलोपः। सार्वत्राणं तलोपश्च। हेमनमिति। निनश्च द्विन इति टिलोपश्च न भवति। नलोपस्य समुदायस्य लोपे तत्पक्षे अन्तिमिति
[redacted] नक्तं तिभावादव यलोपत्व पक्षे तु यस्येति लोपेन स्याभावत्वेनासिद्धत्वात् स्वावकाशाद्वा। हेमंतमिति। ऋतुणिनकारलोपेन। तस्य सर्वत्र राम
तिप्रनिपदोक्तेनाणः सन्नियोगशिष्टत्वात् कारस्य छंदसि ठञ्। वसंताच्च। छंदसीत्येव नतः हेमंतात्। इह सर्वत्र ग्रहणमपकृष्यते नेनेलोकेवे 133

दंच। हेमंतिकं न नतोऽत्वतलोपश्च। एवं च भाषायामपि रूपद्वयमिष्यमिस्याहुः। एतच्च भाष्यविरुद्धं। भाष्ये हीदं सूत्रं प्रत्याख्यातं न चेद्धं। हेमंतप
र्याये हेमन् शब्दोऽप्यस्ति। हेमन्हेमन्नागते। गनिकणेनिस्मादेनौ हेन्ने मे श्रुयतः इति प्रयोगात्। न च भाषायां हेमन् हेमंतशब्दाभ्याम् ए
हेमने हेमंतमिति रूपद्वयं। छंदसि तु वृत्ता न नीयं। नैवं तनत्वं आअएण बाधः छन्दसि सवविधौ नावेकल्पिकत्वादिति। तस्माल्लोके रूपद्वयमे
वेतितत्वं। सायंचिरं। नन्वेते नरंगत्वात् प्रथमं तु टिम्लस्फुरित्यादावित्वस्फशब्दस्य प्रत्ययेन या अंगसंज्ञानिमित्तयोयुक्तस्य विधीयमानोऽन्तादेशो
नस्यात्। न च तुगेव कार्यः। तस्य इवं तिन या भानस्तत् नित्यत्वविसर्जनीयाभावप्रसंगात्। अत आह तुटः प्रागिति। इत्यादीति। आदिशब्दाथ
स्तुघ्ना कालतनेषिति। सायंतनमिति। स्यते षण्जिसायशब्दो दिवसावसाने रूढः। तस्य प्रत्ययसंनियोगेन मांतत्वं निपात्यते। अन्यत्र तु कारांत
एव सायाह्नः। आह च संख्याविसायपूर्वस्येति भारविश्वसायमंउनमभिस्वरयंत्य इति। एतच्च वार्तिकमतं आह हि। सायंचिरस्योर्मकारांतत्वं
प्रत्ययसन्नियुक्तमिति। भाष्ये तु सायं शब्दस्य पाठ इह सूत्रे प्रत्याख्यातः। स्वरादिषु पठितात् लोपमिति मांतात्। अव्ययत्वेनैव प्रत्ययेरूपसिद्धः। न
न्वेवं घुमंतावकालाहृत्रि अनिष्टरूपापत्तिः। तस्य कालवाचित्वाभावादित्याहुः। येद्यपि कालबोधकत्वमाचं लौकिकसाधारणं च निपोग्रहा
तेन त्रुठकनारविनयोगात् सायशब्देऽप्यसितया प्यनभिधानाद्व अन्ये तु बोध्यं। पूर्वंतनमिति। प्राह्णः सोढोस्य प्राह्णेतनः इत्यादयर्थम्। तत्र हि सप्तमी

नास्ति। जाताद्यर्थे तु घकालतनेष्विति लुका सिद्धं। विरलमिति। विरशब्दस्य स्त्रत्वम् उपादानात् घुषुलाव्विस्रः। अपादीनि। डिमचोडितं शास्त्र
मकर्तुं नवजातः। ननु जातादिषु एणादयः सिद्धा एव। चास्कयं रूपमित्यादि सिद्धये शोषइति स्वत्रस्य लस्सण लोके अधिकारता च घादयः नस्मा
ज्जाताद्यर्थनिर्देशोऽव्ययः नवजातादिषेवेति नियमः सुवचः चास्कपमित्याद्य सिद्धेः। नचास्तेशेने इत्यादौ तु अनभिधानादेवन भविष्यतिअगुल्मा
रवनति। रक्षमूलादागतः इत्यादौ यथा। समर्थविभक्त्यस्य आक्षेपादेवलस्यंते। चास्कषमित्यत्र न तौ या यथा। तस्मान्नत्र जात इत्यादिस्त्रश्चातिथ्य
र्थानि निचेत्। अत्राहुः प्रावृषेण्यवित्यादौ न पचादौ स्तत्र न तत्र विशेषवक्तुं जातादयोऽस्त्रित्वादवर्षपवक्तव्याः नचयोगविभागेन विमि किं विशेषसम
भिव्याहारेण वोक्ताः स्पष्टार्थम्। यानि तु निरपवादान्यर्थादेशात् निलनलक्षीत कुशलाइत्यादीनि तानि स्पष्टार्थान्येवेति। प्रवाहिक इति। ५
विभाषापूर्वाह्णापराह्णाभ्यामित्यस्यापवादः आर्द्रकः मूलक इति। नक्षत्राण्णोपवादः। प्रदोषक इति। निशाप्रदोषाभ्यां चेत्यस्यापवादः। अवस्क
रक इति। औत्सर्गिकस्याणः केचित्तु संज्ञायां शरदोवुञिति सूत्रस्थं संज्ञायहणं कृतनलक्षेस्नेनस्य यत्नं अनुवर्त्यंति। तिरूमित्कारः नपांमूते ऽसंज्ञा राम
यां यथा यथं अण्दयोपादेयश्चबोध्याः। अमावास्याया वा। संधिवेलाद्यणोपवादः। अमावस्यदन्यतरस्यामिति सूत्रेण मा पूर्वाहसेऽप्यतिदेशे १३४
पक्षेह्रस्वो निपात्यते। एकदेशविकृतस्यानन्यत्वाद्ध्रस्वपक्षेऽपि अणुनोऽस्त्र एव। अमावस्यः। अमावस्यकः केचित्तु संधिवेलादिषु उहस्तनेचहस्रो

पथमधीयते। नेषां दीर्घपक्षेन स्यात् विकल्पात् प्रकृतेरग्रहणादितिन्यासकारहरदत्तादयः। वस्कतेस्त अत्र नवृद्धेर्द्धि प्रक्रमिन्नतस्येदं ३१
ग्रहणमित्याश्रित्य ह्रस्वपाठे पि समर्थयितुं शक्यते। अच्च अमावास्याशब्दादकारप्रत्ययः स्यात्। अयमपि पागवहुभाभ्यां बोध्यः। नदिह अ
मावास्यायां जातेह्रस्वदीर्घाभ्यां प्रत्ययत्रयेण षड्रूपाणि। श्रविष्ठाफल्गुनी। इह सूत्रे स्वातिशाद्धोहस्वांनेइतिके चिद्धरदत्तादयः। माधवस्तु स्वा
ती। तिष्यनिति। यतंत्र एवमि। तथाहि। अव्ययात्त्यपिति सूत्रे चैशेषिकाणां विप्रतिषेधनिरूपणप्रस्तावे सोवातेइति भाष्यमुपादाय कैयटेनोक्तं। नतार्थे
ण। जातेतु श्रविष्ठेत्यादिना लुक् स्यादिति संधिवेलादिसूत्रे हरदत्तेनाप्येवमुक्तं। न च हरदिकारादितिजी षं नास्वाती शाब्दाज्जातार्थे अणः श्रव
णाभस्तिवति नाच्यं। लिंगविशिष्टपरिभाषया लुको दुर्वारत्वादिति भावः। माधवस्तु जातार्थे ष्यङ् पंतस्य सोवातेइतिरूपमाह लिंगविशिष्टग्रहण
केवलस्याग्रहणात्। एतच्चानेसातेस्यगमनेइत्यत्रधातुवृत्तौ स्पष्टं। श्रविष्ठादितिनि। श्रविष्ठाधनिष्ठाः इत्यादीति। आर्द्रशब्दान्नी। अनुराधः स्वातिः
तिष्यः पुनर्वसुः हस्तः विशाखः अषाढः बहुलः इति कापर्यायस्य बहुलाशब्दस्य समाहारद्वंद्वे नपुंसकह्रस्वत्वे नस्त्रेनिर्देशः। उपसंख्यानमिति।
प्रकरणलुक इतिबोध्यं। स्थानांतेति। गोशालखराशब्दस्य विभाषा सेनेति नपुंसकस्येवस्त्रे निर्देश इत्यर्थं। तेस्माह चेयो लुग्वरशाले ब्धवमेव। नचैवं स्त्री
त्वपक्षे लुङ्विति प्रतिमिनत्यं। लिंगविशिष्टपरिभाषया तेना पिलुक् सिद्धेः यघपिदाचंनयोः पाठेपि नक्षतिः एकदेशविकृतन्यायेन कीवेपिलुक् सिद्धेः न

थापिलाघवार्थं ह्रस्वपाठ इति हरदत्तः। वत्सशाल इति। वत्सशालायामित्यपि बोध्यं। दृषदादीनि। आदिशब्दादभिजित्। आभि[illegible]तः। अश्व
युक्। अश्वयुजः। [illegible]तः यद्यपि कृतकीर्तित्तेजानलव्वत्तयोर्व्याप्येन थापि स्थगुपादानं कृतनत्त्वकी। नत्वप्रकारके मिबोध्येऽदं तं यद्वो पिकाः सा
मपि धवइति बोधयितुं अत एव जाते लुग्भाजां कृते लुकि इति बोध्यं। आयभवेन च तत्र भवइत्यनेन गतार्थता आयभेव स्वभवस्य चाविशिष्टाविशिष्टे
भेदात्। उपजान्वादयः सामीप्येऽव्ययीभावाः तेषां समाहारद्वंद्वे सौत्रं पुंस्त्वं। [illegible]कूने इह तत्राहूत्यादिर्नाविकृत्तिराधेयस्याधारा[illegible]त्वरिमाण
नतिरेके श्वेत्यर्थद्वयमपि स्वतेने। [illegible]ग्र इति सुग्रसंभाव्यतेनत्वरिमाणमानिरिच्यते वायः सेनादिः स एवमुच्यते। कोशाड्ढञ्। कौशेयमिति
रूढोयं। कोशसंभवस्य सत्कार्यवादाश्रयणात्। मतांतरे तु विकारप्रकरणे एण्या ढञित्यस्यानंतरं कोशाच्चेति पाठ्यं। तथा च त्रामिकं। विकारे कौ
शात् सूत्रसंभूते सूत्र्यानुपपत्तिरिति। उसेच। योगविभागः उत्तरार्थः। आश्वयुज्या वुञ्। उसेरपेवादो ऽपवादः। अकारः स्वरार्थः उत्तरत्र रस्यार्थश्च। [illegible]
यत् एणा। क्रू णकि। मासे देया भिक्षा। तत्र भवः कालादिति निवृत्तं कालसंबंधस्य तत्रेत्यस्य निवृत्तये पुनस्तत्र ग्रहणं तत्र [illegible]तस्य तस्य तदि
त्यस्यापातं तयेतत्र ग्रहणमिति वाच्यं। तदस्येति सूत्रस्ये तउत्तरत्रापि सुपवत्तात्। दिगादिभ्यो यत्। दिशावर्गपूगपक्षधान्यमित्रमेधा अंतरप। राम
हस थिन्। र[illegible]। अलीक। उखासाक्षिन्। आदि। अंत। मुख। जघन। मेघ। यूथ। उदकात्संज्ञायां। न्याय्य। वंश। अनुवंश। देश। काल। आकाश। दिगा १३५

३१

दिः। मुखजघनशब्दयोरिह पाठो शारीरावयवार्थः। सेनायामुखे जघने च भवं मुख्यं जघन्यं। दृतिकुक्षि। दृतिश्चर्मविकारः शारीरावयवविशेषश्च
तत्र भवं दार्तेयं। कुक्षिशब्दोऽधूमादिः ततो धूमादिभ्यश्चेति वुञि प्राप्ते ऽनेन ढञ्। कलशिर्घट इति। तथा च दंडाहते कालशेयमरिष्टमपि गोरसे इ
त्यमरस्य व्याख्यायां मथपात्रं कलशिरिति रुक्तं। कलशिस्तु दधि गुर्वी बिलवालो उयं तिडुनि माघः। वस्तिर्नाभेरधो द्वयोरित्यमरः। तत्र भवं वास्तेयं। अ
स्तीति तिडंतप्रतिरूपको निपातः। स च तिडंतेन समानार्थो विद्यमानार्थश्च। आद्यो यथा। अस्तिक्षीरा गौः। द्वितीयो यथा। अस्तिमान्। धनवानित्यर्थः। [illegible]
न दिहाविशेषपाठ द्वयोरपि ग्रहणं। आस्तेयमिति न्यासकारहरदत्तौ। ग्रीवाहेयं विषास्थाहीत्यमरः। ग्रीवाभ्योण्। ग्रीवाशब्दो धमनीसंघाते च तत्रै
तु स्कूनावयवत्वभेदविवक्षया तत्त्वेव बहुवचनं निरो कूनावयवभेदविवक्षायां तु एकवचनांतादपि अण्ढञौ स्त एव। गंभीराञ्ञ्यः। पंचजनादुपसंख्यान
पांचजन्यः। परिमुखादिभ्य एवेति। दिगादिगणानंतरं परिमुखादिगणः पठ्यते न स्यात् सामर्थ्यादिह स्तत्वे ऽव्ययीभावपदं तदन्तात् परमिति निर्णीयते।
न हि परिमुखादीनां कार्यं तत्र विहितमस्ति। येन गणपाठश्चरितार्थः स्यात्। परिमुखादिभ्य इत्येव तु न सूत्रितं। बहुव्रीहितत्पुरुषयोरपि प्रसंगात्
त्। अव्ययीभावग्रहणस्योत्तरत्रोपयोगाच्चेति भावः। परिमुखादिगणे प्रतिशाखशब्दोऽपि बोध्यः। तथा च शाखया सह वर्तते। प्रतिशाखं
भवे प्रातिशाखं। अव्ययीभावाच्चेति भवार्थेऽप्यइति माधवः। कर्णललाटात्। अलंकारे किं। कर्णपल्लवाद्यं। तस्य व्याख्यानः। इति शब्दो वाक्यार्थपरा

मश्नति। नक्षमीपेश्रूयमाणश्चकारस्तत्रभवइतिवाक्यार्थमाक्षिपति। व्याख्यानव्यस्यग्रंथस्यनामप्रतिपादकेनचशात्त्वाल्लक्षणाणावेत्य
त्रनाग्रहः। तस्मात्षष्ठेनाख्याख्यानकरणेसप्तम्येतात्तुभवार्थेप्रत्ययाःस्युः। यद्यपिनस्येदंनत्रभवइतिसत्राभ्यांगतार्थता। तथापिवंशादीनाप
वादानर्थकेमिमावध्यनिर्देष्टव्यावेव। प्रसंगात्तुअणादिकंविधीयतइतिध्येयंव्याख्यानव्यनाम्नः किं। पाटलिपुत्रस्यव्याख्यानी। सुकोसलापा
टलिपुत्रेहितयाव्याख्यायेते इदंकुसन्निवेशाविशिष्टमितिनत्विदंव्याख्यानव्यस्यनामग्रंथेषुवव्याख्येयत्वस्यसुप्रसिद्धत्वान्नामग्रहणस्य
चप्रसिद्ध्युपसंग्रहार्थत्वात्। बह्वचोंतोदात्तात्। अणोपवादः बह्वचः किं। द्यवष्ठकंवक्ष्यति। एकाचुप्रत्ययहोदीर्यःसौपानेडं। अंतोदात्तात्किंसंहिता
याःसांहितं। गतिस्वरेणाद्युदात्तोयं। पौरोडाशा। पितान्डीषु। पौरोडाशिकी। पुरोडाशिकीशब्ददोने। कर्मणिघञ्। इहैवनिपातनादस्यउत्वं। छंद
सोयदणौ। द्व्यज्लक्षणस्यठकोपवादः। छंदस्यः। छंदसः इहअर्थयोःप्रत्ययाभ्यांयथासंख्यंन [redacted]। अस्वरितत्वात्। चतुर्होत्रक इति। चतुर्होतेति
त्रयीवीहोता। घोरधुर्यरित्यादिमंत्रस्यनामधेयं। आर्चिक इति। आदिशब्दात्। प्राथमिकः आध्वरिकः। पौरश्चरणिकः। नामाख्यातग्रहणेसंघातविग्र
हीतार्थमितिवार्तिकं। तत्रविग्रहीतग्रहणमाख्यातार्थंनामशब्दात्तुद्वयुक्तोदेवसिद्धः। नामिकः आख्यातिकः नामाख्यातिकः। ऋगयनादिभ्यश्च। राम
देशिति। आदिशब्दाट्ठकोः। आर्गयन इति। अयनशब्दोभावसाधनः तेनसमासे। अनोभावकर्मवचनः इत्यंतोदात्तः। अभेदोपचाराद्ग्रंथेदृशांडहग[redacted] १३८

धा२

ध्याप्तः ः। औपनिषद इत्यत्राप्येवं। विद्यायाश्शिक्षाशब्देभ्योयच्छकृप्रासः। व्याकरणशाखानुवृद्धाष्ठकः। ऋगयाः। आयःस्वामिश्रायोभागःसयुक्तिमत्
स्यंततदायस्थानं। बहुवचननिर्देशःस्वरूपग्रहणनिरासार्थः। वृद्धाट्ठंपरत्वादयंबाधते। आपणिकः आकरिकः। वि योनि। वि योनि धार
कृतः संबंधोयेषांतेभ्योवुञ्स्यात्। अणोपवादः छंतुपरत्वाद्बाधते। आचार्यकः मातामहकः मातुलकः। ऋतठञ्। विद्यायोनिसंबंधेभ्यइत्येव म
४८। तदोर्वुञोपवादइति। उकञितिवक्तव्येतपरकरणंअग्रहणंचविस्पष्टप्रयोजनमितित्रोचः। अत्रेयंचिंता। पैतृकीविद्येत्यत्रऊठ्वर्थंठञ्। नचविष्टि
तिस्त्वेतत्कस्यग्रहणेनसिद्धमितिवाच्यं याहशीउत्ताद्यसिद्धेः नदनुबंधकग्रहणेऽनदनुबंधकस्याग्रहणात्। गोत्रादंकवत्। अपत्यप्रत्ययांतादंक
वत् प्रत्ययाःस्युः। अंकेदृश्यस्यसर्वस्यायमतिदेशोनतुसाक्षाद्विहतस्येवेत्याशाहः तेनगोत्रचरणाद्वुञितिवुञपिलभ्यते। सहितस्येदमितिसा
मान्येनविधीयमानोपिअम्यजि अंतादन्यत्रापकेपिदृष्टः। वैद निकादिसंघांकेलक्षणेरत्राद्यंतादिहाप्यण्। औपगवकमिति। गोत्रचरणा
दितिवुञ्। हेतुमनुष्येभ्यः। मनुष्यग्रहणमहेत्वर्थं। समरूप्यमिति। विभाषाग्रहणस्यत्र विभाषेतियोगविभागाद्गुणवचनादपि पंचमी। मनुष्ये
२ भ्यइतिबहुवचनंस्वरूपविधिनिरासार्थं। मय च। योगविभागोयथासंख्यनिरासार्थः। योऽयंवर्थः। हैमवती गंगेति हिमवतः प्रकाशतेनत्रमयणं
दृश्यतइतिभावत्। विहराश्च। अणोपवादः। वैहर्य इति। दंत्यमध्योयं। शाहुलवत्। ननुनतुलपत्न्यामिन्द्रियमध्यः मनुष्यसिंगतिः वालवाधाद्विअसीप्र

नवृत्तिविहरेतु संक्लिष्टयतोस्सत्वं अत एव समाहितं भाष्ये बालवायो विदूरं चेति। बालवायद्यहः प्रत्ययं लभते विदूरादेवोच। सूत्रे प्रवितेना
देशेनानुरूपः स्थानं आक्षिप्यते। पदूनव इत्यादो विवेति भावः। नऊछुनिपथि इनपो। छिनी यां ताड्न्नरि प्रत्ययः स्यात् सचेत्यथाह तो वेत्य
र्थः। तत्र साधस्तिष्ठितनिकाष्टा निपत्यती स्यादाविवकरणस्य स्वातंत्र्य विवक्षायां पंथाः कर्ता। सोस्य कन्यकुञ्जद्वार मिति। सो अभिमुख
निष्क्रमणे करणं भूतमिति फलितोर्थः। पूर्ववत्करणस्य कर्तृत्वे प्रत्ययः। तदितस्येवेति। अधिकस्येत्येतदपेक्षया हिनं। येयं। शारीरकीयमिति।
चतुर्लक्षणी स्त्रे संदर्भः। छुद्राद्यः। शिशुक्रंद। अत्र वार्तिकं। द्वंद्वे देवासुरादिभ्यः प्रतिषेधः। देवासुरं। राक्षोसुरं। सोस्य निवासः। नन्वस्येति
ष्ठी योगेकर्तरि षष्ठी। तथा च विशेषणविशेष्यभावव्यत्यासात् स्त्रुघ्नाधिकरणकवासकर्तेति वृत्त्यर्थः। तथा च तत्रभव इत्येव सिद्धं। सत्यं वास
स्य चेतनमात्रकर्तृकत्वेन प्रसिद्धत्वात् प्रकारस्कृतो भेदः। एवं सति हि प्रेम्निग्गुणतेव स्कन्नो याद्दे पचारो बोध्यः। अभिजनश्च। अभिजनो त
यतेऽभ्य इति स्नुघ्नुत्याख्या अभिजनाः पित्रादयः। पूर्वत्रादिह निवासइत्यनुवृत्ते तत्रामात्ताधिकरणपादभिजनशब्दस्य तत्संबंधिनि लक्षणा।
एवं स्थिते फलितमाह। यत्र पूर्वैरिति। वासुदेवार्जुनाभ्यां वुन्। छोणेरपवादः। अल्पाच्तरमजाद्यंतमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तेनस राम
कुर्वन्नज्ञापयति। सर्वतोभ्यर्हितं पूर्वमिति। स्यादेतत्। वसुदेवस्यापत्यं वासुदेवः। ऋष्यंधकेत्यण्। तन्नगोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् इत्यतत्र १३७

सूत्रेण वुञेवास्तु किमनेन वुना तयोर्ह्यत्र द्वे विशेषः। शगेव वृद्धत्वात् न च वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो दोषः। वुन्यपि तकोपधाय
इति निषेधस्येष्यमाणत्वात्। न चाभ्यर्हितं पूर्वमित्येतज्ज्ञापनमेव फलं। तथात्वे हि पूर्वनिपातप्रकरण एवाभ्यर्हितग्रहणमात्रेण लाघवात् कुर्या
दिति। अत्र भाष्यं। संज्ञैषा तत्रभगवत इति। अयं भावः। सर्वत्रासौ समस्तं च वसत्यत्रेति वेयतः। ततोसौ वासुदेवेति विद्वद्भिः परिगीयत इ
ति स्मृतेः परमात्मैव वासुदेवः सर्वत्रासौ वसत्यन्तर्यामितया सर्वमत्र वसति वा सर्वस्य ब्रह्मविवर्तत्वात्। इति वासुः बाहुलकादुण्। कोकः उ
ण पुरुषोनल्लिनेशाये च वासुनरायण पुनर्वसु विश्वरूपाः इति त्रिकाण्डशेषः। वासुश्चासौ देवश्चेति विग्रहः तथा चेनेयं गोत्राख्या। नापि क्षत्रि
याख्या अतो युक्त एव वुन्विधिः। तेनप्रोक्तं। प्रकर्षेण उक्तं प्रोक्तं। अध्यापनेनार्थव्याख्यानेन वा प्रकाशितमित्यर्थः। प्रकर्षेणेति वचनात्रेह। दे
र वदत्तेनाध्यापितं। तित्तिरिवरतंतु। अण्णपवादः। कठचरकाल्लुक्। कठश्चाद्यो वैशंपायनांतेवासिता णिनिः चरकादण्। तयोर्लुक्। कलापिनोण्।
स्य वैशंपायनांतेवासिताभ्यामणिनेरपवादः। इ नेनपत्ये इति प्रकृतिभावे प्राप्ते आह। नांतस्येति। छगलिनो ढिनुक्। कलाप्यंतेवासिता
त्मस्य णिनेरपवादः। पाराशर्य। मंदकत्सूत्राणि निर्विहत्सवध्येतेनदिष्यतेनहप्यते। तदर्थं शौनकादिभ्यश्छंदसीति सूत्रात् छंदोग्रहणमनुव
र्त्य। सूत्रे पोश्छंदस्त्वं तु गौणत्वाद्वोध्यं। भिक्षुनटसूत्रमिति। चतुर्लक्षणीरूपं भिक्षुनटसूत्रयोः। किंपाराशर्यशिलालिनो। कर्मंदकृशाश्वादिनिः। इह

स्म

पिच्छंदोनुवृत्त्यादि प्राग्वत्। भिक्षुनटसूत्रयोः किं। कार्मंदं। काशाश्वं। तेनैवेति किं। छंदसी निमिरुक्तं। पुनस्तेनेत्यनुवृत्तेः। तत्सिश्च। प्रोक्तेति किं विष
ये। उपज्ञाते। उपदेशं विना ज्ञातमुपज्ञातं। कृते ग्रंथे। तेनेत्यनुवर्तते। तस्येदं। अणादयः पंचमहो लगी। घादयश्च षष्ठ्यंताः। संबंधिनि स्युः
अनंतरादिषु न भिधानान्नात्रेति। तुरितितृत्तचोः सामान्यग्रहणं। दत्तादीनामसिद्धत्वाद्लौकिके प्रक्रियावाक्ये त्वमिद्। ततोनिमित्ता भा
वात्। नढत्वादि। इउत्थमिदं उपसंख्यानं। अणुत्सिद्ध एवानूद्यते। अग्नीध्र इति। णिदयं प्रत्ययः। यत्तु पिवास्वी आग्नेव्यादौ आद्युदात्तं प्रयुज्यते
तत्स्वार्थेऽप्यपक्षे बोद्धव्यं। तथात्वे बाहित्कं। अमी असाधारणद्रव्य इति। अग्निमिंधे इति क्विप्। अग्नीत्। ऋत्विग्विशेषः। त्वमग्निरत्नायतः इ सत्रे
तुल्छोदर्सं कृत्स्नत्वं बोध्यं। सामिधेनीनिषिवाम्। ४।३। हलस्तद्धितस्येति यलोपः। यथाग्निः समिध्यते सा सामित्। संपदादित्वात्करणे क्विप्। तनः
ऋमीति यष्ठ्येनादाधानकरणेन द्वितीये। रथाद्यत्। अणोपवादः। रथाद्रथांगे इति वा त्रिक्रम भि भेसाहरथ्यं चक्रमिति। अत्रेदमवधेयं। द्वयोरथ
योरंगमिति विग्रहे द्विरथ्यं। रथसीताहलेभ्यो यद्विधाविति तदंतविधेरुपसंख्यानाद्यत्। द्विगोर्लुगनपत्ये इति लुक्। यस्तु द्वौ रथौ वहति स द्विरथः
तद्वहति निषत्। तस्य प्राग्दीव्यतीयत्वाभावान्न लुक्। अत एव तद्वहति निस्त्रे रथग्रहणं सार्थकं। अन्यथा रथ्यादयः स्ये वरथांग इत्येवाद्धर्यप्रस राम
तो किंतेनेति। ननु द्विगोर्लुगनपत्य इत्यस्याप्राग्दीव्यतीयत्वाभावात्कथमत्र यतो लुगिति चेत्। सत्यं। तद्वहती स्त्रे रथग्रहणमेव ज्ञापकमेतस्य यतो १३८

हलादेरपि लुग्भवतीति। अन्यथा तत्र रथग्रहणं व्यर्थमेव स्यात्। द्वंद्वाद्वुन्। अणोपवादः छंदसि तु परत्वाद्वाधते। काकोलूकिकेति। काकोलूकम
स्य वैरमित्यर्थः। वुन्नेते स्त्रियामपि। वैरमैथुनिकादिवुन् इत्यधिकारे अमरः। कुत्सेत्यादि। कुत्सकुशिकयोर्मैथुनिका विवाहरूपः सं
बंध इत्यर्थः। मिथुनं हि दंपती। तस्य कर्म क्रिया निष्पादनं। मनोज्ञादित्वाद्वुञ्। नदंतं चेदं स्त्रियोस्वभावात्। गोत्राद्वुञ्। पूर्वस्य वुञोऽपवादः। यो
पेति। अत एव यथा स्वेच्छमपि नैवं यस्मात् प्रकृते यस्ति स्वः प्रत्ययार्थविशेषणमिति तु चत्वारि। परंपरेति। यथा गार्ग्यादिनिष्टः स्वामिनां गोत्रा
त्रासंबंधः। शाखादीति। यथा विदानां विद्या। यद्यपि अंकलक्षणयोः पर्यायत्वं प्रसिद्धं। केलंकौ कौलोकनं च चिह्नं लक्ष्म च लक्षणमिति को
श। सिद्धं च तथापि इदं ग्रहणसामर्थ्यादिह विशेषपरतेति भावः। णित्त्वं डीब्वर्धं वृद्धवद्भावनिषेधार्थं च। वेदो विद्या यस्य वेदा विद्यः। विदा नाम सा
धारणी या विद्यानद्ध इत्यर्थः। छंदोगौक्थिक। संघादयो निवृत्ताः। एभ्योन्यः स्यात्। तस्येदमर्थे चरणशब्देभ्यो वुञोऽपवादः। नयात्तु ओत्तगिकि
स्याणः। धर्माम्नाययोरित्युक्तेनेह। छांदोगं कुलमित्यादि। सभासाद्वृत्तिकाः। तस्य विकारः। घादिसंबंधस्य तस्य ग्रहणस्यानिवृत्त्यर्थं उत्तरसूत्रे
त्फलकं। अणादयस्तु न निवर्तंते प्राग्दीव्यतः प्रारंभेणादिनिविशिष्टावधिपरिच्छेदेनाधिकृतत्वात्। षष्ठ्यंतादित्यादिकारेणादयः स्युः तत्र प्राणिरजतादिभ्यो
ऽञ्जोरत्र। अनुदात्तादेश्च। मयड्वैतयोः नित्यं वृद्धशरादिभ्यः पिष्टाद्वैसादिभिरपवादा वक्ष्यंते। अतः अश्मनि आद्युदात्तं अह ठं प्रतिपदम

द्वि स्यमाणप्रत्यये चेहोदाहरणमित्याशयेन तथैवोदाहरति। आश्मइत्यादि। अश्मन्अस्मन्छेद्यो मनिन्प्रत्ययांतो। मृदस्तिकन्त्रयोपि निस्वरेण
घुदात्ताः प्राचीनस्यातस्येत्यस्य निवृत्तत्वान्नदधिकारो काष्ठगादयोपि नेह। हालः सैरः। मायूरइति। प्राणिरजतादिभ्यो ञित्यञ्। अनुदात्तादेरञ्ः
सिद्धत्वादुदात्ताद्यर्थं निवृत्तमयाः [redacted] थनार्थं चावश्यकमिदं परत्वादनुदात्तादिष्वपि प्रवर्तते। मौर्वमिति। मूर्वाशब्दः त्रणधान्यानां च
घ्यषामित्याद्युदात्तः। पिप्पलशब्दोप्येवं। लाघवं तेद्वयोश्चेत्फकेः प्रयुज्यते चतथा। तयोरन्यः पिप्पलस्यादितिमत्रे। वा पुजतुनोः। अप
स्यादिति। बिल्वादिभ्यो णित्यतोऽनुवृत्तेः ओरञ्इत्यस्यापवादोयं। पितान्तुपिति। माथवस्कृदितान्दोवित्याह। तस्मादिहशामनीशाद्द
स्यादिरंतोवाउदात्तइतिक्वविद्वेदेलक्ष्यं दृष्टालग्नप्रत्ययस्य षित्वदित्वपाठयोः साधुसाधुविवेको बहुश्रुतैः कार्यः। आश्मनइति। विनापि
प्रत्ययं श्वेतिरपदयोर्वालोपो वाच्यइति वचनादश्मनेदशाह्वेनेदशाह्वस्य लोपेऽश्माचितिनांतमवशिष्यते। तथाकल्माषो प्रेराज्ञो भार्या यो
दंमयंस्यांवसिष्ठेनोत्यादिनः क्वेनजस्तुतोऽश्मकोनामनत्रसंज्ञात्वद्योतनेकस्यकप्रत्ययस्याभावेऽश्मचितिनामनवति। तस्याचयवेआश्मनं।
विकारेपि आश्मनमित्येव भवति। नत्वाश्मनो विकारइति टिलोपः स्यादिति वाच्यं। प्रसिद्धतरत्वेन पाषाणवाचकस्यैव तनग्रहणं हीत्युच्चितत्वात्। राम
त्स्त्रतस्त्रनस्येदमिति सामान्यविवक्षायां भविष्यति पैष्टीसुरेतिव[redacted]त्। मौञ्जइति। मुञ्जशब्दो घृतादित्वादंतोदात्तः। कार्पासमिति। कर्पासः १३९

दूनिपासप्रत्यये सार्वधातुकार्धधातुकयोरिति गुणे रपरे रूपने। कर्पासीशब्दो ज्ञानिन्त्स्यण्ङीषंतः। ताभ्यामनुदात्तादेश्चेत्यञ्बाधितावि
ल्वादिभ्योण्। भाषायां किं। स्वादिरो रूपइ निरत्तिकाराः यद्यपि मयटोवैकल्पिकत्वात्सिद्धमिदं तथापि विदेवकृतः परस्य मयटो थंतिरपर
त्वमेवेति। नास्त्यर्थग्रहार्थमेवेदं नतु द्वयं श्छंदसीति स्तुतं चेद्यत्व एवेति नियमार्थं सनुत्तक्रार्थं नित्यं यथाहविष्यति। निवेत्सत्या। विपरीतनिय
मशंका लिवृत्यर्थं भाषाग्रहणमितितत्त्वं। अधिकारादेवं सिद्धे एतु योरिति वचनं इतनउत्तरेषां प्राणिरजतादिभ्योऽस्येवमादीनामपि विय
येपस्येरत्यर्थं। कपोतमयं। [redacted] लोहमयं। इहधिकारे एतयोर्वेनेकेनैसहाभक्षाच्छादनयोरितिसंबध्यते। समासनिर्देशाद्दनो यथासंख्यंन।
स्यादेतत्। उत्तरमीमांसायामानंदमयाधिकरणेभाष्यकारेरन्यांतरआत्मानंदमयः इतिश्रुतौ आनंदमयइति विकारेमयडिरुक्तं। नतेक
र्थसंगच्छतां भाषायामितिसूत्रयतापाणिनिनासह विरोधात्। किंवविकारशब्दात्ते निचेन्न प्रातुर्यादितिसूत्रयतोव्यासस्यापि आनंद
[redacted] त्वाद्स्य वह्दृच्छतया छेदसिविकारेमयडुर्लभइत्याशायपठितेनः एवंस्थितेन्नमयादिपायपरागेष्वपि किंविकारः उभयसंभवएवतस्यनि
र्णीयकत्वात्तथाचप्राचुर्ये [redacted] मयडवदतां प्राचीरत्तिकृतामचव्याख्यानेप्रबलेनतुभाष्यकारोक्तमिति चेत्। अत्रोच्यते श्रीयामपूर्णो श्छंदसीति
सूत्रे श्रियष्छंदसी संज्ञाभ्यावत्। भगवता भाष्यकारेण प्रत्याख्यानः छेदसि सकलविकल्पानां व्यवस्थितत्वात्। अतएव [redacted] ऊनं नित्यंछेदसि।

भ्र

बह्वादिभ्यश्च। नित्यं वृद्धशरादिभ्य इत्यादयो पि वैकल्पिके प्रयोगे नित्यमेव प्रसज्येयातां तस्याप्यसामर्थ्यात्। एवं स्थिते नात्यर्थग्रहणस्यान्यायानुसंधाने
नैव सिद्धे तदर्थं पाणिनिसूत्रारंभादर्शनाद्ग्रहणं भाषायामिति तथा। छन्दसि च छंदसि नोत्तरपदे बिल्वादिनिर्दिष्टस्य यथा विज्ञाप्या। स निर्दिष्टभाषा
ग्रहणे शरमयं वार्क्षं विस्तादिसि र्थं ह्यवयवाद्यस्य सर्वं। मौंजं शिक्यं। वार्ध्रं चर्म बैल्वो यूपः इत्यादौ ह्यवयवेति प्राप्तं प्रतिषेध्यं तुं नोन्वदितिसूत्रमारंभोऽ
करोति तु सर्वमिदं निष्फलं भाष्यकारेरेव प्रत्याख्यानप्रायं च। एवं च वेदांतसूत्रचंद्रिकानामपि गतिः नेतरपि आनंदमयादितरे तु विकारमय
टः स्वीकारात्। अन्नमयप्राणमयमनोमयेषु ह्यवृत्तान्मयट् संभवे पि विज्ञानमयश्चाद्य विकारेमयट् उर्थंठक् प्रकारस्स्येवानुसंधयितानान
था वानंदमये पि विकारयंति वेविना एकरूप्यात्। यद्वा प्राचुर्यं मयडा पि ब्रह्मस्यार्थे विरोधिनो लेशानोनुवृत्तिलाभान्न प्रकृते विकारार्थः प्रयु
वस्यति। साहाय्यः अथवा नित्यं वृद्धेत्यत्र भाषाग्रहणं नानुवर्तते। अनुवृत्तौ वा विभाषायां नित्यं। अन्यत्र तु कामिति इत्याशियमयट् सु
साधः। अत एव शरादिषु वृद्धे प्रयोगे प्यर्थवान्। मौंजं शिक्यं रूपं तृणमयं ग्रहं राजन्नहं गमनमितिमंत्रे दर्शनात्। न च भाषायामेव चरछन्दसि प्रागु
उतिवाच्यं। आरंभसामर्थ्यादेव सिद्धे नित्यं ग्रहणं योगविभागेनान्यत्रापि विकल्पितं सार्थंति नैकाचो नित्यमिति कृत्स्नं वाक्यं तेनाप्ययं उतादेरा राम
कारउदाहृततात्। एवं वृद्धेत्यपि प्रयोग वैयर्थ्यस्य स्पष्टत्वात्। यद्वा हेतुमनुष्येभ्यः इत्यनुवर्तमाने मयट् इति सूत्रेण आगतार्थे मयटि विकारउ २४०

आनंदप्रचुरो ग्रामस्तत्र आत्मान्यवर्णकत्ववदानंदप्रचुर इत्यमात्यदुःखहानि आनंदमयशब्दे मयट् प्रकृते शानंदशब्दस्यार्थः सुखं न हि रोधिनो दुःखस्य २५

३६

वि

नित्यार्थिकार्थकथनमेव सर्वथा पिशाकरभगवत्पादोक्तिरनवद्येवेति दिक्। गोश्च पुरीषे। पुरीषं न विकारो नाप्यवयवः। तस्मात् तस्येदमर्थे
यं प्रत्ययः प्रकरणाल्लिंगस्य च लोपस्स्यात्। गोपयसोर्यत्। यद्यपि सर्वत्र गोरजादिप्रसंगे यत् उक्तस्तथापि मयड्डुनयोर्विनियक्षे प्राप्तं मयट
बाधितुं पुनरयं यद्विधिः। द्रोश्च। ओरञः प्रकाचो नित्यमिति मयट्श्चापवादो यं। द्रुवयमिति। द्रोर्विकारभूतं प्रस्थादि परिमाणमित्यर्थः। आ
मलकमिति। फलितस्य वृक्षस्य फलमवयवो कारश्च तेनान्य नरस्मित्प्रत्ययः। कंसीयपरशव्ययोः। परशव्यस्यानुदात्तादित्वादञिसिद्धे तुग
र्थं वचनं। न च यस्येति लोपे कृते हलस्तद्धितस्येति यलोपेन सिद्धमिति वाच्यं। इतीस्यनुवृत्तेः॥ ॥प्राग्दीव्यतीयाः समाप्ताः॥ ॥आहो प्रभृतादि
भ्य इति। उपसंख्यानमित्यनुपद्यते आहे इति पदे कृते देवास्य प्रकृतिभागस्य उच्चारणार्थेन इकारेण आहा इति निर्देशः। प्रभृतमाहेतिं क्रिया
विशेषणमिदं कश्चित्प्रत्ययः। आभ्य इति। आर्हिः। काष्ठकुद्दालइत्यमरः। दीव्यति सादौ कालपुरुषसंख्याभिर्विवक्षितः। अदेवत्। देविष्यति वा
आक्षिकः। एवं देविष्यति देविष्यामि वा। दिव्यं नित्य। व्यथा। दीव्यामो वा आक्षिकाः। कारकं तु विवक्षितमेव। अत एव जयति जितमिति कर्तृकर्म
णोरप्यनुपादाने। संस्कृते। योगविभाग उत्तरार्थः। कुलत्थकोपधात्। कुलत्थैः संस्कृतं कौलत्थं। आइकेति। सूत्रेषु प्रकारः सांहितिकोऽनत्वं तु
धइ इति नञ्यां। तथा च आकर्षस्य पादेरित्यादि श्लोकवार्त्तिकं प्रकरणांते वक्ष्यते। नित्यं चोपलइति। सुवर्णपरिमाणार्थः। पाणिनिरमिति। एतच्चभाष्यादो कप

रवपेत्यादिदंडके माधवेनोपन्यस्तं किंतु । आकर्षात्षपदिति निपातनात्किंस्यान्न तु गुणे तत्र हि नीरक्पाणेर्व्वचनात्संगतिः स्यात् । यथापि गेनेति ।
पर्यगनो । हलश्चेति करणे घञ् । सन्नर्यइति । एतच्च माधवरीत्योक्तं उज्ज्वलदत्तस्तु स्वबुद्धिकल्पितं शब्दप्रवाप्यकृत्यनर्यनत्याइतिस्त्रे तेन पर्यशाद्दस्त्राने
पर्यशाद्ध्य गितापि पर्त्तेः पः पर्यश्हें बालतृणे चा तेन वूरन् । पर्पिकद्दत्कदाजहाराइहांतेर्गणसूत्रे पादः पद्धेतिपादाभ्यां चरनिपदिकः यनुवा निंकेप
६ द्वावकेच रनानुपसंख्यानमिति सोस्येव प्रपेचः । पर्यश्वन्व्वश्वस [redacted] रथजालन्याय व्यालपादः पेत् । आगणिकइति । श्वादेरिति अइत्यत्र उकारा
दिग्रहणं कर्त्तव्यमिति वचनात् वसिद्धारादिकार्येन । पादुकइति । वेतनादिगणे धनुर्दंडेति पच्यते तेन संधान विरुहीनार्थमिति सिद्धांतः ॥ आ
युधावेत्वा आयुध्यं स्यनेनेत्यायुधं । घञर्थे कविधानमिति कः । उत्संगेन हरतीति । उपादत्ते न यतिचेत्यर्थः । भस्त्रयेति । भस्त्रा चर्मविकारः येनलो
हादिध्मायते जलादिकं चनीयते । स्त्रीषेभारशाद्धोत्रपद्युते । निपातनाद्ध्रीषभावः सप्तमीसमासश्चातलुरूपेक्षनी । निवा अलुक्पक्षे त्वांर्षभारः
पदेशाविकनस्येति । विवधाद्वेतिवक्तव्यमिति वा । निंकिं तु न्यायसिद्धार्थेकथनपरमिति भावः । वृत्तिकृत्तु वीवधशब्दस्सत्रे प्रक्षिप्ते । वनाद्वित्यमानि
प्रयोगं स्यग्रहणं स्वानेत्येणचारयितुं । अतएव लौकिके विग्रहवाक्ये किनादानां प्रयोगो न तु ऋक् । नदाह तासा निर्द्दत्तमिति । संख्यावाची । विंशत्यक्तने
हरडसतेव्याख्यानात् । प्रस्थप्रस्थययोः प्रत्ययस्य ग्रहणं न तु निर्जाचयाणमित्यादिलिंगाद्य । ननु नित्यग्रहणेन निर्देशार्थविवक्षापोक्तस्यवार राम १५

वि ल्पेनद्विविवक्षायांस्वानंत्र्यस्य तुवारित्वान्नेदं लिंगमितिचेन्न । नित्यमितियोगं विभज्य नस्तासमर्थ्यादिर्यविशेषानादरे रोव स्वानंत्र्यवारणम् । आ
म चप्रत्ययांतादिति । एवं च मपूनकर्त्तव्यः । तथाहि भावप्रत्ययांतादिमप् । नतन्नेः भावेत्याद्यनुवर्त्तते । नियमार्थं चेदं तेन निर्द्देत्तेनावशकं चेनिवर्त्तते
ततः नित्यं । अनेनान्यत्रापिस्वानंत्र्यं वार्यते । त्यवंतमिति । उदीचामातइति । काप्रत्यये ऽपेत्यनेनसहगतिसमासान् । मयतेरिद न्यतरस्यामिति
वं त्वे । नद्यांतात्मात्तनीयांता प्रत्ययः । किं तु वचनात्सूत्रयांतादेवेति भावः । प्रतीपंवर्तनइति । प्रतिगता आपो यस्मिन्निति बहुव्रीहिः । ऋक्पूरित्यकारः समा
सांतः । ध्वंनरूपस्सर्गेभ्योपईदितिईत्वं । अनुलोमितिमानं चेदं । प्रतिकूलानुकूलपर्यायाह्यमे । एवं च अनुलोमकूलशब्दा अविवक्षितार्थाः । अदनोदेशो
इत्युक्तेतुनं । अदेशात्वान् । पराङ्मुखमिति । अपपरीवर्जनइतिपरेःकर्मप्रवचनीयतायांपंचम्यपाङ्परिभिरितिपंचमी । अपपरिबहिरंचवः पंचम्ये
त्यव्ययीभावः तत्तद्धक् । स्वामिनो मुखं वर्जयित्वा यः सेवको वर्त्तते स पराङ्मुखिकः । यद्वानुस्यवतीभावे परिशब्दः प्राग्वित्समास श्च । तदा पत्तो यतः स्वा
मिनोमुखं ततोयो वर्त्तते सोर्थः । एवं पापिषारिकोपि । द्विगुणार्थमिति । बहुचःपुद्दिच्यचकदानकमतिपानस्यगहर्त्ति । वाद्वृत्तिकइति । वृद्धार्थेटिद्धितांप
यन्नेति विग्रहः अथकृत्यं वृद्धासीनाश्वतार्दुष्परित्यमरः ने स्तेनः सा चवार्द्धिषा । वार्द्धुष्यं लवणक्रिया । वार्द्धुषिः सम कृपते सादिस्वत्वं देवाचः क
वयइतिहरदत्तः । गार्हृक्षिं । द्विगुणं वृद्धिं वप्रयच्छत्स्वधर्मणः कुसीददवो कादशात्स्वाच्यो । निपात्यनद्वति । अतएव वाक्यमप्यकारीनेनभवतीतिभावः ।

नदेवदर्शयति। दशैकादशिनि। संख्यायाअल्पीयस्याइतिद्वन्द्वनिपातनः। उंछइति। भूमौपतितस्यएकैकस्योपादानमुंछः। चार्ढुंकरोतीति। प्रस्थं
यादिविभागेनमुक्तादयतीत्यर्थः। नेत्रेनाभ्येपिप्रत्ययः। अभिधानस्वाभाव्यात्। तेनेहनशब्दंकरोतिनिवर्तरः। सार्डुविकइति। कुन्तालः। दर्दुरोभ्रस्याविल
यदे शेषः दर्दुरस्तो॰ नेकेशाद्यभांडादिभेदयोः। दर्दुरश्चंडिकायांतुग्रामजालेतुदर्दुरमितिविश्वः। मात्स्यिकइति। मत्स्यस्यप्राणिनितिपरिगणनात्त्रिय
नित्येतियक्लोपेन। मार्गिकइति। आरण्यकचतुष्पात्कहरिणेचवृत्तेर्थेमृगशब्दः। नचाद्यस्यविशेषोहितो। यस्यतुपर्यायोहरिणशब्दः। पदोत्तरपदं पा
गृह्णातीति। परंनमितितुनोक्तं। बहुस्वर्वान्तान्मात्तु। धर्मंचरतीतिरिहासेवायां। नत्वनुष्ठानमात्रेतेनदेववशाद्दुमेप्रवृत्तोपितुधार्मिकइतिनोच्यते। आ
सेवाहिस्वारसिकीप्रवृत्तिः एवमग्रेपि। समवायान्समवैतीति। समूहवाचिभ्योहितीयोनेभ्यष्ठक्स्यात्समवैतीत्यर्थे। इहसमवपूर्वस्यइणोर्थःप्रविश्यै
कदेशीभवनं। तेनयुष्मभूतंप्रवेशंप्रतिप्रकृत्यर्थस्यकर्मताबोध्या। विशेष्यानुरोधेनतुल्लोकेसप्तमीप्रायेणप्रयुज्यतेकुरुक्षेत्रेसमवेताइतियथा। एकदेशीभवनं ४
सैन्याःसैनिकाइति। हितीयोनात्। एवकौस्येनुसेनायांसमवेतायेसैन्यास्तेसैनिकाश्चनइतिनत्कलितार्थकथनपरं। संख्यायामितिल्लादक्तुक्रूरी
चाद्याभ्यांहितीयोताभ्यांपश्यतीत्यर्थेकस्यात्। सम्यक्ज्ञानंसंज्ञानस्यायंप्रसिद्धिविषयीस्तेऽर्थविशेषइतियावत्। लालाटिकइति। हरेलिलाप्रभो रामा
र्ललाटंपश्यतिनतुकार्येषूपतिष्ठतइत्यर्थः। लालाटिकःप्रभोर्भालदर्शीकार्याक्षमश्चयः इत्यमरः। कौकुटिकइति। संन्यासीहिपादविक्षेप १४२

प्रवेशनिर्भितोद्दृस्येकदेशीभवनस्याधातुनाबाधात्समवायकर्मकोयःप्रवेशस्ततर्थमेकदेशीभवनमितिप्रतीतेः ४॰

पर्याप्तदेशपर्यंतमेवचक्षुःसंयम्यगच्छतीतिभावः॥ मार्दंगिकइति। मृदंगवादनेप्रकृतेर्लक्षणा। मुख्यार्थस्यतेस्तनभिधानात्। पानुकइति। इ
णःयइतिपः। परश्वधाद्ठञ्। चाहकु। द्वयोःकुठारःस्वधितिःपरशुश्चपरश्वधः। आस्तिकइति। अस्तिनास्तिशब्दौनिपातौ। यद्वावचनसामर्थ्या
दस्तीत्याख्यातान्नास्तीतिनिपातस्वयांतसमुदायाच्चप्रत्ययः। दिष्टमितिसादिष्टंदैवंदिष्टंभागधेयमित्यमरः। नाल्लवतेदैष्टिकता। नित्तिर्वदतियोरु
षइतिमाघः। यत्तुमाघेनोक्तं प्रमाणानुगामनिर्दिष्टासास्यास्तीतिदैष्टिकइति तन्न। आकरविरोधात्। दिष्टशब्दस्यस्त्रीत्वेस्वोत्प्रेक्षितार्थपरत्वे
चमानाभावात्। किंचसास्यास्तीतिविग्रहोप्ययुक्तः। नह्यस्त्यर्थेऽयंप्रत्ययःस्मर्यते। नचाआस्तिकइतिवदस्त्यर्थस्यप्रकृत्यर्थतमापिहप्रवेशाउत्प
स्तोनाचत्। हितंभक्षाः। अस्येतिप्रकृतमपिचतुर्थ्याविपरिणम्यतेहितयोगात्। यद्वातस्मादितीहअपकृष्यं। प्रकृतिश्चतदीयमतेलक्षणलाक्ष
म णिकी। स्याद्रोपेनाह। अशुपतस्मैहितंस्मैइति। श्राणाइकारउच्चारणार्थः। दोडीवार्थः। यवागूरुष्णिकाश्राणाविलेपीतरलाचसेत्यमरः। आ
वसथात्ष्ठल्। वसतीत्यर्थे। आवसत्यस्मिन्नितिआवसथःउपसर्गेवसेरित्यथप्रत्ययः। कुसीददशैकादशात्ष्ठन्ष्ठचौ। कुसीदस्त्रोपात्ताभ्यांप्रसन्नाभ्या
मित्यर्थः। इहयेषांषकारःसोद्दिनिकइतिसंभाव्यतेतेषामेवगणेनठ्ठादेःषित्त्वमनायमितिभ्रमःस्यात्। अनोपार्णिकफकारःस्वर्णीनेबोगणे
न॥ ॥प्राग्वहतेष्ठकोवधिःसप्तमः॥ ॥ धुर्यइति। धुरंवहतीत्यर्थः। प्रासंगइति। प्रासज्यतेसाविति कर्मणिघञ्। धुरोयड्ढकौ। इहधुरोड्ढत्येवो

विनं। [illegible]ः सर्वधुरात्। शाद्स्वरूपापेक्षया नपुंसकनिर्देशः। धुमिव हुत्री। हा विभिन्न। सर्वधुरामिति। सर्वधूः सर्वधुरा। पूर्वकालैकेति समासः
ऋक्पूरिति समासांतः। परवल्लिंगमिति स्त्रीत्वं। टाप्। एकधुरीणा इति। चकारेण खस्यानुकर्षणसामर्थ्यात् विश्लेषवर्णः। अन्यथा हि चकारं वि
नैव [illegible]प्याकरणि कस्य यतो लुग्विधीयेत। जनी वधूरिति। जायते ऽस्यां गर्भ इति। जनि घसिभ्यामिण्। जनिवध्योश्चेति न वृद्धिः। कृदिकारादिति
ङीष्। जन्येति। जामातृवयस्ये त्याडुः। सा हि वधूं जामातृसमीपं प्रापयति। कालिदासस्तु। वध्वाः पानवाहेहवयिश्राशुक्रः। पानेति जन्यानवदलुमा
रीति। पत्याइति। पत्युस्तनदर्थे इति यद्भावः। अथ तु षाकिं। चोरं विध्यति। संभाव्यते हि चोरव्यधने धनुषः करणता। यदा तु धनुर्यति प्रयुज्यते त
दासापेक्षत्वादेव न भवति। वशं गतः। वशानं वशः। इच्छा। वशिरण्योरुपसंख्यानमित्यप्। मूल[illegible]मस्या बर्हि। प्रथमांताद्दा बर्हीसुप्। इति कान्मूलबर्हा
रा त्स्यात्। [illegible]पादु[illegible]ः इति। मूलको सारटं विनासं टहीतुमशक्यः। मध्यतो ऽवनेकिं मूत्रमाणेको ऽग्रस्त्वाथ अपि यस्यामवस्था पापते सुखामेवस्था
प्राप्ताः सुखदुःखोशुका इति यावत्। यमन्तयप इतिनेन धेनुष्या शाद्वीनो दानः। यस्तितु मि त्ववस्यात् इति भावः। संज्ञायामिति। ऋणप्रत्ययणया धेनुर्द
हनार्थं उत्तमर्णाय दीयते। तस्याः संज्ञेयं। नौवयोधर्म। अष्टभ्यो यथासंख्यमष्टस्वर्थेषु यत्स्यात्। इहता यदिपियोगे यथासंभवं करणे कर्तरि हेतौ तु राम
ल्यार्थयोगे च तती या भवतीति। से वेह समर्था विभक्तिः स्याल्लिप्यते। मूलेनानाम्यमिति। मूलं नाम पदादीनामुत्संधिवित्तं विनियुक्तं द्रव्यं तेन १४३ मि

स्वस्मादन्तिरिक्तं लाभार्थ्यं द्रव्यं आलानं प्रतिनिशेषी क्रियते। आकुर्वस्य तु नम ते रभि भवोर्थः। तस्मात्सो ऽस्रु पथादिति यतिप्रासे ऽत एव निपातना
त्यत्। आनाम्यं। अभिभवनीयं। आलानं प्रतिनिशेषीकर्तव्यं। सर्वं लाभार्थ्यो भाग एव। लोके तु प्रावनाद्रव्येण परादि हंविक्रापनेन त्रसमुदाये प्र
त्यशब्दः प्रसिद्धः। एवं च लाभमात्रे वृत्त्यादिनस्य न हृदिते संघाने निरूढलक्षणवोध्या। सा नेयं सा नाह लाभे तेन समितं संगतं निम्नो त्रता दिर नि
हितेहत्नं सनी। हत्नमिति यावत्। तुलया संमितमिति। संमितं परिच्छिन्नं। रूढिश्चेयं संज्ञायामित्यधिकारात्। अत एव सदृशमात्रे प्रयुज्यते न तु
लायामाग्रहः। अत एव च वयसा तुल्यः। चातुर्विद्यस्य नस्निग्धो वयस्यः सवयास्त्वमरः। पथ्यमिति। शास्त्रमाचायधोनपेतमित्यर्थः। संज्ञाधिकारा
न्नेह। पथ्योनपेतश्चोरः मार्गादनपेत इत्यर्थः। दृश्यालुनमिति। छंदिस्संवरणे इति चुरादिः। इच्छायामपि वर्तते। ततो घञ्। इच्छापर्याय छंदशब्दः स्व
छंदो वश्यच्छंद वच्छंद स्वं छेन्दसारे। अस्तु मितु सांतः सोत्र प्रकृतिः। यद्यपि वेदविह व्याडिश्चायमस्ति तथापीह न गृह्यते संज्ञाधिकारात्। तत्र निर्मीयते इ
याः करणवा त्सामर्थ्यात्करो तीति। पोतादिति लभ्यत इति भावः। हृदस्य हृल्लेखयोगाल्लमण् इति षष्ठी। अल्लोकिके नहि ते प्रकृतिभागे तु वचनसामर्थ्यादेव। एव
मन्यत्रापि बोध्यं। जनस्य जन्य इति। जन्यशब्दो भावसाधनः। कर्तरि षष्ठी। हलस्य कर्ष इति। कर्षणं कर्षः। कर्मणि षष्ठी। करणस्य हल्यादि विवक्षायां
कर्त्तरि वा। त्यस्सीताहलेभ्यः इति न दंत विधिः। द्विहल्यः त्रिहल्यः। तत्र साधुः साधुरिह प्रवीणो योग्यो वा। नोपकरोति तत्र हितं स्मै हितमनेन भाव्यं। अ

यइति। यत्तु प्रावा अग्रेभवः अग्र्यः अग्रियः। अग्रीयः। इतिरूपत्रयमिहोक्तं तन्न। अग्राद्यत्। घछौ चेति सूत्रद्वयस्य छंदो विषयत्वात्तद्विभ
वे छंदसीत्यधिकारे पठ्यंते। छंदोधिकारस्य आपादसमाप्तेरिति सिद्धांतः। लोके तु भवार्थे अग्रिमइत्येव भवति प्रतिजनमिति। जनो जनः इति
प्रतिजनं। यथार्थे यदव्ययं सितिवा श्रायामव्ययीभावः। प्रतिजन। इदंयुग। संयुग। पापकुल। परस्यकुल। अमुष्यकुल। सर्वजन। विश्वजन। पंच
जन। परस्यामुष्येति षष्ठ्योर्निपातनादलुक्। गुडादिभ्यष्ठञ्। गुड। कुल्माष। सक्तु। अपूप। मांस। ओदन। इक्षु। वेणु। संघात। प्रवास। निवासा। ए
त्। वसत्तेन्वस्तिति। वसेश्चेत्यनिप्रत्ययः स्वस्यपतिः स्वपतिराद्यः। तस्मिन्साधुस्वपतेयं। सभायाय। यतितु तित्स्वरः स्यात्। क्रतुर्मंत्र कत्र्याः
इतिवत्। यतोनावइतितुनायदुत्पत्तिवेलायांद्व्यच्कस्य यदंतस्य आद्युदात्तः स्यात्। इति व्याख्यानात्। एतच्च वेदभाष्यस्य रीत्या व्याख्याने
तु आद्युदात्तः स्यात्। नमः शाष्यायचफेन्याय चेत्यादिवत्। इह पक्षद्वये उभयत्र फेन्यादीनां परस्परविरोधोपि छांदसत्वेन निर्वाहो बोध्यः। समान
तीर्थेवासी। निपातनोपिनिः। अहादेराकृतिगणत्वात्। सतीर्थ्यइति। तीर्थे ये इति समानस्य सभावः। तत्रे त्यनेनेति तीर्थं तरते स्यकृतीर्थ शास्त्रा
या ध्वरक्षेत्रोपाध्यायाध्याप मंत्रिषु तीर्थं जलावतारे चेति विश्वः। इह त्वध्यापकवाचिन एवग्रहणं। शायितः स्थितइति। शीधातुर्हिंस्कितोत्वरः जलाश्रयः। राम
कुत्रोशायमिति यथा। समानत्तु दरमितिद्धूर्वापरेत्यादिनात् पुरुषः ततोयत्। तित्स्वरापवाद ओकारस्योदात्तः सोदराद्यः ओचोदात्त इतिनानुवर्तते। १५४

इत्युवयस्येतिलोपासर्वस्य कर्मणि

विभाषोदरइति सभावः। तत्रतीर्थे ये इत्यतो यइत्यनुवर्तनेर्सवविषयसप्तमी। तेन सोदर इत्यस्मात् यः प्रत्ययस्वरः कथं तर्हि अर्थ्याने तु गच्छंतं सो
दरोपि विमुच्चती तिमुरारिः। उच्यते सह समानं उदरं यस्येति। वोपसर्जनस्येति सभावः। अतएव यत्र श्वातात् सहोदर इत्यपि सिद्धं॥ ॥इति नाधितसा
रा समा[redacted]श्चातुर्थिकाः॥ ॥अथ पांचमिकाः। प्राक्क्रीताच्छः॥ इयतः प्रागिति। अर्थोत्राव धितत्वेन स्वहतेन तु प्रत्ययः प्रकृति वाचिनेन प्राक्क्रीताद्ये
र्थाः तेषां स्यो पस्थाने अवधिसजातीयो ध्रवधिनाभवति। यथा मासात्परइति कालः प्रतीयते या मात्पूर्वइति देशः। एवं च समाने थेत्वपेति वि
शेषाहितेनो यदादिः उपनायते। अन्यथा पद्धयोः सन्निधानाविशेषात्तव्यतव्यानीयरामिव पर्यायः स्यात्। ननु पदादि विषये छोनभविष्यति। विभा
षाहविरहूपादिभ्यइति विभाषाग्रहणाल्लिंगादिति चेत्सत्यं। एवं सति अवधिग्रहणं मास्तुछइत्येवास्तु। स च प्रतिपदस्य थंतद्दिति चेत्तर्हि अर्थएराव
धित्वेन निर्दिष्टस्सुचितः अन्यथा भक्षितेपि लशुने न शांतो व्याधिरिन्याय आपद्येते ति दिक्। गवाद्येनगणस्तत्राख्याह। नाभिनभं चेति। नाभिशा
ब्दात्य स्यत्यस्य येलभ्यते नभादेशांचे सर्वथा नभ्योक्षइति। रथांगस छिद्रं नाभिः तदनु प्रविष्टः काष्ठविशेषोक्षः स च नदनुगुणत्वात्तस्मै हितः। अंजनं
तेलाभ्यंगः तदपि स्नेहनत्वान्नाभये हितं। रथ्यमिति। शारीरावयवे तु परेणवाधान्नेति भावः। शुन्यमिति। वृकारस्यानुकसनु ब्रूमाप्यत्वात्सनादिनइ
८ तिलोपोना। येनाभावकर्मणीरिति प्रकृतिभावस्तु दुर्लभः। संप्रसारणादोस्कृते अन्तरूपाभावात्। दाघविस्तेन द्विधानसामर्थ्याद्विलोपो मा नाम भूवं

पक्षांतरे तु लैवगतिः। नद्वेति। नश्चेति सुवचं। कथंचइति। येवेति प्रकृतिभावः। विभाषा हविरपूपादिभ्यः। हविर्विशेषाणामिह ग्रहणं। न तु स्वरू
पस्य। तस्येन गवादिषु पाठात्। ननु विपरीतमेव किं न स्यात्। गवादिषु विशेषाणां ग्रहणं। इह तु स्वरूपस्येति चेत् नैवं। असंज्ञात विरोधित्वेन
तत्रैव स्वरूपग्रहणस्य न्याय्यत्वात्। अपूपा तंडुला पृथुक। मुसल। सुवर्णिकवक। कर्णवेष्टक। इत्यादीन्यक्रम्य पठ्यते। अन्नविकारेभ्यश्चेति। अ
स्यार्थः। अन्नविकारा अन्नप्रकाराः ओदनापूपविशेषाः तेभ्यो यद्वा स्यात्। ओदन्याः ओदनीयाः एवं च अपूपादीनां कृपां विलासः प्रपंचार्थः। ह
विरपूपादिभ्यो विभाषायां गवादिभ्यो यत्पूर्वविप्रतिषेधेन चरव्याः तंडुलाः सक्तवो धानाः चरुर्नाम हविर्विशिका दिका स्थाली वचनस्य चरु
शब्दस्य तत्र त्वेह विधि उपचारादिति। इति केचित् यद्हरदत्तादयः। यद्यपीदं चरुशब्दं हविर्विकरणविकृतं तत्राद्धि स्वरूपितत्वपक्वस्य अदितिमोदनेन तिथा
कृपत्रोपक्रमवर्णनात्। चरुशब्द ओदने शक्तः लोके स्थाल्यामौपचारिक इति सिद्धांतितत्वात्। तथापि केययादीनामयमाशयः लोके स्थाल्यां प्रयो
गस्तावत्सर्वसंमतः तथा च स्थाल्यामेव शक्तिरस्तु तदनुरोधेन वेदे शास्त्रीयं लाक्षणिकत्वे विना लोके गृहीतशक्तिकः शब्दो वेदेपि बोधक इति स्तीका
रात्। उक्तं च लोकप्रसिद्धार्थसमन्वयेन रत्संतरेण प्रतिपादिते सति शास्त्यनन्तरं तत्र न कल्पनीयं तथा सति हि कृत्नुलक्षणा भवेदिति। नाभ्यमिति राम १४५
नाभिनभं चेति नभादेशस्तु न भवति तस्य गवादियतासन्नियोगशिष्टत्वेन रथनाभावेव प्रवृत्तेः। खलयवा। अत्र वृषशब्दो कोरीनो गृह्यते न तु नकारांतः।

अन्यथा संदेहार्थं त्वलोपमकृत्वैव निर्दिष्टो तु। आत्मन्विश्वजनेति वक्तुं। कृषा यहितं कृष्यं। ब्रह्मण्यमिति। ब्रह्मन्नुह्यो ब्राह्मण व पर्यायः इ
र ह च पर्यायाद्वा तब्राह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति। कोपि अनभिधानात्रैलाकारः। रथ्यमिति। रथाय हितं। गवादिषु पाठे तांगीहृतः। हिता
र्थ एव यथा स्यात्। अर्थांतरे मा भूदिति। अजाविभ्यां थ्यन्। अजशब्दः पुल्लिंग उपात्तः अत एवाह द्वंद्वे घात्वविशब्दस्य पूर्वनिपातं बाधित्वा अ
जाद्यंतमिति अजशब्दस्य पूर्वनिपातः लिंगविशिष्टपरिभाषया स्त्रीलिंगादपि थ्यन्। न सिलादिविधानि पुंवद्भावः। तत्र थ्यनः परिगणनात्। कर्म
धारयादेवेति। व्याख्यानमत्र शरणं। विश्वजनीयमिति। विश्वस्य जनः सर्वसाधारणो वेदपादिः विश्वो जनो यस्येति विग्रहे पि स एवान्यपदा
र्थः। तस्मै हितमित्यर्थः। पंचजनादिति। रथकारपंचमाः चत्वारो वर्णाः पंचजनाः दिक्संख्ये संज्ञायामिति समासः। एतदर्थं नित्यमिति किमि
त्यमपि कर्मधारयविषयमेव। तेन षष्ठीसमासात् बहुव्रीहेश्च छ एव। पंचजनीयः। सर्वजनादिति। पूर्वकाले कसर्वेति तत्पुरुषः। सर्वज
मानवेभ्यज नीन इति। साध्वर्थं प्रतिजनादिभ्यः खञिति खञि तु सार्वजनीनो। सुखादिनो हितार्थे तु खच एव न तु खञ्। मातृभोगीण इति मातृभोगः शरीरं।
तस्मै हितः। यद्यपि अमरे रूभोगः सुखे स्त्र्यादिभृतौ अहेश्च फणकायपोरित्युक्तं। तथापि अहेरिति प्रयोगबाहुल्याभिप्रायं। वाक्ये स्तु शरीर
मात्रे इत्याकारः मातृपितृशब्दाभ्यां भोगिन्क्ष्छ एव। मात्रीयः पित्रीयः। राजाचार्याभ्यां तु। अनभिधानात्रोन। किं तु राज्ञे हितं आचार्याय हितमिति

निपात्यमेवेत्याकरः। चर्मण्वतीति। अनुकरणत्वात्सर्वनामकार्याभावः। चर्मण्वती नदीति। अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकार
स्य च मूर्धन्यस्तेन सिध्यति माणवः। इत्यपत्याधिकारे वार्त्तिकं। एतच्च एनत्वस्य च स्युनिर्देशात्सिद्धं यत्कथन परमिति बोध्यं। चतुर्थ्यर्थे ताद्विति। एत
त्व सामर्थ्याल्लिप्यते। विहितस्यापि हि शक्तितो प्रत्यय उच्यते। न च तस्मात्तादर्थ्यं चतुर्थ्येव गम्यते। यद्वा। तस्मादित्यनुवर्तते। छदिरुपधिबलेर्ढञ्। यद्वा
तु चर्मविकारश्छदिः तदा परत्वाच्चर्मणोऽञ् इत्यञ् प्राप्नोति। इत्यविप्रतिषेधेन ढञेवेष्यते। छदिरुपधेयं चर्म। आहत्य। पश्चात्तत्वतः पूर्वविप्रतिषि
द्धं ढञ्चेति। एवं च निरवकाशत्वात्स्यैव प्रातिपदिकविधित्वं बलीयस्त्वे प्रयोजकं न तु सावकाशत्वे इति सुनिस्संमतं। उक्त्यन्ते ते न तत्त्वं मितराका
नीत्येवमुक्तं। परत्वान्नुप्रवृत्तेः। प्रतिपदोक्तत्वाद्धि यथोभ्रि सत्यां वित्तत्वाकानीतिमनं तु दुर्बलमिति दिक्। चर्मणो। चर्मणोऽञिति षष्ठी। न
तु पंचमी। तथा हि सति चर्मशब्दाच्चर्मार्थायाम्प्रकृतौ प्रत्ययः स्यात्। चर्मणो द्वीपी इत्यादौ। तदाह। चर्मणो या विकृतिरिति। वाध्रीति। वधि ५७
पिम्प्यां रत्नु इति रत्नस्यैव धर्मशब्द आद्युदात्तः चर्मशब्दा। तस्य विकारः इत्यण्। एटिर्भुजिर्धिर्वाभ्रिशब्दः वध्री तिं वधौ रोणादिके ष्ट्रन्निति। वध्री वरत्रा राम
स्यादित्युरः चेत्वाः पचस्य वध्रिकाः पश्येति भाष्यं। अनुवर्तते चेत्वाऽऽप्यस्य प्राग्विदेः प्रयोगः। तत्रभवत्यत्रकालेऽस्त्वस्य प्राप्तेरिति बोध्यः। तदस्यास्ति १४९
मिसंर्भवने लिङ्ः। इदत्कानां वर्तुलेन संभाव्यत एतत्। प्रकारः आसन्दीसत्याक्षिति। देशस्य चतुर्गुणेन संभाव्यते शकोरोग्मि स्यादिति। इह प्रकृतिविकार

भावस्तादर्थ्ये चेन्न विवक्षितं किंतु योग्यतामात्रं तेन तद्धर्वस्यायमविषयः। मतुब्विधाविवस्त्रस्तनुहणेन सिद्धे द्विस्तच्छब्दोपादानं स्पष्टार्थं॥ ॥
स्यतो ऋर्लोपश्च॥ ॥प्राग्वतेष्ठञ्॥ ठञ् इत्येवं वक्ष्यमाणे प्राग्वतेरिति वचनं मध्ये योऽधिकारस्तान्॥ अपवादः सर्वत्र निष्टार्थ चौभ्याम गणे औषधीयच्छिदा
[redacted] यच्चेत्येवमादिः तेन विच्छेदे पि ठञेव यथा स्यादित्येवमर्थं। तेन पारायणं तुरायणं त्वाद्दो ठञ् लभ्यते। नन्वेवं पारायणादिस्तत्र एव ठञ् नि
र्दिष्टतामिति चेन्न। उत्तरसूत्रे येषां पर्युदासः तेभ्यः क्रीताद्यर्थे ठञ् इष्टतात्। तस्य च प्रकृतस्त्वेविनाऽलाभात्। तेन गोपुच्छिकः। सामति
कः इत्यादेरप्यर्थमिदं सूत्रमिति स्थितं। अनुपातात्तेन क्रीतं तत्ताभ्यां नाक्षीताथेक्ष्ठुस्तान्। असूक्ष्मसाकीतः सामतिकः इत्यक्तं तत्र। आर्हादगोपुच्छसा
दिपर्युदासेन ठको संगतता नातो नेन क्रीतमिति सूत्रस्य च योरस्त्राप्रत्ययानधिकृत्यैरूतस्य ग [redacted] त्रपरत्वेन व्याख्याभासं तेनैतानाद्याः परविप्र श्र
चक्षते। अतः परमार्हादगोपुच्छसंख्यापरिमाणाट्ठगित्यधिकृत्यार्हीयान्द्रष्टयिति। तेन क्रीतं। त्वंततामा अंकनादेर्विषयइत्युदाहरति। सप्तस्ये सा
तीति। अंचेदेवं कथं। तेन क्रीतमिति सूत्रं आद्विर्भवोदत्ता साधारणतेयं अर्हीयान्द्रष्टयितो स्वचारिकात्तावदसंगता। अनन्यार्थस्य प्रत्ययो परस्वि
तस्य च प्राग्वतेष्ठञित्यनेनस्योपेक्षात [redacted] ईतया प्राग्वतीया निस्तयस्य वेल्युसुचितत्वात्। किं च क्रमादेस्त्यादिशादेतुचितः त्वं ततत्सस्कन्निधावेवपर्यु
दासप्रयोजकत्वात्। आदिशब्दग्रहणस्य दुर्वचत्वादिति दिक्। पयपाम्न प्रस्प्रो विषितेनरहा। तस्मभावि अर्थश्चेरोपति इत्तेन प्रतिपस्तितेनाप

वादविषयेन्नभवति।अत्रचज्ञापकंदृष्टःपदिकृन्यतरस्यामितिसूत्रेऽन्यतरस्यांग्रहणं।आर्हादिनातदर्हतीतिसिद्धेतस्यएकदेशःशावंतोज्ञातु
क्रियते।नतुतदर्हतीतिसूत्रेतगर्तेअजेतमितिभावः।अत्रचव्याख्यानमेवशरणमितिदृढदत्तः।अत्रश्लोकवार्त्तिकं।ऊर्ध्वमानंकिलोन्मानंपरि
माणंतुसर्वतः।आयामस्तुप्रमाणंस्यात्संख्याबाह्यातुसर्वतः।अस्यार्थः।द्रव्याणांस्वपरिच्छिन्नगुरुत्वेनपलादिशब्दवाच्येनपाषाणादिनातुला
यामारोपितेनयेनसुवर्णादिगुरुत्वंउन्मीयतेनतदूर्ध्वारोपणादूर्ध्वमानमितिशब्देनविवक्षितं।तदुन्मानं।आरोहपरिणाहाभ्यांसर्वतोनाभ्यांयेनकाष्ठा
दिमीयतेतत्प्रस्थादिपरिमीयतेनेतिपरिमाणंप्रस्थादि।परितःसर्वतोभावे।आयामोदैर्घ्यं।स्वयेनमीयतेतत्प्रमाणं।तच्चकेचित्तिर्यगवस्थितस्य
स्तुनोपरिभावस्थादेर्हस्तादिः।केचिद्दूर्ध्वाधिरोहिणमवस्थितस्य।यथाहाञ्जिनमुदकं।ऊरुदघ्नमुदकमिति।संख्यातुउन्मानपरिमाणप्रमाणेभ्यः
पलादिप्रस्थादिहस्तादिभ्यःभिन्नाबहिर्भूताएकत्वद्वित्वादिर्बोध्येति।इहसंख्यापरिमाणयोरेवग्रहणंनतूउन्मानप्रमाणयोर्विवेचनेप्रसंगात्
तमितिबोध्यं।असमासेनिष्कादिभ्यः।निष्कपणपादमाषवाहद्रोणषष्टिरितिसमस्तनिष्कादयः।नचद्रोणशब्दःपरिमाणवाची।प्रस्थशब्देसंख्यावा
ची।ताभ्यांठञिप्राप्तेवचनं।इतरेषांतुपंचानांउन्मानवचनत्वात्पूर्वसूत्रेणसिद्धेगच्छिसमासप्रतिषेधार्थंवचनं।अन्येतुआहुःपूर्वसूत्रेपरिच्छेदक
मात्रंसंख्याभिन्नंपरिमाणशब्देनगृह्यतेतेनसर्वेभ्यष्टञएवअपवादः।परिमाणंतुसर्वतइतिभेदेनतुप्रस्थादिनंतुप्रमाणपरिमाणभ्यांसंख्याया राम १४७

श्चापिसंज्ञायेइत्यादावुपयोक्ष्यतेइतिएतच्चपदमंजर्यांस्पष्टं।सुगच्छमिति।गवादिभ्योयत्।यवाद्यमिति।विभाषाहविरपूपादिभ्यइति
यत्।न्यासकारस्त्वाहअन्नविकारत्वादेवसिद्धेऽपूपादीनांप्रतिपदपाठस्सामर्थ्यात्त्रिदंतविधिर्नेतितद्धितविरोधादुपेक्ष्यमितिभावः।तस्मै
धर्म्यमिति।संख्यापूर्वपदानामितिकिं।इहमाभूत्।परमपारायणंकर्म्यमिति।द्विशूर्पमिति।द्वाभ्यांशूर्पाभ्यांक्रीतमितिनद्धितार्थेद्विगुः।तत्राणावदेषालु
स्या गंतात्प्रकृतिरितिसं[redacted]पूर्वपदादप्रकृपादन्यतरस्यामितिअनुत्तरोत्तरविधिर्हृवेतिलुक्।।द्वैशूर्पिकमिति।ठञोद्विगुप्रतिनिमित्तताभावाल्लु
गभावः।परिमाणांतस्यसंज्ञोत्तरपदवृद्धिः।ताना।उत्तरसूत्रेणशासस्यकनोपवादः।स्येनशेठेनाप्याइति।संनसाहिनाशारदेनाठत्तरपदलोपस
मासः।पंचकइति।लौकिक्याःसंख्यायाउदाहरणं।बहुकइति।पारिभाषिक्याः।तावतिकाःइति।इसुसुक्तांतात्कः।अर्थवतितिशब्दस्यग्रहण त
तु ंमेवयवस्यतितिशब्दस्यपर्युदासोत।कतिकः।बेसोरिडा।वतोरितिपंचमी।साचकतितिप्रथमायाःषष्ठीदूरस्यषष्ठीसाह।वतंतात्कतेइति।अ
कइति।अर्धशब्दःकायपर्यायाद्अर्धैरूढ्कृतिभागवदर्धस्यासामर्थ्यमितिद्वयं।यद्वाप्रकरणादिवशेनभागविशेषविज्ञानेसतिनास्यसामर्थ्यं
शूर्पान्।अञोपवादः।शूर्पशब्दस्यपरिमाणंमात्राचित्वात्।ज्ञानमानं।वह्नकुनाम्मिति।ज्ञानमानेपरिमाणं।ततश्चाध्यासः।विंशत्याक्रीतंविंशतिकं।
संज्ञाशब्दोयं।असंज्ञायांहिविंशतित्रिंशद्भ्यामितिवुन्स्यात्।संज्ञायप्ररिणमोस्यतराज्यासः।अध्यर्धनिरस्यततद्धितकृ।मासःचसनंवाशद्वातु

णि वा । सहस्रं संख्या । ततः संख्याया अतिशदन्ताया इति कन्प्रासः इति विवेकः । अध्यर्द्धपूर्व । अध्यारूढमर्द्धं यस्मिन्न् तत् अध्यर्द्धं । अर्धादिभ्यो
धातु जस्येति साधुः । अध्यर्द्धपूर्वं च द्विगुश्चेति समाहारद्वंद्वः । सौत्रं पुंस्त्वं । अध्यर्द्धपूर्वाद्द्विगोश्च । परस्येति अनेन सूत्रे द्विगोरिति पंचमी । स
कं भवति । एतच्च वृत्तिकाररीत्या व्याख्यानं । अत्र वार्त्तिकं । द्विगोर्लुकि तन्निमित्तग्रहणं द्विगोर्निमित्ते यस्तद्धितः तस्य लुगिति वक्तव्यं । द्वाभ्यां शू
र्पाभ्यां क्रीतं द्विशूर्पं । द्विशूर्पेण क्रीतं । द्विशौर्पिकमित्यत्र हत्वेदाहृते द्वितीयस्य मा भूत् । तथा । अर्थविशेषासंप्रत्यये अतन्निमित्तादपि यत्र
तद्धितात् यद्द्विगुना सह अर्थेन निमित्तेन तत्र सतद्धितो यस्य निमित्तं न भवति तस्मादपि द्विगोः परस्य लुग्विवक्तव्यं । द्वयोः शूर्पयोः समाहारो द्विशू नि
र्पी । तया क्रीतमिति विग्रहेऽपि द्विशूर्पमित्येव यथा स्यात् । वस्तुतस्तु सूत्रे द्विगोरिति षष्ठीमाश्रित्य द्विगोर्निमित्ते यस्तद्धितं तदुत्पन्नाख्ये च द्विशूर्प्या
क्रीतमित्यत्र तु न विधानात्तस्य योनेनिमिनाप्यारूढः पंथाः । पांचकलापिके इति । एवं च पांचलोहितिकमपि बोध्यं । पंचकलापाः परिमाणमस्य
स्य पंच[redacted]लोहिन्यो गुंजाः परिमाणमस्येति विग्रहे तद्धितार्थे इति समासः तदस्य परिमाणमिति ठञ् । भस्याढे तद्धिते इति पुंवद्भावात् लोहिनीशब्दस्य
कारनकारयोर्निवृत्तिः परिमाणविशेषस्य नामधेयमेतत् । असंज्ञाग्रहणं प्रत्याख्यातं तस्य विशेषणं तु द्विगोः । एतच्च वृत्तिकृता वार्त्तिकं तत्र आदौ पमतु राम णं
रूपोदाहृतं । भाष्यवार्त्तिकयोस्तु असंज्ञाग्रहणं प्रत्याख्यातं । तथा हि द्विगुविशेषणमसंज्ञाग्रहणं । पंचकलायं पंचलोहितं द्वौ च द्विगू तत्र द्वि १५८

तलुकावेव संते । यस्मात्ताभ्यामुत्तरपदेन वक्तुरस्य त एवेति स्यादेतत् । अध्यर्द्धशब्दः संख्यावाची तथा च लोके गण्यते । एको ध्यर्द्धो द्वाविति ७१८
अतएवाध्यर्द्धकमिति कन् । अध्यर्द्धकंसमिति तद्धितार्थे द्विगुश्च भवति । तत्किं अध्यर्द्धपूर्वग्रहणेनेति चेत्सत्यं । ज्ञापनार्थमिदं । संख्यायाः
यत्किंचिदस्य नेति । तेन कन्समासोत्तरपदवृद्धिप्योन्यन्न भवति । तद्यथा । अध्यर्द्धकरोति । नेह हलं तसुच्च । यः स कलं तु फलं तं क्रियातमिति
वर्त्तिष्यतुन्नस्मामेव कुर्वन्नध्येति वर्त्तते स एव मुच्यते । विभाषा । अध्यर्द्धसहस्रमिति । शतमानविंशतिकेति विहितस्याणो लुक् । तदभावे तु संख्यायाः
संवत्सरसंख्यस्येत्युत्तरपदवृद्धिः इदानीमेवोक्तं अध्यर्द्धशब्दः संख्यावाचीति । द्वित्रिपूर्वान्निष्कात् । अध्यर्द्धपूर्वग्रहणमुत्तरार्थमनुवृत्तमपि
नेह संबध्यते द्विगोरिति तु संबध्यत एव पूर्वसमासंख्यावर्त्तयितुं । अत्र च व्याख्यानमेव शरणं । अन्यथाध्यर्द्धपूर्वाद्द्वित्रिपूर्वाच्च निष्कादिति
समुच्चयः स्यात् । द्विनैष्किकमिति । प्राग्वतेष्ठञ् । मतो तेरनुवक्कुः । परिमाणांतस्येत्युत्तरपदवृद्धिः । विंशतिकात् खः । शतमानविंशतिकेत्यण्
प्राप्तिः तस्य च लुकि प्राप्ते खो विधीयते । खार्याः । तदस्य परिमाणमित्येव त्रिंशत्तेनस्य लुकि ईकन् विधीयते । प्राग्वतेष्ठञ् । पादस्य पदाज्याति गो
पहतेष्वित्यत्र ना पादस्य ग्रहणं तस्यैवाज्यादिभिर्गतिवचनेः संबंधसंभवात् पद्यती यादावपि तस्यैवानुवृत्तिरिति भावः । द्रुतु
पणमाषाभ्यां साहचर्यात् परिमाणवाचिनो ग्रहणं । शाणाद्वा । पणेव गिति । यद्यपि शाणउन्मानं तथाप्याहादिस्त्रपरिमाणग्रहणेन योगर

स्यापरिच्छेदकत्वाभावेऽयन इतिवादिनां मते अस्यापि पर्युदासादिति भावः। मुख्यमते तु ठगेव बोध्यः। २ शाणाद्वेति सूत्रे शतानाच्चेति वक्तव्यं
पूर्वेणानित्ये प्राप्ते विकल्पार्थं। अध्यर्धशत्यं। अध्यर्धशतं। पंचशत्यं। पंचशतं। यदभावे संख्यालक्षणस्य ठञो लुक्। शतानाच्चान्यतरविति
तु न भवति। न चासमासग्रहणस्यानुवर्तितत्वात्। इति पूर्वादेव। वार्तिकमिदं। चूर्णिकृता सूत्रे प्रक्षिप्तं। शाणादिस्येति। शतग्रहणं तु
नेह संबध्यते व्याख्यानात्। अत्र च भाष्यं प्रमाणमिति भावः। यत्तु न्यासकृतोक्तं। शतशाणाभ्यां चेति सूत्रयितव्ये पणपादेति पृथक्सूत्रे शतग्रह
णं क्रियते तेन ज्ञायते इदं फलं। शतशब्दः स्वरितत्वेनानुवर्तमानोऽपि शाणाद्वेत्यत्रैव संबध्यते न तूत्तरसूत्रे तु न संबध्यते तेन नाणेनानिति तदेतत्सामर्थ्य
वर्णनं अविभाव्य केवाञ्चित्किंसूत्रे तु यत्नमप्रयुक्तमित्याश्रितां तावत्। चेत्प्यमिति। अणि एकार्थ्यनिहितः यं। दक्षोल्लुकि कृते नीयं। तेन क्रीतं। तर्त्तीयं
तात् क्रयणं कर्मणि वा चेत्कादयस्त्रयोदश प्रत्ययाः यथायथं स्युः। ननु देवदत्तेन क्रीतं पाणिना क्रीतं संतोषेण क्रीतं इत्यादावतिप्रसंग इति
चेन्न संख्यैकत्वेन तृतीये चेह सर्वविभक्तिः सापि सूत्रस्य द्व्यसमर्पकाच्छ्रुताद्वुरस्यानन्तरस्यापि अन्यत्र हि अनभिधानान्न प्रत्ययः। एतच्च तद्धिता
इति महासंज्ञाकरणाल्लभ्यते। तेभ्यः प्रयोगे ■ भ्यो हिता इति व्याख्यानात्। पुत्राद्धरकथयत्त्वात्। यः क्रतुरित्वितेन हि क्रतुः संयोगो नापुत्रा नइति चेन्मैवं। राम
सं प्रयुज्यते तेनेनेमिस्तुसत्वाहि येन याज्ञादिकरणेन पुरुषाः फलेन संयुज्यंते। स याज्ञादिरपि संयोगः न केवलं संबंध एवेत्याग्रहइति हरदत्तः। न १४८

हिन्र
स्व प्ररः। तद्विद्विनइमिच। योगविभागो यथासंख्यनिरासार्थः। गुनरार्थश्च। तस्यवापः। तस्येतिवापापेक्षया कर्मणि षष्ठी न कर्तरि। तेन दे
वदत्तस्य वापः क्षेत्रमित्यादौ न। तदस्मिन्। वृद्ध्यायलाभशुल्कोपदा ग्रहणं प्रपंचार्थं तस्याप्यायविशेषत्वात्। तथा शौल्कशालिक इत्यत्र ठगायस्थानेभ्य इति
भवति। आर्द्रिकादिनि। अर्हा चेति वक्तव्यमिति नि तु प्रासः सनिचनस्मिन्दीयतात् इष्यते तु टाप्। रूपकस्येति। रूपकं कार्षापणं। रूप इति
नयाचभागवदपेक्षतेनासामर्थ्यं नोद्भावनीयमिति भावः। भास्यां तरमिति। भारभृतार्थाभिधायित्वाद्वंशादयो भारशब्देनोच्यंते प्रत्येकं संब
ध्यविवक्षयासूत्रे एकवचनं। वस्नद्रव्याभ्यां। वस्नो मूल्यं। संभवत्यवा। आधारप्रमाणमाधेयप्रमाणस्य यदनाधिक्यं तदुपसर्जनं धारणं संभव
ते रर्थः। अतः सकर्मकत्वाद्द्वितीयानुवृत्त्यालभ्यमाना द्वितीया समर्थविभक्तिर्नविरुध्यते। तदाह। स्वस्मिन्निति तादि। स्त्रे वैवहरति। स्त्र ष ठ
पसर्गस्तस्याचष्टे। उपसंहरति। नितस्यंचनीति। पचति ग्रहणं संभवस्यवहरति निरत्यर्थं द्रोणप्रमितं ब्रीह्यादो द्रोणशब्दः। आढकाचित।
पक्षे वगिति। नतु ठञ्। आढकादीनां परिमाणत्वात्। द्विगोः ष्ठंश्च। ष्ठन्निति छेदः। तदाह धिस्वादिति। अपरिमाणेति। तस्मिन्स्तत्रे आचितशब्दे
साक्षा स्यनुपादानादिति भावः। तदस्यपरि। इह परिमाणशब्देन परिच्छेदकमात्रं गृह्यते। न तु सर्वतोमानमेवं उत्तरसूत्रे संख्यायाः परिमाणेन विरो
धणात्। पद्विंशो। वितपरिमाणमस्यपाचिकः। पंचदशो मंत्रा इति। सामास्कबीन। एकं साम तृचे क्रियत इति हि श्रुतिः। तत्र तृचस्य पंचकृत्वः
सं॰

श्री

आवृत्त्यापंचदशतंत्राः।समुदेशोसोमेभ्यःस्त्रायाःसमहृत्वआवृत्तिः।एकविंशत्वंचस्यडित्करणमेकविंशतेर्लोपार्थं।त्रयस्त्रिंशादौटिलो
पार्थंच।पंक्तिविंशति।पंचन्शब्दस्यटिलोपः।तिप्रत्ययः।चोःकुरितिकुत्वं।स्त्रदिशदिश्वाइति।तथाचात्रेनावयवार्थोभिनिवेश्यते।पंक्तिशब्दोहिना
नार्थः।अस्तिछंदोविशेषयस्यपंचाक्षराःपंचपादाः।अस्तिवकैमससन्निवेशोत्रलक्षणपंक्तिरिति।अस्तिदशसंख्यायां।तत्रतानुपंक्तिरथोविर्व
घ्ययदिति।दशारंगयइत्यर्थः।द्वयोर्दशतोर्विंशभावः।शतिश्चप्रत्ययः।अपदत्वंच।त्रयोदशतोःपरिमाणमस्यविंशतिः।त्रयाणांदशतांत्रिंशभावः।शच्चप्रत्य
यः।चतुर्णांदशतांचत्वारिंशभावः।पंचानांदशतांपंचाशभावः।षण्णांदशतांषष्।तिश्चप्रत्ययः।अपदत्वंच।सप्तानांदशतांसप्तभावः।अष्टानांदशतामशी।
नवानांदशतांनवभावः।दशानांदशतांशभावस्तश्चप्रत्ययइतिदिक्।पंचद्दशतौ।वर्गइति।संख्यायाइतिकन्।विंशत्यादयःपत्रिंशतोऽतीतिपंचम्यर्थे
षष्ठी।द्विवचनं।चत्वारिंशानइतिसूत्रपाठेतुसमाहारद्वंद्वात्।पंचम्येकवचनं।अत्रब्राह्मणसंज्ञायामितिनिषेधः।समासेननिर्दिष्टस्तुविनं।एवं
हिब्राह्मणस्यचेत्संज्ञेतिस्कुटीभवति।अन्यथातुपस्यकेस्याविलसंज्ञायोब्राह्मणस्यैवप्रयोगेइतिसंभाव्येत।मंत्रेभाषायांचउणनेस्यात्।इष्यते
तुसः।तस्मादिशानुरोधेनव्याख्येयं।छेदादि।इहनित्यग्रहणंभाष्येप्रत्याख्यातं।छेदादिःपूर्वसूत्राद्यदनुवर्तनेतदाहायस्याधिति।केचित्तुदंडादि राम
भ्योयइतिसूत्रंपठंति।तत्राप्यविरोधाद्युपेक्ष्यमितिहरदत्तमाधवादयः।तथाहिक्वचिद्विधेहननेवोवधः।तद्धिनोवेत्युक्तं।यंदिनेहस्यद्विधीयेतेनदेन १५०

स्त्रमेयमाहितिल ५।१।५९:२

४८

त्र दुपपद्यते।कथंयाघुदान्तत्वंयत्यपितद्धितेयतोनावइत्याद्युदात्तमेवेतियदिस्वत्रयोविधीयेतनतदास्वरोभिद्येत।यत्तुप्रमाणंतरोपन्यसनं १५०
इनंवधमेधशब्दाः।दंडादयः।तेचछंदसियदंता।आद्युदात्ताःदृश्यंते।इष्यान्नराजावनान्यति।तस्मादपिवध्यंप्रपन्नंनप्रयच्छंति।अपांमे
ध्यंयज्ञियमित्यादौ।ति।तन्नदंडादिभ्योयविधानेपितस्यभाषायांचरिताथ्यात्।तथाछंदसिचेत्यतेरसूत्रेणबाधस्यन्याय्यत्वात्।तेनहिप्रातिपदि
कमात्रात्तछंदस्यर्हतीत्यर्थेयद्विधीयते।चप्रत्ययंवदङ्गिरपिछंदसिचेतिमंडूकप्लुत्यायुतएवविधेयत्वादितिदिक्।कडंकरदक्षिणाच्छच।कडंग
रेतिपाठस्तुहरदत्तमाधवादिविरोधादुपेक्ष्यः।स्थालीबिलात्।छयतावनुवर्तेते।पाकयोग्याइतिनिष्फलाःकृताइतियावत्।यज्ञर्त्विग्भ्यांतिजम
र्हति।ति।अर्घ्य।समर्थविद्वान्शास्त्रेणपर्युदस्तइत्यर्थः।देशस्यानेवंविधत्वादुपसंख्यानं।पत्तिपादेशइति।यज्ञानुष्ठानयोग्यइत्यर्थः।
आह।पारायणंगादीनांद्वादशानांगतोवधिः।पारायणंतु [illegible]रायणं।आदितआरभ्यआन्तादविच्छेदेनवेदस्याध्ययनंपरायणं।तत्रगुरुशिष्या
भ्यांनिर्वर्त्यते।अन्यतरासन्निधौअध्ययनक्रियायाअनुत्पादात्।तथापिशिष्येएवप्रत्ययइष्यतेनतुगुरावित्याकरः।तद्दर्शयति।पारायणि
कश्छात्रइति।तौरायणिकोयजमानइति।इदमपियजमानएवेष्यते।ऋत्विक्तुयद्यपिपुरोडाशादिकंनिर्वर्तयतितथापितत्रनेष्यतइतिभावः।वि
षयाभूतोयमिति।संदेशयतितुप्रत्ययोनेष्यतइतिभावः।तथाचमासंमासमपरोनगरंतेनसांशयिकित्वादितिसंदिश्यमानएवतद्वाःप्रयुज्जते।यत्तुसांशयिकः

संज्ञायां पन्नमानसः इत्यमरेणोक्तं तदपि संज्ञायां पन्नमानसं यस्मिन्निति विग्रहे इति व्याख्येयमिति भावः। ततोऽभिगमनमिति। अत्रायं च मन्यंता
त्वस्य यः पन्था ल्यनित्यं अत्र निर्दिष्टग्रहणं भाष्ये प्रत्याख्यानं। उत्तरपथेन। चकाराद्गच्छतीति प्रत्ययार्थ आक्षिप्यते तदाह उत्तरपथेन गच्छतीति
कालात्। स्वरूपग्रहणमिह न भवतीति। न मधीष्टो भूतो भूतो भावी त्वस्य तं संयोगे हितीया निर्दिश्यते मासादयश्च। स्वादौ मासादीनां कालत्वेन विशेषणे
८ चानेन निर्वृत्तं नेति निकरणे तृतीया। चतुर्थ्यर्थे तृतीयेति तेन निर्वृत्तं इत्यत्र तु करिष्यतीति विशेषः। उभयत्राप्येन भाविन त्वर्थाहृतः कर्मणि [illegible] मासादि
यस्मि। स्वयो मिलकरणं स्वरो थंपुंवक्ष्यत्व प्रतिषेधार्थं चामासी नाभार्यः। द्विगोर्यप्। पितादनुदात्तः। तेन कालं तेन द्विगादि निर्वृत्त पद प्रकृतिस्वरो
निष्ठते। मवपीति। अत्र व्याख्यानेशरणं हेयन्ति कृ इति। न च त्रराज्ञाहः सखिभ्य इति परत्वाट्टचा भाव्यं न च महाविभाषया टचो विकल्पः। हृ
हती जात्यंताः स मासांताश्चेति निषेधप्रतिषेधाद्टच आह। समासांतविधेरिति। द्विवर्षीणो व्याधिरिति। व्याधिशब्देन प्रत्ययार्थस्याचेतनतो
क्तो। चित्तवति हिनित्यं लुग्वक्ष्यते। पविजयस्य रूपस्यविवरणं जेतुराध्यइति। महानाम्नो नामेति। तथा चाभाषित पुंस्कत्वात् पुंवद्भावो नेति भावः।
हरदत्तस्त्विति। यौगिको यं न तु रूढइति मन्यते। अध्ययसंघातादिति वचनसामर्थ्यादिहास्यादपि प्रत्ययं इति भावः। कालाद्यत्। कालस्य ग्रीन निति शा राम॰ य
नःकालिकाल्पशाद्धस्यलुप्तत्वं तरंत्यं। प्रकृष्टे ठञ्। प्रकृष्यतेय मिति प्रकृष्टः। कर्मणि तृतीया। ग्रहणं विस्पष्टार्थं अन्यथा अनंतरस्य यतोऽनुह १५१

तिरार्शक्येन। अतः इष्णोवधिः। तेन तुल्यं क्रिया चेद्वतिः। तुल्यमिति सामान्येन पुंस्तकं। ब्राह्मणेनेति। ब्राह्मणशब्दस्तत्कर्तृकेध्ययने लक्षणया
वर्त्तते ब्राह्मणकर्तृकाध्ययनतुल्यमध्ययनं वाक्यार्थः। गुणतुल्ये इति। अक्रियया तुल्य इत्यर्थः। अत एव महान्सत्वदिति वतेः साधुत्वरक्षण
अ र्थमितिशाखो क्येव क्रियामात्रवितुमर्हति। त्यादिक्रियापदं प्रयुज्जने दृष्टाः। बौवीनाम्लं महानसः सदृशः पवतइति व्याख्यानतः। तत्र विरोधाद्रुपेक्ष्यः।
सिद्ध ननु तद्यत्साधुत्वमस्य नाहश्चबोधोप्यनुभवं इति चेत्सत्यं। नाहशेर्थे साधुत्वमात्रं निराकुर्मो न तु बोधमपि। तथा हि। भेद्यभेदकसंबंधोपाधिने
ति दनि[illegible] विनं। साधुत्वं तदभावेपि बोधो न हि वार्यते। अयुक्तस्य साधुभ्यो प्येबोधात्। न चैवं युक्तस्यासाधुभ्योपि बोधश्चेत्कस्मात्किं तूच्यते
इति न नियंतुं शक्यं। किं तु किं विशेष्यकं किं प्रकारकं किं संसर्गकं बोधेऽदृश्ये किं साधु किं नेत्येव शास्त्रस्य विचारविषयः। उक्तं हि गणवतास्समा
श्रापशब्दे नायामर्थविगतेऽश्वैरश्वसस्यानस्यादिवन्नियमः क्रियत इति। तत्र तस्येव। इव्यगुणादितुल्यार्थ आरंभः। क्रियाचेदिति नानुवर्त्तते। तदर्हं। अ
र्हशब्दः पचाद्यजंतः तद्योगे कर्मणि षष्ठी। आमासो चेविभक्तिव्यत्यय इत्येके। अन्ये तु कर्तृकर्मणोरिति षष्ठ्या [illegible] अनित्यत्वे लिंगमिदं तेनयथा ये
योगो रघुत्तममिति मद्विप्रयोगः संमाहितद्वसत्कुः। विधिमर्हतीति। विहितो यो नादेव [illegible] प्रत्यय इति सूत्रे कर्तुमिउं तेन विग्रहः कृते न हितेन यथा
द्विहिता धारायेतिउच्यते। यथा द्वाहोदत्रि विषयेसतार्थः। तथात्वं यथात्वमित्यादि तु लतेलोढादिर्वतो। तत्र यो च द्वितीयोतादर्हीर्थे वतिः। योग्यतामर्हति

यथावदित्यस्य विहितेत्यनेनान्वये आयवास्तरस्येनेनवा ०२

विधानमाख्यानं वेत्यर्थात् क्रियायोगोऽपि सुलभः। तस्य भावस्त्वतलौ। प्रकृतिरिति। न तु यः कश्चिद्धर्मः घटत्वमित्यत्र द्रव्यत्वादेर्भानात्। गोभ्र २
व इति। इह गोत्वाद्यो ऽर्थपरः स्वरूपपरो वेति पक्षद्वयं। आद्ये धर्मविशेषः प्रत्ययार्थः स च धर्मत्वेनैव भासते। प्रकृतिजन्येत्यादि तत्प्रयोगोपाधिः।
७ द्वितीये जन्यबोधप्रकारः प्रत्ययार्थः। स बोधप्रकारमात्रं वा जन्यत्वं तु संसर्गः। सर्वं चेदं स्पष्टं महाभाष्यकैयटादावूढमेव। एवं स्थिते कृत्तद्धितसमा
सेषु एकार्थीभावाभ्युपगमात्तत्तदुत्तरत्वतलादिभिरपि उक्तरीत्या संबन्धबोधनं निर्वहति तत्र नातिवैशारद्यं नरकस्य। किं तु तत्र प्रकृतिप्रत्यययोः
पूर्वोत्तरपदार्थयोश्च संसर्गोऽपि प्राधान्येन प्रकारतया प्रविशति। औपगवो राजपुरुष इत्यादौ तु संबन्धार्थस्य वृत्तौ प्रवेशावश्यंभावात्। पाचकत्व
दावपि कारकांशप्राधान्यात्। कर्तृत्वादेश्च संबन्धविशेषात्मकत्वात्तदेतदभिप्रेत्य हरिदीकायामुक्तं। कृत्तद्धितसमासेभ्यः संबन्धाभिधानं
भावप्रत्ययेनेति विस्तरः शब्दकौस्तुभे बोध्यः। पृथ्वादिभ्य इमनिज्वा। अणादीति। इगन्ताच्च लघुपूर्वात्। मृदुप्रभृतयस्त्वस्मिन् गणे समावेशः चेद्ररखंडा
दिषु गुणवचनेषु च पठ्यन्ते। बालवत्सादिषु वयोवचनस्यात्र इति बोध्यं। तेन लोपस्तु पूर्वसूत्र एवोक्तः। वर्णदृढादिभ्यः ष्यञ् च। गुणवचनत्वादेव सिद्धे इम
निजर्थं वचनं। औचित्यमिति। ब्राह्मणादेराकृतिगणत्वात् ष्यञ्। हलस्तद्धितस्येति यलोपः। एवं चैव यथाकामी। अत्र गणसूत्रं वैयातिलामममतिमनःशा राम
रदानां। विशाखादुत्तरे ये यातादयः पंचतद्दंतानां समासो नो। अनंतरः ष्यञ् भवतीत्यर्थः। विधानत्वं विधानता विधानिमा वैधात्यं। विलाभत्वं विला १५२

तारे

ता विलाभिमा वैलाभ्यं विमतित्वं मैविनिता विमतिमा वैमत्यं इगंतलादण्। वैमनं विमनस्त्वं विमनस्ता विमनिमा वैमनस्यं वैशारद्यं विशा
रदिमा। समो मतिमनसोः। सामंमतित्वं सम्मतिता संमतिमा सांमत्यं। पूर्ववद्रण्। सांमनस्यमित्यादि। गुणवचनब्राह्मणादिभ्यः कर्मणि च। कर्मेह क्रिया कार्यं चे
ब्राह्मणादिराकृतिगण इति। केषांचित्साधुत्वं कार्यं निराबाधं। तथाहि। अर्हतो नुम् चेति नुमर्थः पाठः। ऐकभाव्य त्रिभाव्य। अन्यभाव। एषां पाठः स्वार्थे
विधानार्थः। तथा च चातुर्वर्ण्यादिप्रयोगः। आन्यभाव्यं तु कालशब्दव्यवायादिति सूत्रव्याकरणाधिकरणे प्रयोगो यमिति निमेहे रूपनस्त्वं न तु वपक्षिणः मो प्र
हिवादमात्रं प्रायेण तस्मिन्प्रयहकेनाह्वानामेवोपन्यासात्। तद्यथा। अविरविकन्यायेनेत्यहाहानंतरपिहिवस्तनो निर्देशमेव। अविः अविकः।
अनयोर्मध्ये विकारादिप्रत्ययः कप्रत्ययो नादेवनतु केवलात्। तेन आविकं मांसमिति भवति न तु आवमिति सूत्रादिना। अत्र अविरविकमिति
सुवंनहृय [redacted] समुदायेऽचरमं सुपे विहाय प्राग्भागमनुकृत्य अविरविकन्यायेनेति भगवता व्यवहृतं तत्र को नाम दोषः। न हि विभक्तिविशिष्टमे
वानुकर्तव्यमिति नियमे बीजमस्ति। अस्यवामीयमित्यादिनिरूढव्यवहाराच्च। एतेन नासदासीयं ब्रह्मसूक्तमिति शांकरभाष्यप्रयोगोऽपि व्या
ख्यातः। आसीदित्यत्र तकारं विहाय प्राग्भागस्यैवानुकरणात्। भाष्ये वारोदिष्वादावप्यनर्थकस्यैकदेशस्यानुकरणं प्रसिद्धमेव। अथवा आसी
दितिनांतस्यानुकरणं ततः अनुकरणं चानितिपरमिति निपातनादव्ययत्वे अव्ययानां भमात्रे इति टिलोपः। प्रकृतमनुसरामः। सर्ववेदः इति। पूर्वकालैकेति (

समासः। चतुर्वेद इति। न द्विगोरर्थे द्विगुः। अणो लुक्। चतुर्विद्य इति। विद्यालक्षणस्त्वं नादिनिवृत्तः। तस्य लुक्। संधानग्रहणमिति। वर्णग्रहणे
तु अकारस्य यस्येति लोपे तस्य ह्रस्वविधौ स्थानिवद्भावाद्यादेशः स्यादिति भावः। ननु संधानग्रहणेऽपि अल्लोपस्य स्यादिति कुतो नेति चेन्न। आरंभसा
मर्थ्यात् नानर्थकेऽलोन्त्यविधिरिति निषेधाद्वा। कपिञ्जलः। इह कपिञ्जल नीशब्दो हो। अर्थविपिहोनयोर्पर्यासं[redacted]नेष्यते। एवं पत्यन्तपुरोहितादिभ्यः
हायनान्तयुवादिभ्यः। द्वन्द्वमनोज्ञादिभ्यश्चेत्यत्रापि बोध्यं। ब्राह्मणादित्वादिति। यद्यपि ब्राह्मणादिषु राजशब्दः केवलः पठ्यते तथाप्ययमेवासेद्ध इति
प्रतिषेधो ज्ञापयति अस्मिन्न राजशब्देन तदंतविधिरिति। एवं च ब्राह्मणादिपाठस्य समासार्थे चरितार्थत्वाद समासे विशेषविहितो यगेव भव
ति। अत एव अवेक्ष्याधिकरणे राज्ञः कर्म च राज्यं ब्राह्मणादित्वात् ष्यञिति शांबरभाष्ये हृपादेहृविनं केचित्तु भाष्यसमर्थयमाना इत्यमाहुः ब्राह्म
णादेराकृतिगणत्वादेव तदंतात् ष्यञि सिद्धे राजशब्दस्य तत्र पाठो यक्सहसमावेशार्थ इति। एतच्च हरदत्तमाधवा ध्यामेकीयमतत्वेनोपनि
बद्धं। ब्राह्मणजातीति। ब्राह्मणजातीयेव तु वचो ब्राह्मणादिति किं। तरुणत्वं जातीति किं। देवदत्तत्वं। औपज्ञात्वमिति। उपज्ञात्वादिषु पकेक्षिवचनात्सम्भोहो
त्राभ्यस्त इति। कश्चित्तस्मिन्नविधीयते। सुहृद्दुर्हृद्भ्यां गुणवचनेष्यञिवधश्राह्मादिगंतलक्षणे गुणि। श्रोत्रियस्येति। श्रोत्रियश्छंदोधीते इति छंदसः श्रो
त्रभावः। घ्यप्रत्यय इति यद्व्याख्यानं तद्देह घलोप इति यथाश्रुतं यदा तु वाक्यार्थे पदवचनमिति पक्षः। तदा घशब्देन घइतिस्त्संबन्ध्यनो केचि

रवं
समा
वि
राम
१५२

तुयल्लोपश्चेति पाठः तत्रयेति सेधानग्रहणं द्रष्टव्यं। इगंताच्च लघुः पूर्वोवियवो यस्येति शानिपदिकविशेषणं। पूर्वलिंगं च सन्निधानादिगवधि
कमेव। इगंतात्किं। घटत्वं। लघुपूर्वात्किं। पांडुत्वं। कथं काव्यमिति। यद्यपि कुधातोरोराववश्यके इति ण्यति काव्यमिति तु साधं तथापि कवेः कर्मेत्य
र्थे काव्यमिति स्यादिति प्रश्नः। आभिधानार्थं कमिति। अभिधेयस्य भावः कर्म वेत्यर्थः। स्तेहा याद्द्रेति। स्तत्रेण नित्ये प्राप्ते विकल्पार्थं वचनं।
गोत्रचरणात्। अपत्याधिकारादन्यत्र लौकिकं गोत्रं तेनापत्यप्रत्ययान्तेभ्य इत्यर्थः। प्रवराध्यायप्रसिद्धेभ्य इत्यपरे। गोत्रं च चरणैः सहेति जाति
त्वात् ब्राह्मणेन जाति। त्वतलि प्राप्ते वचनं। श्लाघेत्यादि। श्लाघादिषु विषयभूते ष्वित्यर्थः। प्राप्त इति। इणः प्राप्त्यर्थत्वात्। अवगतवानिति। अवबोधस्य
ज्ञानेन प्रसिद्धत्वात्। गार्गिका चेति। आपत्यस्येति यलोपः। होत्राभ्यश्छः। होत्राशब्द इति। जुहोतेस्त्रन्। ब्राह्मणस्त्वः। नेति वाच्य इति। छप्रत्यये प्र
तिषिद्धे तस्य भावस्तत्ता चेत्येव सिद्धेः। विभक्ते स्तनुच्चारणात् नुलाघवं चेति भावः। ब्राह्मणेति। अनेन होत्राभ्य इत्यस्य तु रत्नेः फलं दर्शितं। नञ्स्नञो
रधिकारः समाप्तः। भाष्यानां। नवनापेक्षया कर्तृशिघ्ना पांभवति सिहो समिवचनेः। ब्राह्मणात्यो[redacted]निर्देशादेव षष्ठी समर्थविभक्तिः। सा च भ
वनापेक्षया कर्मणि। तेन कर्मत्वमेव। अलौकिके प्रक्रियावाक्ये तु न हि न विधा च नु वादसामर्थ्यादिवेति बोध्यं। येन यचवेक। अत्र प्रत्ययार्थसामर्थ्यात् हि भाष
श्च असमर्थविभक्तिः। विभाषा। खत्ति प्राप्ते वचनं। न च तमाभंगयोर्धान्यत्वे विप्रतिपन्नत्वं ज्ञानेन समनदर्शानिधान्यानीतिस्मरणात्। तत्र चो माभंग योर

ष्पिपाठादिति भाष्ये स्थितं । सर्वचर्मणः । अत्र तृतीयासमर्थविभक्तिः सामर्थ्यात्तिद्धतइति हि प्रत्ययार्थः । तत्र च चर्मणः करणत्वमेवेति नो ।
यथामुख । दृश्यतेऽस्मिन्निति दर्शनम् आदर्शादिः अधिकरणे ल्युट् । ननु असादृश्ये इति प्रतिषेधात्कथं समासस्तत्राह निपातनादिति । एतच्च इति
ग्रंथमनुसृत्योक्तं भट्टिकाव्ये तु । पदार्थानतिवृत्तौ यथाशब्द आश्रितः तथा च मायामृगं प्रक्रम्योक्तं । यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्निति
यथामुखं दर्शनइति । अव्ययीभावस्यापि यथामुखशब्दस्योपन्नगंगादिवत्सत्ववचनात् । कर्मशक्तियोगे सति कृद्योगलक्षणा षष्ठी । नाव्ययीभा
वादित्यम् । सर्वस्येति । संमुखस्येति तु नोक्तं प्रत्ययसन्नियोगेनान्त्यलोपनिपातनात् । संशब्दस्य समशब्दस्यार्थे प्रायेण न दृश्यते संमुखोऽभवेत्य त्राभिमु
खोभवे स्त्यर्थप्रतीतेः । न च खप्रत्ययस्याभिष्टत्वात् कथं न हिंसितं युगे संमुखीनं तमुद्दंडं प्रसहेत कः इति भट्टिः अभिमुखावस्थानं साधयेत्यादि निह
रदत्तः । सर्वपथीन इति । पूर्वकाले के तिसमासः । अकृत्य इति समासांतः तस्य पथ्यं तु समासग्रहणेन ग्रहणात्तवः । अनुपदसर्वा । यथानस्त्रय नि
नेयविति निपातनात्त्रिंतस्य हेहः । अनुरायामइति । यस्य वायामइति । यथार्थे यदव्ययमिति वाव्ययीभावइत्यर्थः । स्वकर्ते विशेषइति । गतिविशे
षइति व्याख्यांतरं । न यतेः प्रधाने कर्मणि यत् । अप्रधाने द्वितीया । अत्रेयं द्यूतशास्त्रमर्यादा । चत्वारो वीथयः प्रत्येकं द्वादशकोष्ठोपेताः शारास्त्व राम
त्रिंशत् । तत्रैकैकेन क्रियते न पंचदशास्त्वनामपार्श्वस्य प्रथमकोष्ठपर्यंतं प्रदक्षिणप्रसव्यगतिभ्यां नेयाः । सर्वेऽप्ययानयीनाः ससहायस्य शारस्य व १५४

रेन केनाप्यनेपदं । असहायस्य शारेण परकीयेणावाध्यत्वे । एष च बहुस्वमनोर्थः । यत्तु कैयटेन द्वयोः पर्युदासेन त्रयोदशानामेवायानयीनत्वे
त्यादायेन नमन्तो नरकैविलसितादिनोक्तं तन्मनेदह एव । धीर्थ । शंगव्रतप्रदक्षिणप्रसव्यानेव एकैकं किं नवं प्रतिषिद्धं तेन तु कं चिन्नप्रतिषिद्धं
स्थितेन चयं किंचरमकोष्ठस्थान्यो द्वाभ्याभिनेरेषामेवेति बोध्यं । शारइति । शृणोत्येनेन द्यूतकाराः परस्परमिति शारः द्यूतसाधनविशेषः वा
हुलकाद्दुः । परोवर । अवरस्येति । आदेरित्विशेषः । उत्तेलने आहुणः । अवारपार । गामीति । गमेरिणिः । आङितीत्येतिबहुलवचनाल्ले
वलादपि णिनिः । भविष्यति गम्यादयइति भविष्यत्कालतान्यासकारस्य आवश्यके णिनिः सोऽपि भविष्यत्येवेत्याह । अधश्वीन । अधिन
गो किंकोनिर्देशेन तु स्त्री । लिंगनिर्देशोयं । अघश्वीनोऽस्त्र इहः अघश्वीनं गोमंडलस्त्रियादावपीष्टत्वात् । असन्नभिस्यपइति । अथवाबालं वेणुति
स्त्रेणआविदूर्यमेतेः यत्प्रविधानादवष्टब्धशब्दः आसन्नेपरइत्यर्थः । अथवाश्चेवेतिवार्थे समासोऽपि निपातनादेव । गोशब्दो गोः प्रतिदाने
लक्षणयावर्त्तने इति दर्शयति । अस्य यत्परिपर्यंतमिति । आगवीनइति । आङ्मर्यादाभिविध्योरित्यव्ययीभावे उपसर्जनह्रस्वत्वे बहुलनेखे प्रत्ययः आ
गुणः । गोः पश्चादिति । पश्चादर्थेऽव्ययीभावः पयामिति क्रियाविशेषणं च हरदत्तः । हि नीयोनादिह प्रत्ययः अनुग्विलस्य क्रियाविशेषणत्वाभावा ण
मुष लंगामी । स्यस्त्रानावितिणिनि प्रत्ययांततया कृद्योगलक्षणा षष्ठी स्यादिति वाच्यं । क्रियाविशेषणत्वदप्रत्तेः शोभनं पाचक इत्यादौ तथादर्शना

स॰फलभावनयोर्धात्वर्थत्वाद्धोऽनादेर्विक्लित्तिविशेषणस्य भावनामात्रकर्मणो द्वितीयैव॰फलस्या॰धात्वर्थत्वमात्रांशस्याह॰न॰च॰तानुकूलव्यापारस्य धात्वर्थत्वे भावनामात्रं प्रत्येव कर्मतानु॰ मनु विक्लित्तिं प्रतीत्यांशस्याह॰ मे॰ ॰९

दित्याह। सक्तः सक्तस्सर्थं प्रतिति हि कर्मत्वं। तत्र न भावनामात्रं प्रतितत्कर्मणो विक्लित्यादेः प्रातिपदिकार्थत्वाभावात्। संकोचे मानाभावा
च्च। किंतु विक्लृत्यनुकूलव्यापारस्त्वेप्रवृत्तिः कृत्यर्थः प्रतिकर्मणि स्वं तुलादेरेव षष्ठीति तस्याशयः। अत्रेदं वक्तव्यं। पश्चादर्थे व्ययीभावोऽय
मिति निर्विवादं पश्चादिति चास्तात्यर्थे निपातितं। तत्र यद्यपि विभक्तित्रयसाधारणं तथापीह योग्यतावशात् सप्तम्यर्थवृत्ति अतस्तस्य कर्म
त्वायोगात्प्रथमानादेव हप्रत्ययउ क्तिनः कृद्योगलक्षणषष्ठीशंकाप्यनुपपन्नेति। अभ्यमित्रीणः। लक्षणेनाभिप्रतीइति समासः क्रियाविशे
षणत्वान्नद्वितीयासमर्थविभक्तिः। गोष्ठानवत्। गावस्तिष्ठंत्यस्मिन्निति गोष्ठः घञर्थे कविधानमित्यधिकृत्य लोकः अंबांबगोभूमी तिषत्वं। एका
हेति। नविह यहि रहनि। स्त्रिगमध्वेत्यपंवाधित्वा परिमाणस्याख्यायां सर्वेभ्य इति घञ्याभोति। असिचात्र परिमाणाख्याए काहेनेति परिच्छे
दावगमात्तत्सत्त्वे। अस्मादेव निपातनादष्टा। अश्वस्येति। कर्त्तरिषष्ठी। शालीनकौपीने। स्तुदिशा द्वावेतौ अवयवार्थं तु नानीशालिनिवेशयां शा
लाप्रवेशमिति। अप्रागल्भ्यादन्यत्र गंतुमशक्तः शालामेव प्रवेष्टुमर्हतीत्यर्थः। कूपपतनमिति। यदकार्यं तत्सर्वादनीचतात्कूपावतरणमर्हती त्य
र्थः तद्राच्छादनमिति। वासः खंडइत्यर्थः। अपरआह। अकार्यशिष्टेकरोति। क्रियासामान्यवचनस्तेन लज्जाहेतुत्वेनादृष्टत्वात् पुरुषांलिंगं राम व्या
कोपीनं। अस्तव्ययता तदाच्छादनमिति। व्रातेन जीवति। व्रातशब्दो यद्यपि संधानवाचीतथापि अत्र सभाष्याद्विषयलोनपाविवक्षितमर्थमाह १५५

शरीरयात्रा सेनेति। भारवाहनादिनेत्यर्थः। सत्रभिः पदेरिति। नद्धिनार्थे द्विगुः अप्राप्यनइत्यर्थे खिञ्। हैयंगवीनं। दोहः क्षीरमिति। गोदोहइति यष्ठी
समासः ह्यस्त्वशब्दस्य तेन सहसुप्सुपेति समासः। ततो विकारेऽनुदात्तलक्षणस्यात्रोपवादः खञ्। अत्र ह्यस्शब्देन कालप्रत्यासत्तिर्विवक्षि
ता। नवनीतमिति। यद्यपि भाष्यवृत्तौ घृतमित्युक्तं अमरेणापि तत्तुहैयंगवीनं यत्ह्योगोदोहोद्भवं घृतमित्युक्तं। तथापि नवनीतमेव तत्राविवक्षि
तमिति हरदत्तादयः। तस्य पाकः। पाकः परिणामः मूलमुपक्रमः। जाहचोज कारस्यानेत्वं प्रयोजनाभावात्। पक्षतिरिति। प्रतिपत्। पक्षिणः पक्षमूलं च।
तेन वित्तः वित्तः प्रतीतः। वित्तो भोगप्रत्यययोरिति निपातनात्साधुत्वं। विद्याचुंचुरिति। उकारद्वयगर्भोयं प्रत्ययः। विनञ्भ्यां। नाञौ अकारोऽर्थः स्वरार्थ
श्च। संप्रादश्च। चाहेः क्रियाविशिष्टसाधनवाचकात्स्वार्थे प्रत्ययः। रूढशब्दाश्चैते। अलाबू तिलेत्यादि। भङ्गाभ्य इति पाठः। भङ्गाशब्दश्चायं तः विकारप्रत्य
यापवादोयं। रजसो विकारत्वात्। अलाबूकटमिति। ओरञ्। मयट्चैतयोरिति मयड्भवतस्समासः। तिलोमा शब्दाभ्यां घृतादित्वादंतोदात्ताभ्यामनुदात्ता
देश्चेति तत्र मयड्भाषः। उमोर्णयोर्वेति तु श्वा। असंज्ञायां तिलयवाभ्यामिति मयडिति हरदत्तः। अत्र तिलशब्दस्य घृतादित्वकल्पनेवीजं चिंत्यं। तृणधान्या
नां च द्व्यषामिति क्रिटस्तेन आद्युदात्तस्यैवन्याय्यत्वात्। तथैव तत्त्वात् पुराहतत्त्वात्। तिलोष्व मेरूतत्त्वंतथैव वदेपागवेति दिक्। भक्षापात्तरणं ध्यान्यानां चेद्व
यामित्याद्युत्तारणमयड्भ्रमः। गवांस्थानमिति। तस्येदमित्यर्थेसर्वत्र गोरजादिप्रसंगे इति यत्समासः संघातइति। अप्रस्तनावयवः संघः संघातः

अस्त्वनावयवस्कंधविस्तारः कटच्चाटचौ द्वावपि सामूहिकानामपवादौ। द्वित्रेइति। प्रकृत्यर्थस्य द्वित्वे द्योत्ये इत्यर्थः। उद्गेरो युगमिति। द्वावयवसं
घातप्राधान्यादेकवचनं द्वयं युगमित्यादिवत्। एवं मेयेपि। अवटीटमिति। नासिकासाधनेन मनेवर्नमानात्वार्थप्रत्ययः। क्लिन्नस्य। अत्रवर्द
र्श ति। अस्येति नवक्लव्यं क्लिचैव स्कषी। विल्लेपिल्लेपुरुषेतुमतर्थेत्यू। अ आदिपुस्त्वागाद्वीनानुइति स्त्रवितताक्। अमरोप्याह। स्युः क्लिन्नाक्षे चिल्ल
ता चुल्लपिल्लाः क्लिन्नेक्ष्णि चाप्यमीइति। वार्त्तिकमनेतुरुषेत्युत्सादीनां नद्वयवेलक्षणबोध्या। प्रमाणे द्वयसच्। प्रमाणे विद्यमानात्प्रथमान्तादस्मान्नि
र्दिष्टे प्रमेये येत्रयः प्रत्ययाः स्युः। प्रमाणमिह परिच्छेदकमात्रं न तु मात्रम्। द्वयसज्दघ्नचौ तु विशेषे समर्थनतया व्याख्येयौ। प्रथमश्च द्वितीयश्च ऊर्ध्वमा
ने मतौ मम इतिऊर्ध्वविस्तृते न येनमीयते न तद्धर्मानेऊर्वादिने ने तिर्यक्मानादौ न भवति। अत एव हस्तिकां उस्वेत्र नक्किरित्यत्र द्वयसचोल्लुगिति मा
चोयं। प्रथः मामादिकं इत्सवो चाम्। प्रमाणे लः इति। लुक्। एषा पूर्वाचार्यसंज्ञा प्रमाणग्राहृ तेन चये प्रसिद्धादिष्टि हस्तादयः तनःपरस्येवायं लुक्। वा
मो द्विगोर्नित्यमिति। एतु मात्रचो लुक् इतिरयोरस्त्ये भवान्। शमादीनामनूर्ध्वमानेत्वात्। द्विगोर्नित्यमिति। द्विगोः प्रमाणे तान्तर्दनविद्यमाना द्वयस
र्णप्राप्तौ लुक्विधौ यनेनन्तु नेह विकल्पः प्रकृतः तं किं नित्यग्रहणेन अत्राहुः अनुपदं वक्ष्यमाणसंशये मात्रचु शम मात्रमित्यादौ यथा न लुप राम
ते प्रमाणे लइत्यस्य पूर्वविधिविषयेतादृशं द्विगोरपि न लुप्यते इष्यते च लुक् द्वौ शमौ स्यातां न वा द्विशम इति। तस्याश्चाधिक संग्रहार्थं नित्यग्रहणमि १५८

ति। पुरुषहस्तिभ्यामण् च। अण्प्रत्ययेन पत्यइतिप्रकृतिभावः। हास्तिनं। अत्र काशिका। द्विगोर्नित्यं लुक्। द्विपुरुषमुदकमित्यादि। यद्यपि प्रमाणे लो द्विगो
र्नित्यमित्यस्यनायमनुवादः पुरुषहस्तिनोः शमादिवत्प्रमाणत्वेनाप्रसिद्धत्वात्। अत एव द्विपुरुषद्वयसमित्यादौ प्रमाणे ल इति लुङ् न भवति। तथा
प्यपूर्वोयं लुग्विधीयते इति हरदत्तः। एतेनासंगतं मणिवादीनां प्रतिषेधइत्यत्रानुनिवृत्यानुक्ते सादृप्रामाण्यलुक्त्वज्ञेयापि सामान्यादिहापि नेत्यपव न्य
क्रमुक्तिन्नतान्। वस्तुतस्तु विधीयतेनेइत्यस्यानुमीयते इत्यर्थः। अयं भावः द्विगोस्तद्धिते लुकीत्यनुवर्तमाने पुरुषात्प्रमाणेन्यतरस्यामिति वि
कल्पेनेन तद्वल्लुकमनुमापयतीति अनुमीयमानश्चालुक् द्वयसजादीनां नतणः। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्। द्विगोरणः प्रा
प्यभावात्। यत्तदेतेभ्यः पावा निति। आसर्वनाम्न इत्यात्वं ननु प्रमाण इत्येवानुवर्त्यतां किं परिमाणग्रहणेन चेत्। अत्र(बो)ध्यं कंडावनौ प्रविशेष्या व
श्च न्निर्देशः पृथगुच्यते। मात्राद्यप्रतिघाताय भावः [redacted] सिद्धऊँ वतो रिति। अस्यार्थः इदंइत्यवेतु पं विधाय तेस्मिन्परे आत्वे विहिते पूर्वाचार्यस्मृतावतुं
विदधिरे तद्दृशा निर्देशायं। अवतौ विनिविशेष्यते इति विशेषणस्य भावो वैशेष्यं तस्मादर्थभेदादित्यर्थः। प्रमाणपरिमाणयोर्भेदस्यप्रागेवोक्तत्वादि
तिभावः स्यादेतत्। एवं सति घावानधावयावती रज्जुरित्यादिनस्यात्। आयामस्तु प्रमाणं स्यादित्युक्तेः उपमानाद्भविष्यति इति चेत्। नहि प्रमाणग्रहणेन
वानुवर्त्यतां उक्तप्रयोगाश्च मुख्याः संतु यत्तु परिमाणप्रयोगाः यावान्धान्यराशिरित्यादयः न एतौ पमानाद्भवेतुं न चाह। मात्रादीनि। विशेषविहितो हि

वतुप्रमाणेआरीन्वाधेतेनेनतन्मात्रमित्यादिनस्यात् । परिमाणग्रहणे सति तु भिन्नोऽधिकृतान्न बाध्यबाधकभावो नेति भावः । तन्नेवमपि बा
धः स्यादेव सूत्रस्य तत्रे प्रस्थमात्रमित्यादि सिद्धये प्रमाणग्रहणस्य परिच्छेदकमात्रपरतया व्याख्यानतेन वतुपो विशेषविहितत्वाभावात् । तस्मा
द्वतुबेनिस्सत्यंतो । मास्कपरिमाणग्रहः । अस्कब प्रमाणेऽत्यर्थाधिकारः । एवं च यावती रज्जुः यावान्धान्यराशिः यावती बुद्धिरित्यादि त्रिविधप्रयोग अ
पि उपचारं विनेव निर्वहन्तीत्यपरम् अनुकूलं अत आह भाष्य: सिद्धं त्वेतिडावतोरिति । पंचम्यंतं अर्थनिर्देशस्तत्रिवर्त्तनात् मात्रजादीनामुत्सर्गः सिध्यति
तत्परिमाणमस्य तावद्धान्यं राशिः कृतं तावत्प्रमाणमस्य कुम्भादेः तावन्मात्रे यादृश्याशीकृत स्यधान्यादेर्देर्घ्यं तादृक्कुम्भादेरपीत्यर्थः । एकविषयत्वे
उ तु वतुपैव विशिष्टस्य प्रमेयस्योक्तत्वात् तद्गतान्मात्रजादयो न स्युः यत्र हि नावत्प्रमाणं तत्र तदपि एवं च तावदकवद्धदवप्रयुज्येत अन्यथा मात्रजादि
प्रत्ययमाला प्रसंगात् किमिदंभ्यां । क्रियात्वनिति । इदंकिमोरीश्की । यस्येति लोपः । इयानिति । प्रत्ययमात्रमिहावशिष्यते । यद्वतिदोडतिवे
तिपरस्मिन्प्रत्यये शास्त्रयोनोगत्तवनिबिलिचंवप्राकृतेपिप्रपेचोसपदिपदस्तुदीनंकेवलःप्रत्ययो वेन तदिय्यदिति मिमीते कोहदापडिजापिचेषा
करणानामोपतिपद्दानांवप्रक्रियामात्रित्यर्थो यं श्लोकः । किमः संख्या । संख्यायाः परिमाणं परिच्छेदः । तस्मिन्कर्तव्ये यः प्रश्नस्तत्र वर्तमानात्कि राम
मः अस्येति षष्ठ्यर्थे डतिः स्यात् । संख्यापरिमाणे किं शेषो माभूत् के यमे यां दशानां संख्या । अभ्रानानां समंत्राणं जातिमात्रो प्रश्नो इति । सहस्रशः १५९

दानत्वं चितत्वरेणैव सिद्धं सर्वो दात्तत्वं तु बाधितं अन्तरङ्गत्वात् पदमेकवर्ज्यमिति वचनात् न चेह उभयेरस्त्राम्भेनिताषु ४२.

संमेतानां परिषत्वं न विद्यते इत्येवं संख्येयपद्धारे लोहसंख्यायाः कु सा बोध्या । संख्याया । अवयवे । यं प्रत्येवमवलंसो वयवी प्रत्ययार्थत्वस्य सधि
कारो यथा द्वयसजादिषु प्रमाणे प्रकृत्यर्थे प्रमेयत्वं प्रत्ययार्थ इति द्वेत । अभादुदात्तोनित्यं । इहांतोदात्तत्वं बाधितुं वचनं पुरस्तादपवादन्यायेन विस्व
रस्यैव बाध्यते न तु । तस्माद्दुदात्तवचनसामर्थ्याद्दादेरे वायं न तथा च प्रयुज्यते । उभयं मृणु वीजनिति । तदं न दाह स चेति । दादेनतिशतेश्च । प्रत्ययग्रह
भा णपरिषयात्तदंतविधौ सति तदोनियमः स्यात् । तेनारयितुमंत ग्रहणं तेन एकत्रिंशाननंएकचत्वारिंशमित्यादि । न चैवं गोत्रिंशदधिका अस्मिन्नो
ग्रे तेइत्याद्यवति व्याप्तिः संख्याया अवयवे तय विस्यत्र संख्याग्रहणमनुवर्त्तते अंतग्रहणं च विंशतित्रिंशद्भ्यां तत्रबोध्यं । शादिंशत्संताब्रेतितेन एकविंशो श
त मिति सिध्यति । अन्यथा ग्रहणवता तदंतविधिप्रतिषेधादिह न स्यात् । तस्य पूरणे डट् । तस्येति संख्यमविवक्षितं पूर्यतेनेति पूरणः एकादशानां पूरणे त्त्वं इ ।
एकादशानामिति । उक्तार्थवचनेद: समुदाय: प्रकृत्यर्थः । अवयवः प्रत्ययार्थः इह यस्मात्संख्यावाचिनः प्रत्ययस्तदीयपूरणे तिनिमित्तस्य एकाद
शोनादेः पूरणे प्रत्ययः संघातनिशायने कुतिने इत्यादिषु प्रकृतिनिमित्तस्येवानिश्चयो दिकंग संविजेन तरंगतात् । तथेहापि यथान तन्याणी वेशाकरण
इति विग्रहः । न तु पाप्यैव व्याकरणत्वमिति । तथेहापीतिभावः । एवं च पुत्रे नेणाध्यायेष्व गणमानेष्वसमर्थः । पदविधिरित्ययोगो यदा चरमेगत्व तेन
तदासोप्यध्येनोनचसैवानीतादसंख्या दर्शत् । डट इति । डितित्प्रथमानस्यात्तुटन्नस्यनोनादिति पंचम्या षष्ठी कल्प्यते इति भावः यद्यपि हमदः प्रत्ययेने हस्तिः
य थि

याप्युत्तरत्र तमटः आगमत्वमेव एष्टव्यं अनुदात्तता यथा स्यात् प्रत्ययस्य हि आद्युदात्तः स्यात् तथा चैकस्यैरोवसंदर्भ व्याख्यानमुचितं
षट्कृति। इह षष्ठीनिर्देशबलात् षडादीनामागमित्वं एवं चातुरतो ऽत्र अर्थासिसम्या विपरिणम्यते। नदाहडटेति। उट एव षुट्त्वेन कृतः ष्टुत्वेन
ज्ञापनेः। चतुर्थ्या रेफस्य विसर्गापत्तेश्च नैवं पूर्वस्त्रे पि षुगेवास्त्विति वाच्यं पंचमः सप्तमइत्यादौ नलोपाभावापत्तेः। आद्यस्वरेति। अच्सहितेष्य
जनमक्षरं आदेर्व्यंजनस्येत्यर्थः। आदेरचइति व्याख्याने तु द्विर्वचन न्यायेन नकारस्यापि लोपः स्यादिति हरदत्तः विशेषणविशेष्यभावव्यत्या
सेन व्याख्याने प्रमाणं तु तृतीयचतुर्थेति स्त्रे तुर्याणीति निर्देशो बोध्यः। द्वेस्तीयः। डटोपवादइति। डटो हि द्वादेशस्य वा देशस्तेन चनिद्वितीयेति
निर्देशात्। तृतीय इति। रेफस्य ऋकारः संप्रसारणं। हलइति दीर्घस्तु न। अणइस्तु रक्तेः त्रस्त्वेति नोक्तं प्रत्ययो मा विज्ञायीति। विंशत्यादिभ्यः। इ
ह प्रत्यासत्त्या पंक्त्यादिस्त्रे निपातिता विंशत्यादयो गृह्यन्ते न लोकप्रसिद्धाः। अविग्रहत्वात्। इति भाष्यमतं। लौकिकानां ग्रहणं तु वृत्तिमतं। एकविंशा
तितमइति। यद्यपि भाष्यमते ग्रहणवता प्रातिपदिकेन तदंतविधिर्दुर्लभस्तथापि षष्ठ्यादेश्चासंख्यादेरिति स्त्रे संख्यादिपर्युदासो ज्ञापयति इह प्र
करणे तदंतानामपि ग्रहणमिति। एवं स्थिते एकान्नविंशतेः पूरणः एकान्नविंशतितमइत्यपि सिध्यति। लौकिकानां ग्रहणमिति वृत्तिमते तु नेत्त सिध्येत्। राम
विंशतेः प्राक्पाठितादस्याः संख्यायाः स्पष्टं तेदंतत्वेपद्रहरदत्तग्रंथयोः यत्तु प्राचीनैर्विंशति क्रियांश्च प्राक्षणे रुक्तं विंशत्यादयो लौकिका गृह्यन्ते। न पंक्त्यादि १५८
प्र

स्त्रनिर्दिष्टाः तथा सत्येकविंशत्यादेः नस्यात् ग्रहणवत्त्वेन तिदंतविधिनिषेधात् एकोनविंशत्यादेरपिप्रसंगाच्चेति। अत्रेदं वक्तव्यं। मूलग्रंथो भाष्यम
तसाधारणः तस्य बलाद्वृत्तिमतं परतयानयनेनोद्ध्यर्थमनुचितं च। किंच तदंतविधिप्रतिषेधात् इति प्रसंगाच्चेति स्वोक्तिः परस्परविरुद्धा। यदि हि कोनविंशत्यादेरत
तदंतविधिर्नेष्टस्तस्य स्वर्हति प्रसंगः। अथ त्वापकात्तदंतविधेस्तिस्रस्थाद्वस्य कथं चित्स्वोक्तिरपि चास्येयस्य मितं। तदपि न। एकोनविंशतितमइत्यस्य स्पष्ट
तयानत्वानिष्पत्सेर्दुवचतात्। प्रस्तुतस्वपक्षे तत्राव्याप्तिरेव दोषइत्यालोनावत्। इदं सर्वं वचनारं भो वा प्रातिपदिकविंशत्यादयो सहस्रादिविनिवट्
त्ताकास्यायने नयद्यपि पंक्त्यादिस्त्रे प्रत्याख्याने तथापि इहार्थमावश्यकं तत्। अत एव तत्र भाष्ये कृतोक्तं। नास्त्यात्केतोभायत्रानुगमः क्रियत इति। निरे
चानादिनलुप्यादेशे कृतरस्त्रेणसिद्धे किंशतादित्यग्रहणेन निवेतमेव। असंख्यादेरिति वस्यति। एतत्तु संख्यादिषवे। तदंते द्विनयत्तुदाहरति। एकशे
ततमइति। मासादेरिति। संख्यावाचिनो भावे पिइति भावः। संख्यादेरिति। एतच्च प्राक्षतानाद्धौ नित्यं शतादीत्यस्यतात्। मनोरूपा मतस्यर्थइति। मनोरिपि
यइत्यर्थः तेन समर्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थश्चेति सर्वं संगृहीतं। नत्वकुशलाः। गोषदादिभ्यो वुनइत्यतो वुनेत्युवर्तते। आकर्षादिभ्यः कृत्
तुना सिद्धेत्वस्यग्रहणमिदुरं तार्थं। अशनिकः शकुनिकः त्सरकः। मुस्यइति। तदंतस्वरसोदितिभावः। उदराट्टगाद्यूते। अविजिगीषा विनि। शिनोषिजे
गीषायामिति तत्रेवेनिषान तद्विधानात्। सस्येन। कन्तरितनीयर्थो। परितोजानः पर्जिजानः परिगतइत्यर्थः। अत एवेति। अकेनो रिति निषेधादिति भावः।

नाद।तेनतेनतुल्यमायशलाका।नन्वयंनेनेततरोस्मिन्निति सुत्येते:।अचिर:कालोपहनस्येतिकाला:परिमाणिनेतिसमास:।ब्राह्मणको।विके संज्ञायां
ब्राह्मणशब्दादाबुधजाविलोपाधिका।स्वयमोनात्मसम्पार्थेकनूप्रत्यय:।अनेनशब्दानुअल्पलोपाधिकोन्नानदाह।आयुधेत्यादि।शनोसाम्यां।शी
तमिवशीनेंमेदमितिस्वर्थ:।शीतेहिमंदनायुत्वंसनिशीनेकार्यकरणेपटिमाभावात्।उष्णमिवोष्णेशीघ्रमितिस्वर्थ:।क्रियाविशेषणाभ्यांद्वितीयांनाभ्यांप्रत्यय:।
कृयोगलक्षणषष्ठी।तुक्रियाविशेषणान्नेत्युक्तं।अधिकं।अध्यारूढशब्दादिति।गत्यर्थाकर्मकेत्यादिनारुहे:कर्तरिकर्मणि नक्तो विहित:।आद्येकर्म
णिनविहितेतादृध्यारूढशब्दयोगेद्वितीया।अध्यारूढोद्रोणंखारीमिति।ग्रामंगतइतिवत्।तथाधिकशब्देनापियोगेद्वितीया।आमोंग्रामोयोयस्मादर
धिकंतस्मिन्नधिकमितिचनिर्देशाद्धयाउंप्तमी समस्योभवत:।द्वितीयेत्तुकर्मणोविहितत्वात्प्रथमा।अधिकारीखोद्रोणेन।अनुकं।तत्रेसमाहार
द्वंद्वेलिंगव्यत्यय:।अनुभिन्यादिति।ससाधनक्रियावाचिभ्यामित्याकर:क्रियाविशिष्टसाधनवाचिभ्यामितिनस्यार्थ:।कन्निति।स्वार्थे।अनुकन्निति। न
निर्यगवस्थानात्सार्थ्वअनजुनत्साधर्म्याडुपायोपि।एवमग्रेपि।अथ:शूलदंडाजिनशब्दाद्गोणो।इहशीनोस्थपार्श्वयि:शूलदंडाजिनशब्देभ्य:सुस्यार्थेत:
प्रत्ययोनेष्यते।नावनिधंयग्रहणमितिलुम्बा।यथानत्स्यापत्यमित्यत्रतत्स्येतिषष्ठ्यंनानांसामान्यनिर्देशस्तथावनावतिथमितिपूरणप्रत्ययांतानांसामान्य राम
निर्देश:।कस्यादिति।अनेनतरावपिकृ नात्नुवर्तेनअस्वरितेत्वादितिभाव:।पूरणप्रत्ययस्येति।नतुकन:लुग्वाग्रहणनर्थक्यप्रसंगात्।तेनमंपंचमकं १५८
मौ

इतिरूपद्वयंहितेनसाध्यंनत्वमहाविभाषाधिकाराद्विकल्पेनकनउत्सासिद्धमेवा।तस्मात्तलुग्वाग्रहणंकुर्वन्त:स्वत्वकारस्यपूरणप्रत्ययलु
गेवाभिमत:।वृत्तिकृताचतथैवव्याख्यातमितिनदनुरोधेनेहापिव्याख्यातमुदाहृतेचावार्तिककारेणक*एवलुगितिव्याख्यामभिप्रेत्याह। न
नावति थंग्रहणमितिलुग्वावचनानर्थक्यंविभाषाग्रहणादिति।नन्वमनेद्वितीयकं।द्वितीयमित्येवरूपंबोध्यं।श्रोत्रियंछंदोधीते।छंद:श
ब्दस्यश्रोत्रभाव:घन्प्रत्ययश्चछंदोध्यापितिनिपात्यते।श्राद्धमनेन।श्राद्धशब्द:कर्मनामधेयं।नत्साधनेद्रव्येलक्षणयावर्तते।श्राद्धी।श्राद्धिकइति।
भिति अयनेनएवेष्यते।अद्यनुकेष्व:श्राद्धिकइतिमाभूत्।पूर्वादिनि:पूर्वंक्रियाविशेषणंद्वितीयांतात्सप:।इंद्रसि।पर्यवस्थात्शब्दात्तुपर्यायात्स्वार्थे ष्ठ
इनिप्रत्यय:।अवस्थातृशब्दस्यचपंथ्यपरद्वस्थेवावादेशोनिपात्येते।अपलंपरिपंथिनं।मास्वापरिपरावंदिन्त।उभयत्रापिपरि उपग्रह:।लो राहे०
केतिति।अनुपस्थितपरिपंथिनि:पार्थिवेस्वादे।अनुपदमिति।पदस्यपश्चात्।पश्चादर्थेऽव्ययीभाव:।अनुपदीगवामिति।पदापेक्षया
षष्ठी।गो:पदानांपश्चाद्विनुपलंघगवामेवानेनहिरण्यादावन्वेष्येनभवतीतिहरदत्त:।साक्षाद्दृष्टरि।साक्षाद्द्रोष्यपंपरकृतिवदनुकरणमिति
स्तत्रेपंचम्यालुक्।साक्षीति।अव्ययानांभमात्रेटिलोप:।क्षेत्रियच्।परक्षेत्रेशब्दात्सप्तम्यंताद्धुनपरशब्दस्यलोपश्चनिपात्यते।क्षेत्रियोव्या
धिरितिकिंचक्षेत्रियंविषंपरशरीरेसंक्रमय्यचिकित्स्यते।अपिचक्षेत्रियाणितृणानियानिसस्यार्थेक्षेत्रेजातानितानिनिचिकित्स्यानि विना

ज्ञापितत्वात्। किं च क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रं तत्र चिकित्स्यो निग्रहीतव्यः सर्वं चैतदाकरे स्थितं। इंद्रियमिंद्र। इंद्रलिंगमिंद्रदृष्ट।
इंद्रेण दृष्टं ज्ञातं मम चक्षुर्मम श्रोत्रमित्यादिक्रमेण स्पष्टमदृष्टद्वारा। जुष्टं प्रीतिनं सेवितं वा। दत्तं यथायथं विषयेभ्यः। तदस्यास्त्यस्मिन्नि
ति मतुप्। अस्तीति पुरुषवचने अविवक्षिते काललक्षविवक्षितेन एवांश। शब्दो विषयविशेषपलाभार्थः। तथाहि। भूमनिंदाप्रशंसासु नित्ययोगे
तिशायिने। संसर्गेस्तिविवक्षायां भवंति मतुबादयः। अस्तिविवक्षायां ये मतुबादयो विधीयंते तेने भूमादिषु विषयेषु भवंति। नित्यार्तिकार्थः।
भूमा बहुत्वं नवापेक्षिकं। यस्य हि यावत्त्वं तेनावदेवस्य शब्देनाभिप्रतीयते। यथा पंच भिरपि गोभिर्देवदत्तस्य वक्ष्यो गावइति व्यवहारः।
शतसहस्रगोरपि गावोस्येति। गोमान्। यवमान्। इहयवेमती भिरक्षिः पूर्वं पश्यती स्यादो जातिमात्रसंबंधस्य विवक्षितत्वात भूमाभावेपि
मतुप्। भूमादिग्रहणं हि प्रायेण भूमादयोपि प्रतीयंत इत्येवं परं। निंदायां कुकुदावर्तिनी कन्या। प्रशंसायां रूपवान्। नित्ययोगे क्षीरिणो वृक्षाः
अतिशायने उदरिणी कन्या। संसर्गे दंडी। संसर्गः संयोगः। तेन संयुक्तः दंड एवोच्यते नतु गृहावस्थितदंडोपि। गुणवचनेभ्य इति। गुणे गतिं च प्रसि
द्धाः शुक्लादय एव गृह्यंते न तु रूपादयोपि। मादुपधायाश्च। अश्वमेयं समाहारे द्वंद्वः तेन मतुवाक्षिप्तं प्रातिपदिकं विशेष्य तेन दाह। मवर्णावर्णान्तादिति। ठ राम
पधायाश्चेति वाक्यं तेन रेउपधाभूतात् मात्परस्य मतोरित्यर्थः येन नाव्यवधानन्यायेनांत्यात् पूर्वव्यवहितेपि भवति। वेगुं मक्षरार्थे स्थितेष्विति माह १६०

मवर्णावर्णोपधादिति। झयः। इदमपि आक्षिप्तस्य प्रातिपदिकस्य विशेषणं तेन दाह। झयंतादिति। यत्तु केचित् अवद्भिमहानित्यादि प्रयुंजते तेषा
मादिकेमेव। मत्वं नान्मतुपो निषेधात्। अपदांतत्वे जश्त्वाद्योगात्। आति स्थान्। शिखावान्दीप इति। प्रत्याहारग्रहणे दिति यं दर्शितं। शिखाशब्दस्य वी
ह्यादिषु पाठे तल्लनो। प्रसंगात्। चूडावान् ह्रस्व इति तु प्रत्याहार्य। प्राण्यंगादेवेति। एतच्चेतिकरणानुवृत्तेर्लभ्यते॥ सिध्मादिभ्यश्च। अत्र वार्तिकं। लज
न्यतरस्यामिति समुच्चय इति। अस्यार्थः। प्राणिस्थादिति सूत्रे लज्विकल्पितेपक्षे मतुविति चूडालः चूडावानिति रूपद्वयं यद्यपि सिद्ध्यति तथापि
सिध्मादिषु दोषः। तत्र हि सिध्मनिषावमांसेलास्येपदंना लिभ्यं इति गतो स्यात्। तस्मादन्यतरस्यां ग्रहणं समुच्चयार्थं निपातनामनेकार्थत्वान्ने
न मतुप्समुच्चीयते न त्वेवं प्रकृतत्वात्। अस्ति चेदृल्लिंगकं शाहद्रस्य न्यतरस्यां ग्रहणं। नद्धि इनिवनोः प्राप्त्यर्थं क्रियते प्रकृतस्यान्यतरस्यां ग्रहणं
स्यविकल्पार्थत्वे तु एतद्दुवृत्तेवसिद्धौ किं तेन क्रियमाणं तु पुनर्स्यान्यतरस्यां ग्रहणस्य समुच्चयार्थतां ज्ञापयतीति स्थितमाकरे। जैवलमिता शब्दः स
मुच्चये। वात्सादिकल्पोपमयोरेवार्थेपि समुच्चय इति कोशात्। वातेसादि। सिध्मादिषु नेगलस्य नं। वटु चेति। डित्वात् दंतोदेशः। वातलइति। अंतोदात्तेय्यं
तुप्राचां वल्गाद्युत्तरवातात्य उत्कर्षे न दुपस्यं। प्रत्ययस्वरेण मध्योदात्तप्रसंगात्। गणस्त्र बल्गेनो गोदाशस्य रत्नात्। पालीधमन्योर्दीर्घश्च। पालीलः। ध
मनीलः। एरुकनेन त्रपनावं। कुकालुः। मक्षिकालुः। उपतापो रोगः विपादिकालुः इत्यादि। वत्सांसाभ्यां। कामबले। कामबलवान् शब्दस्तेन मत्वर्थीयान्

प्रसयोंनाविनिभागः। वत्सल इति। स्नेहवानित्यर्थः। इति विषयेवत्सांसशाद्बोस्नेहवल्लयोवर्तते। यद्यपीहप्रकरणेस्वर्वत्रिमतुप्सम्बुद्धीयते। तथा
पीहनेष्यते। मतुवंतेन तु अर्थांतरमेव प्रतीयते वत्सलवनी गौः। अंसवानुर्वलः। लोमादि। इहलोमपामपिच्छादिभ्यः इतिसूत्रं। नंदिग्रहिपचादि
भ्य इतिवत्। अंगकल्याणइतिसूत्रमर्थतः पगति। अंगादिनि। शाकीपलाली दद्रुहस्वत्वंच। महत्शाकं शाकी। नद्यनशाकिनं। महत्पलालं पलाली
नद्यत्पलालिनं। दद्रिइत्वात् नेपीलोपश्चाचाहृः दद्रूः त्वयोगविशेषः नद्यान्नूनद्रूणः। विषुण इति। विषुनानाभ्यंचंति। निविंचिंसितान्यस्यसंती। निविषुणः
विषुवदाख्यः कालः तस्यहितानात्रागतानि दिनानि संति। दिनांतराणां न्यूनाधिकभावस्यनत्सूल्कत्वात्तथा। रक्कः वापुः ओंचक्षितविलश्चविषु या
णत्राश्रार्थः। इहयदिकत्तेयणादेशोत्तरपदलोपःस्यात्तर्हिबिलि विलोपेविलइतिस्यात्। अनेतउक्तेमकत्रसंधेरिति। समर्थानामित्सत्तापचा
या दोषं। प्रज्ञाश्रद्धा। आज्ञोव्याकरणमिति। गुणवृत्तेक्रियपाकेमतेन संबंधः स्कृदूग्रहणं तद्धितप्रयोगेषष्ठीनाः। ह्रुतदृशीकिरमिति वत। आज्ञेति। प्रज्ञादि
भ्यश्वेत्यण्। ऊम्नवति इहतुदाप्। इहमैवेहप्रज्ञो यहणस्यफलमितिभावः। चैनश्वेतिवार्तिकं। काशिकाकृता तुचप्तिशादस्यनेप्रेक्षिमः विछिन्न
स्यप्रतिविधानं वृत्तिः। तपस्वीति। असंज्ञत्वात्सिद्धे अणबाधोमाभूदिति वचनं। सहस्वीति। अत्र इति नागमपि बाध्यते। ज्योत्स्ना इति। सुक्तंपसः नेरच राम
विशेषश्च। तमः सहस्त्रमितिमतस्तथैवोत्सेनहवयभूतानितमांसिविघंतेतदस्मिन्नस्ती तिशांताद्रण। स्त्रियांतुतामिस्री। यत्तमेरणोके। तमिस्रा १६२

तामिस्रः कृष्णपक्षः २

मिति प्रयोगे आवश्यक इति स्थाम्यंतः प्रत्यस्ताः समझिति बष्ठीति। दास्यासं प्रच्छत इत्युदाहरणात् शिष्यव्यवहारे ब्राह्मणीभ्यः संप्रयच्छ
तीति प्रत्युदाहरन्भाष्यकार इहव्याख्यानेप्रमाणं। उपात्। स्वकरणं स्वीकार इति। यत्तु वृत्तिकृतोक्तं पाणिग्रहणमेवेष्यते। तेनेह। परभार्या
मुपयच्छतीति। दासीं ते न स्वीकरोतीत्यर्थ इति। तद्भाष्यविरुद्धं। तत्र स्वीकारमात्रे आत्मनेपदस्योक्तत्वादिति भावः। तथा च भट्टिः। आयुक्त उपा
येन महास्त्राणि। समः। समो गम्यृच्छिभ्यामित्यतो विच्छिद्य पाठः सकर्मकादपि विधानार्थ इति ध्वनयत्युदाहरति। संयुनेशास्त्रमिति। भुजो
भक्षणे इति। कथं व्येनवन इति वचनमर्थान्तरेऽपि तङर्थमिति ध्वनयन्नुदाहरति। बुभुजे पृथिवीपाल इति। इहेति। उपभोग इत्युपलक्षणं।
आत्मसात्करणस्यापि इह चक्षुधादेरेव ग्रहणं। अनवन इति प्रतिषेधात्। संयोगो वियोगश्चेत्युपक्रम्य विशेषस्मृतिहेतवइत्यभियुक्ते तथा २५
नुभवबलेन च संसर्गविहि प्रयोगस्यापि विशेषावधारणपायत्वात्। तेन भुजकौटल्य इत्यस्य तुदादेः परस्मैपदमेव। विभुज्य निपाणिं। स
रणे। इहस्यादिस्यं तेन णे शिनिव्याख्यातं। अणे यत्कर्मणि चेदिति भिन्नं वाक्यं। कर्मशब्दः क्रियापरः। कर्तरि कर्मव्यतिहार इति वत्। तदेतद्ध्वा
च ष्टे। अणे यत्क्रिया सैव चेदिति। स चकर्त्तेति वाक्यांतरं। अणिविस्पादि चेत्युदाहरतेनिहानुवर्त्तते। कर्मशब्दश्च कारकविशेषपरः। शब्दापिकाष्ठा
यणन्तं देव ह्यो दृष्टो। अणौ यदित्यादिना। अनाध्यान इत्यसंगोप्या चष्टे। नेति। इह प्रसज्यप्रतिषेधो नानीवद्यत्नीत्या व्याख्यानः। न तु नञाभिनिवे

श्चयोः। पूर्णदासस्य न्यायस्य तान्नलक्ष्यविसंवादाभावाच्च। एतेन विप्रतिषेधेनेति। अत्र च प्रमाणं दर्शयितेत्याजेति भाष्योदाहरणं। अत्र हि
अर्णवृकर्मकादिनिषेधेनेति। निरूढत्वप्रेषणेन। ऽकर्मकत्वादिति भावः। नन्वेवं तत्त्वकर्मवित्कर्मणोत्थनेनैव गतार्थमित्याशंक्याह। कर्तृ
त्वेत्यादि। अपरिस्पंदसाधनसाध्यो भावः। सपरिस्पंदसाधनसाध्या क्रिया। न च कर्मत्वभावेऽपि कर्मत्वक्रियेष्वकर्मवदित्यतिदेशः प्रव
र्तते। न त्वन्यत्रेति सिद्धांतयिष्यत इति भावः। न च कर्तृत्वभावकमुदाहरति। यथेत्यादि। ज्ञानविशेषविषयतापत्त्युपसर्जनविषयतापा
दनवचनोदृशिः। सकर्मकाणामेशाह्याभिधायिना। यो आव्रपक्वता नाधानूपात्तव्यापाराश्रयः कर्ता। व्यापारव्यधिकरणधात्वर्थफ
लत्वात्कर्मेति सिद्धांतात् तदेतदाह। नात्रकर्मत्यादि। प्रेरणेति। सो कर्मविवक्षायेति भावः। प्रत्ययमिति भवति। कर्तरि लट्। उक्तं च। निरूढत्वप्रेष
णं कर्मस्थक्रियावद्धं वेक्षितेन। निवर्तमाने कर्मत्वे स्वे कर्तृत्वेव तिष्ठते इति। इह कर्मवदित्यतिदेशास्याः प्रवृत्तेः। कर्मकर्तरि यथा यथं शब्दादयः
तेन तु हेन कर्तृतुल्यरूपं। ननु इति। विषयतापत्तिमात्रत्वेनेदृशोरित्यर्थः। तुल्यार्थ इति। विषमयोः प्रेषणयत्नोः समयोश्च न स्यातामादिति भा
वः। ननु तत्कीयेति। आद्यद्वितीयोक्तलक्षणं ततोऽभावाद्युक्ति संभवत एव नास्ति इति भावः। क्रियासाम्यपीति। प्रथमकक्षयासहेत्यर्थः। द्वितीयामादा
येति। अर्णेघा क्रियासेव वेदित्यस्य न्यूनाधिकभावव्यवच्छेदपरत्वेन इत्थं बोध्यं। अधिकव्यवच्छेदमात्रपरत्वे तु प्रथमामप्यारोपितसंभवान्नाहर्तं

स्वक्रियमुदाहरति। एवमित्यादिना। द्वितीयं निरूढप्रेषणे क्रियां समुत्पाद्य अध्यारोपितप्रेषणं क्रियामाह। यदेति। हितु नारोपादिति
अनापित्सोऽकर्मविक्षेवबीजं। प्रेषणं त्वत्यागेनैव प्रेषणं न्यारोपणापिस्सोऽकर्मश्रमीनेरनुभवसिद्धत्वादिति भावः। अर्थः प्राग्वदिति। उ
दाहरणी भूतयोः च रमकस्यपोः पश्यह्वेपिप्रेषणं ज्ञानाभावादिति भावः। आधिक्यादिति। अस्मिन्पक्षे णौ चेत्ताक्रियेत्यनेना
धिक्यमात्रं व्यवच्छिद्यते न तु न्यूनत्वमपि। अन्यथा तृतीयकक्षायामपि न स्यात्। प्रहतस्कपात्तप्रेषणं ज्ञास्यत्यागेनन्यूनताप्रोव्यादिति
भावः। णेरितिकिं। आरोहतीति निरूढत्वप्रेषणस्याभूतानच णौ चेदिति वाक्यशेषस्कन्नता। स्येरेवभविष्यतीति वाच्यं। अणावित्यस्या
पिश्रूनता। किं च उत्तरार्थमवश्यं णेरिति वाच्यमेवेत्यदिहेवस्य त्यार्थमुक्तं। अणौ यदित्यादि चेदित्यं तं किं। अध्यारोपितप्रेषणपक्षे द्वितीय
यकक्षायामभूतं। अणौ यत्कर्मणौ चेत्स कर्तेति किं। निरूढत्वप्रेषणपक्षे तृतीयकक्षायामाभूता वाक्यार्थस्तेनायं सत्रे द्वौ च पक्षावुदाहृतौ।
कर्मण्यश्च न स्वस्मिन्निव्यपक्षेऽप्यतिदाहतातः प्रथमस्य तृतीये द्वितीयेन निवारिता। द्वितीयस्य द्वितीयानुद्वितीयेनेति संग्रहः। यत्तु भाष्यकारो
करेणुरारोहयते निषादिनमिति। तत्तु हितावधेति सिद्धं। न तु प्रकृतसूत्रस्य विषयः। अध्यारोपितप्रेषण द्वितीयकक्षारूपत्वात्। एतेन समं
तनं दर्शयते गस्मयः। क्षमापिपासामिव साधुवं धुनामिनिव्याख्यानं वधुनानपकृत्यनिसमां दर्शयते। यद्वा वधुनीक्रनाधिपसामिवलोकः पश्य

निसनुदर्शयिते।उभयथापि णिच्श्चेत्येवमुक्तानुपपन्नत्वेनैनिदिष्टं।अत्रेदमवधेयं।कर्मणोह्येऽक्रियापरइतिकाप्याकरेग्रंथे
यद्यपिनोक्तं।तथापिन्यायतानुनितत्पानुगुण्याद्बाधकाभावाच्चैहनयोक्तं।प्राचांग्रंथास्तुसर्वेपिप्रायेणाभिप्रायिलाइह।उनितात्वात्
नं किंचित्त्वानंग्रंथसंमताबुधैः।तथाहि।इहस्तत्रेणैपलकर्मणेणेचेत्तदेवकर्मेतिकर्मान्तरनिवृत्तिःक्रियते।नतुलौककर्मणोणेकर्मत्वप्रतिपाद्यते।
सकर्तेतिवाक्यान्तरेणतस्यकर्तृत्वप्रतिपादनात्।एकस्यैकक्रियायांकर्तृत्वकर्मत्वासंभवात्।नैवंदर्शयितेम्नात्राजेतिभाष्यविरोधः।।
न्तत्वरूपस्यकर्मणःस्मृतादिनिवाच्यं।अणौयत्कर्तृकर्मणानद्भिन्नकर्मयुदासेनात्पर्यात्।अत्रचोक्तभाष्यस्यैवप्रमाणत्वात्।एवंचस्मर
यत्येनंवनगुल्मःस्वयमेवेतिकोकिलस्यकर्मत्वेपिप्रत्युदाहरणंयुज्यतइतिनावलेकयदेनोक्तं।नैतच्चव्याख्यातृभिःपरिस्कृतं।कर्तुरिकर्मे ९
त्यतःकर्तरीत्यनुवृत्तंप्रथमयाविपरिणम्यते।यश्चयच्चयदिनिनपुंसकमनपुंसकेनेत्येकशेषः।तेनाणौकर्मकिचेणौकर्मकर्तेत्यदोषः।ए
एवंचकरेणुरारोहयतेनिषादिनमितिभाष्यप्रयोगोप्युपपद्यतइति।अत्रेदंवक्तव्यं।एवं वर्णयतांकैयटादीनांप्रकृतसूत्रस्थभाष्यवार्ति
कग्रंथाःसर्वेपिविरुध्यंते।आरोहयमाणोहस्तीस्थलमारोहयतिमनुष्यानित्यत्रातिव्याप्तिशंकायांमनुष्यानितिकर्मणःसत्त्वान्नितिप्रा राम
प्तिरितिहिप्रथमप्रघट्टकेस्थितं।कर्मकर्तृत्वासिद्धमितिशंकायांयच्छिणानिवृत्त्यर्थंनियमोयमितिद्वितीयप्रघट्टके।कर्तृस्थभावकोर्थमिदंसत्र २५०

मितिततीयप्रघट्टके।तत्राद्योविरुद्धः।मनुष्याणामणौकर्तृत्वात्।द्वितीयोपिविरुद्धः।तदुक्तरीत्याकर्मवद्भावस्यैवाभावात्।कर्मवत्कर्म
२५ कारणमितिहिवार्तिकं।अतएवतन्तनीयोपि।तथाचोहेविस्मरतिरेवेत्युक्तंसत्सापत्तनीमिमहानयंमहतामपिप्रमादः।किंचकर्मनिरस्तनिवृत्ति
परस्यवाक्यस्यनिष्फलत्वमेवस्यात्।उदाहरणदौर्लभ्यात्।नह्यणौयेकर्तृकर्मणीतद्भिन्नकर्मणोसंभवति।यदनेनव्यावर्त्यते।यदपिउप
दिश्येनोक्तं।यत्सत्त्वग्रहणमनन्यकर्मार्थं।आरोहंतिहस्तिनंहस्तिपकाः।आरोहयमाणोहस्तीस्थलमलमारोहयतिमनुष्यानितिभिन्नत्वेनैके
गृहीनाशानञ्चकस्यनगतस्यग्रहणमावेकर्मणोहस्तिनएवेतिउच्यते।हतिभूतनयनार्थकर्तृत्वादितिनस्यात्।नदपिनप्रत्यासत्त्यैवगतार्थ
त्वात्।तथाहि।द्विविहगोचो।तत्राद्येकजन्यवात्मनेपदं।आरोहयमाणइतिद्वितीयेतुअणौकर्मणःस्थलस्यणौकर्तृत्वाभावात्प्राप्तिरेवनास्ति।
यदपिहरदत्तेनोदाहृतं।आरोहंतिहस्तिनंहस्तिपकाः।तानारोहयति [illegible] हस्ती।नितदपि।एतद्धि।अध्यारोपितप्रेषणपक्षस्याहि
नीयकक्षायांरूपं।तत्रचसमानक्रियत्वमेवनास्तिणिचाध्यारोपादानात्।ततःकिमितिचेत्।अथविरोधइत्यवधेहि।गणेचेहग्रहणंसमान
क्रियार्थमितिहिजयादित्यग्रंथः।णिच्याकृत्वयातक्रियायामेवयथास्यात्।प्रयोज्यप्रयोजकभावलक्षणोपिक्रियाभेदेमाभूदित्येवंतदर्थंणौ
चेदित्यत्रअणौयदित्यनुवर्त्यअणौयत्कर्मणिपाद्यंचस्थणौचेत्तद्देवस्मिनिपाद्यमितिव्याख्येयमितिहरदत्तग्रंथः।तथाचगेनैवगतार्थत्वादसे

ग्रहणमनन्यकर्मार्थमिति जिज्ञासादिग्रंथस्य पुनरारंभात् तद्ग्रंथानां च निर्विषयता स्यादेव। यदपि जयादित्येनोक्तं। कर्तरि किं। आरोहयंति ह
स्तिनं हस्तिपकाः। तानारोहयति महामात्र इति तदप्येतेन प्रत्युक्तं। यत्तत्र हरदत्तेन कर्मान्तरसद्भावादेव न भविष्यतीत्यादि विचारितं तदप्येवं। उ
दाहरणस्यासिद्धिसंभवाभावादिति दिक्। यत्तु भाष्ये अणौ यत्कर्म स एव णौ येन स्यात्कर्ता चेदिति सिद्धे कवाक्यतया तथैव व्याख्यानं। तन्न। अध्यारोपितस्य
णौ हि नीयकस्यापि व्याप्तेः। यदपि प्रसादकृता अणौ यत्कर्मेत्यादिखंडानुपपत्त्या तिङां जयादित्यैः यदायुक्तस्वरानुसारेणौ च मूलग्रंथो
ऽस्त्वानीतन्तथा। विमूलत्वप्रसक्तत्वेन बुद्ध्या निर्विरोधेव। यदपि प्रसादग्रंथो पूर्वमर्ह्ये नश्चाचेग्रंथव्याचक्षाणा आहुः। णौ चेद्ग्रहणं स्वमानक्त्यार्थ
मिति वाक्यार्थो भाष्यकारेणाश्रितः। प्रयोजनाभावात्। तथा हि यं नारात्मनेपदं भवति। अणौ यत्कर्म णौ चेत्स कर्ता सकर्मकः प्रयाससंतेरेनम्प्यतो यो
ऽणौ चारणं नारात्मनेपदं विधित्सितं तेनैव णौ चारण्यं नेतिवर्णोऽण्यन्तेष्यान्तेऽपि कर्मस एव चेत्कर्तृत्वमिच्छेन्तेव एव नेडति। तत्र यथा आरोहयंति हि
स्तिनं हस्तिपकाः। आरोहयमाणो हस्ती भीतान्वेचयति इत्यत्रेण त्वया धातुभेदेन भवति। एवं प्रयोज्यप्रयोजकभावभेदेऽपि न भविष्यति। अत एव त
नीयवाक्यार्थोऽभिधानादेन तेन वार्पेरपितपेक्षितः। स एव ण्यन्तस्य कर्तृचेदिति एकवाक्यतस्यैव प्रतीतेः सारसिकत्वात्। एवं चाध्याहारयंथं चाहि राम
नान्वयकल्पनाभ्यां वाक्यार्थद्वयोपक्षेपो पूर्वग्रंथेषाचोक्तमनादेयं। अनर्थकानेकल्पित एकल्पनापत्तेः। न चात्र पक्षे णौ चेद्ग्रहणं व्यर्थं। असंनिहितस्य २५०

ण्यन्तेऽणौ यत्कर्मस कर्त्ता इत्येकवाक्यतयैव संबंधः स्यात्। तत्र च कर्मान्तरनिवृत्तिर्न लभ्यते स्यात्। अतः कर्मान्तरनिवर्तकवाक्यभेदापादकं णौ चेद्ग्र
हणमवश्यं कर्तव्यमिति अत्रैव तात्पर्यं। भाष्यकारेणाश्रितमित्यसिद्धं। भाष्यस्थानां कर्मदादानां क्रियापरत्वात्। कर्तृचेदितिशास्त्रेप्यनुकारकपरे
त्वमित्याश्रित्यैव भाष्यव्याख्यायाउचितत्वात्। अन्यथा सूत्रसमाप्तिपर्यन्तं सकलस्य भाष्यग्रंथस्यासंभवदुक्तिकत्वापत्तेः। यदप्युक्तं प्रयोजना
भावादित्यादि तन्न भविष्यतीत्यंतं तदतिरभसात्। अध्यारोपितस्य णौ हि अणौ हस्ती कर्म तेनैव णौ स एव कर्तेतिस्पष्टं। तत्र च कथं तस्या
सत्वान्तदाहरणं। कृतस्यापि प्रयोज्यप्रयोजकभावभेदः। ननु णिजर्थाधिकरणे भूमइतिचेन्न। किं ततः। तत्वेनावगाऽणौ कर्तुर्णौ कर्मत्वंगतं इत्य
तथानिर्विषयः स्यात्। हि सिद्धिः विप्रहणिक यावर्णिचोर्त्रभिन्नत्वात्। यदप्येकवाक्यत्वप्रतीतेः सारसिकत्वादित्युक्तं कर्मान्तरनिवर्तकवाक्यभे
दापादकं णौ चेद्ग्रहणमित्युक्तं। तदपि परस्परव्याहतमिति स्पष्टमेव। अगत्यानत्वीकृतमिति चेत् नानन्यस्यनिष्फलता प्राप्तत्वात्। केयट
घनुरोधेनैवं ब्रूम इति चेत्। प्रसादकारोपि तर्हि जयादित्यासकारहरदत्ताद्यनुरोधेन मूलग्रंथमभोत्सीदिति किं तेनापराद्धं। तस्मात्केयटग्रंथ
चो नि अर्वाचीनपर्यन्तं सर्वग्रंथाद्यहानिशिथिलैवेति स्थितं। निष्कर्षस्तु नित्यपाविरोधेनल्कनएव। स्योदेतत्। कर्मकर्तरि मूलोदाहरणानि कर्म
कद्यावस्थाकर्तृस्वभावा किं च तामनि सिद्धान्तौरीरं भाष्यस्वस्यादिनिष्कर्षस्थितं। एवं चोदाहरणमस्करोदाहरणयोरकर्मकत्वस्यावश्यकतया भाष्य

स्यादिषु कर्मप्रयोगोऽनुपपन्नः। ह्वयते वसः। दर्शयिते भृत्यान् राजेति भाष्ये स्मरयत्येनं वनगुल्मः स्वयमेवेति भाष्ये च सोऽस्य कागमिरि
निचेत्। अत्राहुः। अविवक्षितमिह कर्मेति। तेषामयमभावः। गमी शयोनुपधो घट स्वगभीरनदीपदार्थयोरभेदबोधानंतरं तात्पर्यात्लक्षणा प
मपि प्राथमिकबोधमादाय गभीरपदसार्थक्यं वस्तिहाप्यध्यारोपितप्रेषणपक्षे हि नीचकक्षायां कर्मणोऽपन्हितेन तेनोऽपि णिजर्थस्येव कर्मणो विवक्षा गणि
थ नः कर्मपदस्य प्राथमिकबोधमादाय सार्थक्यं न तु तात्पर्यसंबंधो लक्षणेत्यभ्युपगमात्। तत्ताप्यस्य चेह विशिष्टवाक्यार्थरूपत्वात्। एवं च वाक्यार्थवादेः
प्राह। स्वलक्षणैपांगतिः। स एष सिद्धान्तो वास्त्रोपाधः। स्वायत्ते तु शब्दप्रयोगे कर्मविनिर्मुक्तमेव प्रयोक्तुमुचितमिति दिक्। भृत्यादीनोप
दिस्यागाहुद्दाभेदपरिग्रहाद्वा कर्मवाक्यस्यनारथ्यं श्रयणं भिन्नेरत्नधीः। सर्वं चेदं मूल एव ध्वनितं। अहन्तु मनुस्सरामः। स्मरतिवनगुल्मनि
प्रकृतं ४ मि। अत्र णि विस्मरयत्येनमिति भाष्यस्वरसोः। नेत्र प्राथमिकबोध्याभिप्रायेणैतत्कथनमेव। न तु अध्यारोपितप्रेषणपक्ष एव। पक्षांतरे कोकिल
स्य कर्मत्वासंभवात्। यद्यपि गतिबुद्धीति सूत्रे ज्ञानसामान्यार्थकानामेव ग्रहणं स्मरतेश्चेह विशेषणाविताद्गौणं कर्तुः कोकिलस्य न तापि
कर्मत्वं दुर्लभं। तथाप्येतद्भाष्यबलादेव गतिबुध्यादिसूत्रे स्मरतेः परिग्रहो बोध्यः। मिथ्यापापं मिथ्येति। इह कं रोतिरुच्चारणार्थतादकर्मकः राम
शपेन स्त्र्युच्चारणवृत्तिः सकर्मकः। स्वरितमितः सुविजइति। दक्षिणादिकं तु नयागफलं। उक्तं हि हरिणा यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यंते २५०

पचादयः। न त्वप्रधानं फलं तेषां न लाभादि प्रयोजनमिति पचापाकः। केचित्तु प्रयोजकव्यापारवृत्तिभ्यो धातुभ्यस्तद्द्योतकमात्मनेपद
मनेन विधीयते। कुरुते कारयतीत्यर्थः। कारयते इत्यत्र तु प्रयोजकव्यापारद्वयमर्थः। णिजंताच्चिर्वियथा। कर्त्रभिप्राय इति सूत्रांशोपिक
र्तृपदस्य हेतुकर्तृपरताद्युक्तार्थतात्पर्यक एवेत्याहुः। उक्तं च हरिणा। क्रियाप्रवृत्तावास्थानाके चित्स्वार्थपरार्थता। असतीवासतीवापि
५ कृ विवक्षितनिबंधना। केषांचित्कर्त्रभिप्रायेणिचासहविल्प्यते। आत्मनेपदमन्येषां नदर्थाप्रकृतिर्यथा। कीर्णा घृपचंते धत्तेचिनोति चि
टि. नुते पिचा। आत्मप्रयोगाद् वपंते येषु एव यथेऽन्वेधीयते इति। असतीवेत्यनेन कमलवनोद्घाटनं कुर्वते ये इत्यादयः प्रयोगाः समर्थिताः।
नवापि स्वार्थतां विवक्षायाः संभवात्। ण्यर्थस्य वाचकं द्योतकं वा आत्मनेपदमिति मतद्वयं संगृहीतं केषांचिदिति श्लोके। चिनोति चिनुते
इति संगृहीतिसंग्राह्य निचे णिकर्मेणार्थः। तीवत्थ। अत्र कश्चित् लक्षयतेः स्वरितेत्करणात् ज्ञापकात् चुरादिणिजंतादात्मनेप
टि. दं नेति मन्यते। आह च। स्वरितेत्स्यात् भिः क्यादौ लक्षिश्च कस्तुरादिषु इति। तन्नेति बहवः। चेद्धाहि णिजभावपक्षे स्वरितेत्त्वं चरितार्थमित्याह।
मैत्रेयादयस्तु स्वरितेत्त्वमनाकरमित्याहुः। तदेतत्सर्वं हरदत्तोपि संजग्राह। एवं विधिर्न चुरादिणिजंतात्स्यादिति कश्चिन्निति श्चिनुते स्म।
आत्मवचोनेन किंचन दृष्टं लक्षयतेः स्वरितेत्त्वमनार्षमिति। समुदाङ्। आङ्। ऊर्ध्वकस्य वचनेन सकर्मकार्थे अकर्मकाद्वाओऽयमहनुस्येवसि

द्रुं।अनुप।अकर्मकाच्चेत्येव सिद्धे वचनमिदं सकर्मकार्थमिति ध्वनयन्नुदाहरति॥ गां नीत इति॥ ॥ कृष्यात्मनेपदं॥ ॥ पदं स्पृक् आ
भ्याजादिकस्येति। सहिस्त्वरितेन॥ शाकटायनमतेत्वनुदात्तेन॥ तथा पठन्ति त्यासमेवेह ग्रहणं। ऊष्णाद्यसकर्मकविषयमिदं। उत्तरसूत्रानु
रोधात्॥ अनुएवाहा यन्नेदत्तमिति॥ बुधयुध॥ इहद्रुसुस्रूणां यदा न चलनार्थत्वं तदर्थं ग्रहणं। चलनेतु उत्तरसूत्रेणसिद्धं। निगरण। नि
गरणं भक्षणं। अदेः प्रतिषेध इति। एतच्च गतिबुद्धीति भाष्ये उक्तं। इह तिलनेहस्वस्थले सोजितं। अथ कथं न पायनां नामेवकारं अदि
याकथेविदेतन्नुरत्वंचेद् इत्वा इकाइ मां क्रिमावाम्यसेन चक्षण। विरंचकोरस्यभवन्तुरत्वस्थवी इति श्रीहर्षः। आङ् पूर्वाच्च मेरनेन पर
क्विंन ५ स्मैपदे वित्यावः। सत्यं। आचाम यतिलोडन्तं हि ताम् आचामयेति व्याख्येयं। अस्यस्त्री ई लक्ष्मीः तयासह वर्तमानोसौ। ततः संबोधने सुः। सुरु
च ५ स्मीके हे दमये ति इत्यर्थः। अणावकर्मकात्। अणौ किं। आरोहैमाणं प्रयुंक्ते आरोहयते। णेरणाविति सूत्रे उदाहरणत्वेनयोऽकर्मकोमिति तिस्मात्।
हि नीयेतेमा। भूत्। सहि णावकर्मकः न्यम्भवति। स्वर्थपर्यवसानस्योक्तत्वात्। केचित्तु स्वार्थण्यन्तादुन्मनात्विति स्यप्रत्युदाहरणमाहुः। तदाप्य
श्व २ सिद्धं। तथा हि। बुधादिसूत्रादिह णेरित्यनुवर्तते। बुधादिभ्यो हेतुमण्णिरेव संभवतीति नूनं तदाद्वेवायं विधिः। अणाविति निषेधोपि प्रत्यासत्ते स्तस्यै राम
वन्याप्यः। तेन चुरादिण्यन्तात् हेतुमण्णौ परस्मैपदं भवत्येवेति भाष्यादौ स्थितं। अन एव चेतयमानं प्रयुंक्ते चेतयत इति केषांचित्प्रत्युदाहरणं इति २५२

नाहृषितं। तच्चित्तेन संचेतनइति चुरादिषु कुत्स्नीयो धातुर्बोध्यः। यत्तु न्यासकारहरदत्ताभ्यां व्याख्यातं चितीसंज्ञाने चुरादिरकर्मकइति
तदभिप्रायेणोक्तं। एतेन रूपपदेनेह चितिरिति प्राचः प्रत्युदाहरणं प्रत्युक्तं। रूपरूपकरणे चुरादिः कृत्स्नस्य कर्मण्णोधात्वर्थे [illegible] भावादकर्मकः ततो हेतु
मण्णि विचित्तिकारहृषितेनचेतयन इत्यनेन समानयोगक्षेमत्वात्। वक्ष्यमानम् [illegible] अयमपि समर्थयितुं शक्यं। तथा हि स्वार्थण्यन्तादकर्मकोपि हेतु
मण्णो चेतयति रूपयति स्वरूपनाम। तस्यापि निवृत्तिर्येषणान्तपाकर्मकतामाश्रित्य हि नीयेहेतुमण्णौ प्रत्युदाहरणत्वेन वाच्ये। स्मृतं च तेन ता रूपयं
तं प्रयोजयति। [illegible] युजिणिज्भ्यां प्रयुक्ति [illegible] हेतुमण्णिन्द्र यस्य विवक्षितत्वात्। हेतुमण्णेः केचिदिह प्रयुंक्ते इति स्वेदे नयुजिनेव
व्याप्तिहिष्यता। ननु णिजन्तेन निर्दिष्टः। यत्तु प्रसादकृतो [illegible] ग्रहणे णिजानेराश्रयणाद्धेतुना विवक्षयेदमिति। ननु भाष्यादिविरोधादुपेक्ष्यमेव। पू
पयनेति। [illegible] अत्यवसानार्थत्वं क्रियारूपकर्मत्वं। णमीणीइति। प्रथमादिवचनं। वा छंदसीति पूर्वसवर्णदीर्घः॥ ॥ इतिपरव्यवस्था॥ ॥ भाषो भाषते
भीङ् उत्पत्त्यर्थाद्भवते णिजिनादरञ्जितिभावः। एरजण्यन्तानामिति तथा [illegible] कृत्यादिभ्यः प्रतिषेधमात्रं हि भाष्यस्थितं। कुल्यो मन्त्रोधइतिच यथोदाहृता
पिस्त्यत्वयेषु [illegible] भवनेतस्यस्य [illegible] ल्यप्तस्य भवेत शुद्धेन करोतिना तु स्वार्थत्वं च दर्शयति। उत्पादनार्क्रियेति। धातुलेनेति। तत्कृतानिः [illegible] द्रष्टव्ये आदे
न्तूरादस्यजानिराह्लादिति वदंतीकैयटेन तथा घनितत्वात्। हलाराजा यादौ स्पष्टं तथाभिधानाच्चेतिभावः। धातुवाचेति। एतेन भावना निष्कु

स्यवाच्येतिमीमांसकमतंनत्राद्यमिति धनयति।तथाहि।भोक्तव्यमित्यादौतिङन्तंविनाप्रतीयतेकारकापेक्षावद्दृश्यते।अ भावना
स्तिचकरोतिसामानाधिकरण्यंकिंकर्तव्यंभोक्तव्यं।किंकृतवान्भुक्तवानिति।किंचभावघञादिघटमितिवत्।पचमानेनचतिघटमित्यपिस्या
त्।तुल्यार्थत्वात्।दृष्टंनेहकर्तुःकुंभकारस्यव्यापारंलिजावृत्ते।दोषंतिकेतावाख्यातप्रत्ययः।ननुप्रयोजकव्यापारेणिजर्थःकर्तृव्यापारस्त्वा
ख्यातार्थइतिवैषम्यमितिचेत्।कारकचक्रप्रयोक्तुःकर्तृत्वेघटस्य।तथातात्।यदिहिधातुनोक्ताक्रियेतिनित्यंकारकेकर्तृत्वंगीयतेऽतरामिन्नर्त्तहतिच
तिपादिनरीत्याप्राधान्येनधातूपात्तव्यापाररूपंकर्तृत्वेनवाचिसंभवेनकस्तर्हीदानीमाख्यातार्थः।व्यापारस्यधातुनैवाभिहितत्वात्।अपिचधा
तोःसकर्मकाकर्मकत्वविभागउच्छिद्येत।अकर्मकाद्वेत्यादिसूत्राणिचविरुध्येरन्।ननुसिद्धान्तेपिक्रियायाःकर्मापेक्षानियमात्कथमकर्म
वैयधिकरण्या केतिचेत्।फलव्यापारयोःसामानाधिकरण्ये सकर्मकाकर्मकविभागाभ्युपगमात्।किंचज्योतिष्टोमेनयाजीत्यादौकरणेयजइतिणि
स्म रपेक्षएवसंगच्छते।धातुत्वेनधातूपात्तभावनाप्रतियोगित्वेनतदुपात्तस्यसोमस्यकरणत्वात्।पचादयोहिधातुत्वेनभावनामाहुः।
विक्लित्त्याद्यंशान्तरंतुपचित्यादिनाशक्तिरूपेणाहुः।तत्र्यंशान्तरंभावनाप्रतियोगित्वेनभाव्यतयासंबध्यते।ज्योतिष्टोमयाजीत्यादौतुक राम
रणतया।ज्योतिष्टोमाख्येनयागेनस्वर्गंभावितवानित्यर्थप्रतीतेः।स्पष्टंचेदंणिनिविधौहरदत्तग्रन्थे।एतेनद्व्यर्थःपचिरितिभाष्यंव्याख्यातं। २५३

महिष्याह।विभज्यसेनांपरमार्थकृन्मसिनाप्रतीश्चापिपुरंदरोधा।नियोजयामासससत्रशत्रुसैन्येकरोतिरर्थेविवसद्धातुमिति।ननुकि
याप्राधान्येऽपिपचतीत्यादौएककर्तृक वर्तमानपचिक्रियेतिक्रियाविशेष्यकोबोधोनस्यात्।प्रत्ययार्थंप्रतिप्रकृत्यर्थस्यविशेषणत्वा
त्।औपगवादौतथात्वादितिचेन्न।प्रत्ययार्थःप्रधानमितिह्युत्सर्गः।सचेहत्यज्यते।क्रियाप्रधानमाख्यातमितिस्मरणात्।पाचिकेत्यादौत्वा
त्वस्यविशेषणत्वाभ्युपगमाच्च।प्रत्ययानर्थक्येपिवपचतीत्यादावनुपपत्तिः।पचेतंपक्ष्यत्यादौज्ञातत्वात्।ज्ञानचोःकर्तृप्राधान्यस्यसर्वसंमतत्वात्तथातिङ्
क्ष्वपितथात्वापत्तेः।शत्रादीनांतिङ्चलादेशत्वस्याविशिष्टत्वाच्च।आदेशानांचस्थानिसर्वरूपत्वेस्थान्यर्थाभिधायित्वेवार्थैकत्वौचित्यात्।अ ना
तएवहियुष्मदिसमानाधिकरणेमध्यमः।अस्मद्युत्तमइत्यादिपुरुषव्यवस्थासंगच्छते।अभिहितेकर्तरिप्रथमेत्यादिचानवसमानाधि
करणत्वेनतत्ताभिधेयसंख्यान्वयित्वंअभिहितशब्देनचाभिहितसंख्याकत्वंविवक्षितमितिवाच्यं।स्तोकोनुगुणत्वात्।कृत्तद्धितसमासैः
न संख्यायाअनभिधानात्तदभिहितेपितृतीयाप्रसंगाच्च।नचकृत्यनभिधानमेवकर्तुरनभिधानमितिवाच्यं।भावार्थलकारेपिकर्तरिप्रथमापत्तेरि
तिदिक्।सामानाधिकरण्याभावादिति।भावाभिधायिनोहिलकारस्यकापिनसामानाधिकरण्यं।कर्माभिधायिनकृत्तस्यभवतापुरुषत्रयमपिप्र
वस्थयोदाहरिष्यते।निद्रावानेति।कृदाद्यव्यापारस्यसत्त्वरूपत्वमिष्टमेव।तथाचभाष्यं।कृदभिहितोभावोद्रव्यवत्प्रकाशतेइतिद्रव्यधर्मानुलिंगसंख्या

कारकादीनुपलक्षयतीत्यर्थः। अत एव पाकं पाकेनेत्यादौ यथायथं द्वितीयादयः। नैवं चेन्मोदस्य[न] पाककर्तृत्वमिति षष्ठी। अनभिहितास्यादिति
वाच्यं। घञादावपि सत्त्वभिभागस्यासत्त्वापन्नक्रियाभिधायित्वाभ्युपगन्तव्यान्नादुक्तं च हरिणा। आख्यातशब्दे भागाभ्यां साध्यसाधनवर्ति-
ता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः। साध्यत्वेन क्रिया तत्र धातुरूपनिबंधना। सत्त्वभावस्तु यस्तस्याः स घञादिनिबंधन इ-
ति। युक्तं चामृतरसप्रस्यंदमाधीकनरीति कुसुमांजलिश्लोके अमृतस्य रसः स्यमानममृतमिति यावत् इति व्याख्यायतत्रोपप-
भकृत्वेन कृदभिहितो भावो द्रव्यवत्प्रकाशते इति वर्द्धमानेनोपन्यस्तं भाष्यं व्याचक्षाणेन श्रानुमोदितं। तत्सर्वमतिरभसात्। तथाहि।
रस इति भावे ल्युटा रस्यमानमिति विवरणेन सह विरोधात्। यत्तु द्रव्यवदित्यस्य द्रव्यविशेष्यकोपस्थितिजनकत्वमित्यर्थवर्णनेन तद-
पि निर्मूलमनुशासनविरुद्धं चेति दिक्। एकवचनमेवेति। प्रायो वादोऽयं। भाष्ये उष्ट्रासिका आस्यंते हतशायिकाः शय्यंते इत्यत्र बहुव-
चनस्य सौकार्यात्। उष्ट्राणां हि आसिकाः स्वत एव विलक्षणाः। हतानां च नानाप्रकारं शेरते उत्तानावनतानो विकर्णिकेत्यादिविलक्षणावस्थाश्च।
तनेश्च पार्श्वशायिनां हतानां शयनानि तादृशानि देवदत्तादिभिः क्रियंत इत्यर्थः। अत्र सादृश्यावगमात् आख्यातवाच्यस्यापि भावस्य भेदा- राम.
वभासाद्बहुवचनं। आसिकाशायिकाइति द्वितीया बहुवचनं। क्रियाविशेषणत्वेन कर्मत्वात्। नन्वेवं क्लीबत्वमेकवचनं च स्यादिति वाच्यं॥ २५८

विषयं क्लीबमित्यधिकारात्स्त्रीत्वावधारणेन सामान्ये नपुंसकमित्यस्याप्रवृत्तेः। बहुत्वावधारणेन एकवचनाप्रवृत्तेश्च। नैवमसत्तो
क्तिर्विकल्पेनेति वाच्यं। लिंगक्रियाधारकारकयोगाभावमात्रेणात्यर्थमित्युक्तत्वानुत्सिसूत्रा। यद्यपि अजादयो द्वंद्वेन निर्दिष्टास्तथा-
पि उपदेशे इत्यस्य एव विशेषणं न हनादीनां। अव्यभिचारात्। उदाहरणमुपदेशेऽजिति। अत्र प्राचा उपदेशेऽजंतेभ्यो हनोऽश्च परेषां स्याद- १
नामिट् स्यात्। स इट् तु थित्व एवेति व्याख्यातं। तन्न। सत्र्ये हि स्यादयः ससम्या निर्दिष्टाः। अजादयश्च षष्ठ्या। विशेषणं च प्रधानशिष्टः। इट्
तु चकारेण नस्वेन्वियोगशिष्टः। थिणवदिति तु सप्तम्यां निर्दिष्टः। स्यसिचसीयुट्तासिषु भिन्नप्रयोगनिसप्तमी निर्दिष्टा तत्। नचैतस्य सर्व-
स्य भंगेन विपरीतव्याख्याने बीजमस्ति। चत्वादस्य व्यवहितान्वयोऽपि निर्मूलः। स्यादेतत्। सत्रास्वरसानुरोधेऽगस्त्येवेष्टस्यात्। अडादिवत्।
अनइट्छिथिवाक्यस्यादीनामिति विभक्तिविपरिणाममावश्यक इति चेन्न। सत्यं। पूर्ववाक्ये विनाऽपि स्थिउत्तरत्र विपरिणामोऽन्याय्य एव। तथा तु
यथा श्रुतविभक्तेरनुमितार्थत्वाद्बहुवितो विपरिणामः। तथाहि। हरिः सेव्यस्तदुक्तौ श्रीनिप्रयोगे उत्तरवाक्ये सेव्य इति विपरिणामेंद्रदृष्टानह-
रिःसेव्या इत्यपि प्रयोक्तुमुचितं। यदप्याहुः। विभक्तिव्यत्ययस्यापि बहुलं दर्शनादिति। तदपि भक्तिवादमात्रमिति निरुक्तमेव। किंच प्राचो व्या-
ख्याने थिणवदिति सप्तमीनाद्दतिः। तत्र यथा ह्रस्वस्य कार्यं दीर्घादिकमनिर्दिश्य पतेन। एवं स्वस्य स्वस्मात्परस्य च कार्यमनिर्दिश्य पतेन। नन्विणिवद्द

षुदात्तः स्यात् ॥ द्विः परस्येव इटः परस्यापि लुक् प्रवृत्तेर्न । ननु बाधितो ऽसौ । इट् आगमत्वेन प्रत्ययावयवतया प्रत्ययत्वाभावादिति चेन्न ।
हलन्ते यागमे ऽव्यवहितस्य तथा प्रत्ययत्वस्योपगमात् । स्थानिवत्त्वे प्राचोर्यन्थव्याख्याने स्त एव निर्णीतत्वात् । किं च ह्रस्वादिकार्यस्य प्रत्य
ये परे विहितस्य इटि परे कथं निर्वाह इत्याशंक्य विणिह ह्रस्वस्य वस्यैवानिर्देशः प्रत्ययस्य प्यानिर्देशान्न दोष इति नत्वस्वाचोर्यन्थव्याचक्षाणा
एवाहुः । ननु कथमुत्तरस्यापि प्रत्ययत्वं न लभ्येत । युन्नुवदेमि । विणो लुकि विणवदिदेऽसिद्धत्वादिति । नदपि न । नहि विणवदित्यनिर्देशः प्र तिड्उसि
ह्रः । अनिर्देशस्य निर्विषयतापत्तेः । तथा चलुको विह्नादिसम्भवस्यत्वेनानिर्देशो ऽवरिण्वत्वलम्भनिक्षोदेन । ननु यदि विणि दृष्टमात्रस्या
निर्देशस्तर्हि हिनि णिङ्स्वार्थे अपि स्तुः । घानिष्यते । आयिष्यते । अध्यापिष्यते इति । मैवं । ओगाधिकारबलेन ओगस्यैवानिर्देशात् । नं चैनेओ
गान्तरेन दाहः । ओगकार्यमिति । युटश्चि । तथा च सीयुट्शाहेनन हि शिरंलक्ष्यनइ इति भावः । आर्द्धधातुक इत्यनेन व्यावर्त्यं कृत विधिलिङ् न
त्वन न वलादित्वेनास्त्री । निवार्या । नस्येहाप्यपेक्षणात् । यदाहुः । निरुपपत्यं वलन्निमित्तो विधा नीति । अस्यार्थः । भाविष्यत इत्यादौ स्य इति निर्दि
निपरमपि वलादिलक्षणमिदं बाधित्वा विण्वदिडेव भवति । सत्यामपि वाह्यं न स्यात्सो ऽन्तरङ्गत्वात्प्रत्यासन्नं णिनमा च विमभुवो वुक् इ वनित्यत्वाद्वलादित्वनि राम
रपेक्षो ऽसौ । परस्त्वनित्यः । अस्मिन् पक्षे वलादिविधानात् । एवं च नित्यत्वात्सो ऽप्ययमेवेड् भवति । एतेन उपदेश इति किंभाविष्यते ऽत्रत्राप्येव । २५५

त

कलै २

देशयोः कृनयोः न स्यादिति प्रसादग्रन्थः प्रत्युक्तः । चिण्वदिटो विषयवल्लिमिति स्यात्प्रवृत्तेर्वादेशस्यासंभवात् । उपमामात्रे प्रवृत्तेपि अजन्त
त्वानप्यायानात् । उपदेशग्रहणं तु मूलएव स्फुटी भविष्यति । चिण्वदिट् इति । ननु रूपं नस्य धातोरुपदेशाभावात् कथमिह चिण्वदिट् । न चाजन्तोपदेशो पेरादु२
येनान्तं नत्वमस्त्येवेति वाच्यं । आविनास्मा नेत्यादौ परत्वान्नित्यत्वाच्च परेगुणे कृते चिण्वदिड्भावापत्तेः । नहि तं नस्य उपदेशो ऽपि अजन्तनत
मस्ति । निचेत्तमेवं । उपदेशो योजितिव्याख्याने पि उपदेशग्रहणसामर्थ्यादिव आरिनेत्यादौ प्रवृत्तिस्वीकारात् । अस्तु वा उपदेशे यदजन्तं तस्येति वा द
ख्यानं । अङ्गस्येत्यधिकरणषष्ठी । अङ्गावयवस्याजन्तस्येति । कारिष्यत इत्यादौ चध्य प्रदेशिवद्भावः सर्वथापि णिजन्तेत्विण्वद्भावो स्त्येवान
दाहुः । निरवद्ध्हि तुक हनेश्च घत्वं दीर्घश्चो ऽक्तो यो मिनां वा चिणीति इटश्च सिद्ध लेन मेलुप्यनेलिनिस्थिश्चार्थं व लिमिमितो विधानामित्यन्तु भम
र्थं न तेन अजन्तत्वात् चिण्वदिति प्राचोर्यन्थव्याचक्षाणैरुक्तं । एवं नधात्वं नरे उपदेशावस्थायां भवत्ययमजन्त इति न्याय विरुद्धं स्यात् किं विरु भि४
द्धं च । उपदेशो हिसाक्षादुच्चारणं । न च एवं नस्य नदस्ति । किं च धात्वादेः षः स इत्यत्र तु ध्यानोः प्रतिषेधमुक्त्वा उपदेशग्रहणबलेन नस्या
ख्यानमाक्षेरस्थितं । स्वयमपि तत्रेत्तन्नथैवोक्तं तदिदानीं विरुध्येतेति दिक् । आनो युक् । चिण्णुतोः किं । चोदिः । चालाकिः । चोहा । दिता । दिन्ना ।
भा० द देः । दायिना । मिमिस्ता । घा । रिञ्चिस्नेन द्वाधिता पस्ताचिण्वदिट्कृते ऽसत्वादित्वात् तु ने नैष्याहुः । सत्यपि तस्मिन्नेह कार्यचित्स्वानिः । अनिल्ल

वधादेशोपि॰

स्मात्यारुद्धाक्रूपनिष्पत्तेः। आशीर्लिङि। नतु लुङि। तत्रोभयोरपि वैकल्पिकत्वाद्येन नाप्राप्तिन्यायेन बाधादिति भावः। विशेष
विहितत्वादिति। लिङ्ङीति पदद्वयसाधारणं। आशुद्धतु आत्मनेपद एवेति विशेष इति भावः। एतेन स्यसिच्त्वेत्र प्रतिपदविधेर्बलीयस्त्वाच्चिरा
द्वा वइति कैयटग्रंथो व्याख्यातः। यत्तु नारायणेनोक्तं। अत्र यद्यपि प्रतिपदविधिस्तथापि विप्रतिषेधाच्चिण्वद्भावृद्धत्वाज्झायुइति। प्रत्य
तसरिकारार्थ प्राचोग्रंथं व्याचक्षाणैरुक्तं। यद्यपि परादप्यंतरंगं बलीयस्तथापि परत्वाद्धस्यैव प्राप्तिः। चिण्वद्भावेन व्यवस्थेति तस्या
प्याशय इति। तदेतत्सर्वं कैयटग्रंथाशयापरिज्ञानमूलकमिति निर्मूलमेव ध्वनितं। पक्षेवधिर्ष्टैरिति। इह प्राचा पक्षे वधादेशात्रुक्तत्वेन
सम्यगेव। यत्तु तत्तोत्रेणोक्तं वधादेशाइति परमतं। स्वमते तु वधादेशोत्र न भवत्येव। तथा चोक्तं महाभाष्ये। चिण्वद्भावे हन्तेः पुनः प्रसंगाद
धभावः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा हनिर्णिङादेशप्रतिषेधश्चेति। तदेतद्भाष्यार्थानवबोधवि
जृंभितं। लिङीति परसप्तमी स्यसिच्सूत्रे आर्धधातुक इत्यस्यासंबंधश्च प्रोक्तश्चिण्वदेतस्वीकृत्य प्रवृत्तं वधभावात्। शुद्धिचिण्वद्भावो विप्रतिषेधे
नेति वार्तिकं व्याचक्षाणेन भाष्यकृता चिण्वद्भावपक्षे खलु वधादेशाभाव उक्तः। ननु चिण्वद्भावविरहेपि तत्कथं स्यसिच्त्वात्क्रूदमपि विकृ राम
त्वं विस्मृत्य शुद्धमपि मूलमशुद्धीक्रियते। यद्यपि हनिर्णिङादेशोसाधुरुक्तं तदपि न। अनागमस्याप्यनिर्देशोप्रसेवार्णिङ्गलुमाघानिष्यतइत्यादौ २५६

ननुक्तेः। अंगाधिकारबलेन तत्समाभानाच्चान्वलिङि लुङि च समाक्षात्रुपदिष्टस्य वधेरतिदेशापेक्षात्। लोउदाहरणवाक्यत्र वधादेशः
भाष्यकारस्यसंमतिमाधर्वानेः स्वैरैवेतिदिक्। अहसातामिति। चिण्वदिटोभावे हनः सिजिति किंतादनुदात्तोपदेशस्यनुनासिकलोपः
तनुभिरधिकं ज्ञानमिति। यत्तु घ्वेसलोपोवा सस्य दइति के चिदिति। पुनर्हन्तिरमिति चापाभागेन हयंसंवायलिपविन्नस्यादिप्रपंचेनेह।
एचिंशान्द्रपालिन्नवंगीतिवदंति। तचोक्तिसंभवं न पश्यामः। पुनर्हन्तिरूपानेस्यस्यदुर्गरतात्। अस्मिंश्च संख्या पाएवपुरस्कारे मूलानो
वाच्येसालोनावतो। अवरुभ्येति। तदपिइर्वासिद्धमिति तत्रासिद्धार्थकथनमित्युक्तं न विस्मर्तव्यं। अस्मिन्निति कृप्पक्षे विभ्रमुलोपेति
सत्त्वेदीर्घग्रहणं कर्तव्यमेव। तथाक्षिहेङ् अनादेरेघरादेः। एवेङ्कृ। हिउयति। अत्र विभ्रमुलोः। हनस्पोः। कृस्वे विकल्प्यमाने अहिडिअहेडी
तिस्यात्। दीर्घे तु अहिडिअहीडी इति भवति। एतच्च विभ्रमुलोपेति सूत्रे कैयटग्रंथे कमेर्णिङि स्तेहरदत्तग्रंथे च स्पष्टं। दीर्घेति। स्तीति। यङो
लोपस्यस्थानिवत्तेन चिण्परत्वाभावात् उपधाह्रस्वेर्ऽप्रवृत्तेरिति भावः। नोदात्तेति। कथं तर्हि हिरेयदिकामिपदेकेन स्वमिति श्राह। एषः। प्रमा
दएवायापदिसमाधेयमवेत्याग्रेहत्स्वाहिंसितत्प्रेषणात्। नहनेर्थेति। विनतत्स्विण्वद्बोध्यः। यमुघम उपरम इति। संज्ञापूर्वकविधेरनित्य
त्वात्। तथा च भट्टिः। इयतोव्यदङुउयमे। यमुउपरमेइति। अथ यत्रेदिकर्मका स्तेषु लक्ष्यत्वत्वलर्थाः। सुखेकर्मणि भागोनोभिंकोभयोरिति संदे २७

हि व्यवस्थामाह। सकर्मकेभ्य इति ॥ इति भावकर्मप्रक्रिया ॥ ॥ अकर्मका अपीति। फलावच्छिन्नव्यापारपरत्वे हि देवदत्तादि
धा२ निष्ठव्यापाराधिकरणत्वे किं तिष्ठिं भावे नन्यग्भवनादिफलाश्रयणमोदनादीनां कर्मत्वं सुवितं। कर्तुरीप्सिततमत्वात्। व्यापारांशाप
रित्यागेन फलांशमात्रपरत्वे तु पचिभिदिप्रभृतीनामपि राध्यतिहिंसा भवति न्यग्भवनीत्यादिविवरणविषयीभूतानां राध्यत्यादिवदेवाकर्मता।
न त्वस्यामवस्थायामोदनादेः कर्मत्वं संभवति किंतु कर्तृत्वमेव। स्वतन्त्रः कर्तेति लक्षणात्। एतच्चोदाहरणादि स्फुटं वक्ष्यते एवं प्रपंचितं च। स्यादेतत्। द्वि
कर्मकाणामेकस्य कर्मणः प्राधान्यविवक्षायामपि अपरेण सकर्मकत्वमस्त्येवास्वयं गुडधेयस्य गुणेनोक्तो पयस्त्रां वस्तयमानस्य वत्सं निम
हिनीत्यादौ यथेति चेन्न। सत्यं एककर्मकाणामेवाकर्मकत्वे तात्पर्यमानत्वान्न दोषः। नेदमद्भुतं यत्नि। भावे कर्मणीति। अकर्मकेभ्यस्तु भावे उत्पादनस्य फ
लमाह। लभोभावे इति। भावे चाकर्मकेभ्य इत्युक्तेरिति भावः। कर्मवत्। कर्मस्थेति। न कर्मस्थक्रियालक्ष्यमनेन दाह। कर्मस्थेति। लकारवाच्य इति
लकारेणोपस्थापितमित्यर्थः। लिलकारकादिति। अयं भावः। व्यस्य बहुलं लिङ्व्यादि। व्यत्ययेति। हि न पाचापाके परस्मैवर्णविधिल ब्लक
लोपविलहयो नव्यंजनपरस्यैकस्यानेकस्य वोच्चारणे विशेषोऽस्ति भाष्योक्तेः। यहालुग्नित्येति शेलकारे लोपस्य संयोगान्तस्येति पक्षो नेत्यनु राम
हल्वयमामितिं। नच्छ्वलग्रहणमिहानुवर्तनं व्याप्यविपरिणम्यते लुप्तषष्ठीकं वा। षष्ठ्यर्थश्च नडुपस्थाप्यत्वं। कर्त्रीवित्यादिति स्वच्चात्कर्तृग्रह २७७

णमनुवर्त्यं प्रथमया विपरिणम्यते। तेनाभिमतार्थलाभ इति। करणाधिकरणाभ्यामिति। न त्विह करणत्वाद्यवस्थायां वक्तृतः स च
पि। असिश्छिनत्ति। स्थाली पचतीत्यादौ पाक धातुना नोपात्त इति चेन्न। किं तत्। न चोत्येतस्मिन्स्त्वेवसाहवचनतिषेधः। भिन्नता कि पाधान्येनान्तेन विशेषितमा। एवं चास
निकर्मणि चास्मिन्वाग्देवाति प्रसंग इति भावः। अधिगच्छति स्यादि श्लोकस्यान्तराईतु। यत्कृपावशात्तस्मैनमोऽस्तु गुरवे सदेति बोध्यं स्या
देतत्। पच्यादीनां गम्यादीनां च फलाभिधायित्वे फलस्य च कर्मनिष्ठत्वे तुल्ये कथं कर्मवद्भावप्रवृत्त्यप्रवृत्ती व्यवस्थाने तत्राह। यत्र कर्मणीति।
उक्तं च हरिणा। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति। अन्येषां धातूनां शब्दैः क्रियाव्यवस्था
वोदेन कर्तृव्यापारस्यैव प्राधान्येनावगमात्कर्मस्थत्वेन यथा तु देशपनाधिकत्वे कर्मस्थांशस्य कर्तृत्वे तु व्यापारांशस्येति। सापि नियामिका। न
चाहि। दर्शनारोहणाभ्यां विषयेन्यमने च विशेषानुपलंभात्कर्तृस्थता। उद्देशानुरोधाच्च। अहं पश्यामि मिति इहेशोनत्वं चाविषयो भवतीति
एवमेह सुपारि गच्छेयमिति देशे। ननु हस्तिनोन्य आरोपयवतिति। उपरितनमनरूप एव व्यापारविशेषोऽस्हेरर्थेति नुन्नभावनमानांश्मिष्ठे
दृश्येनस्य वास्वां हस्तान्यां मन्वेनमयस्य पिंआरोहणीय प्रयोगानात्। अन एव हिय द्वितु परं छन्दसी। यत्र भाष्यं स्फाहि गत्यर्थ इति। अत एव चाणे कर्तुर्णि
कर्मत्वं। पचिच्छिदोपोस्तु विक्लित्तिद्वैधीभवनरूपो विशेषः कर्मनिष्ठस्तु उद्देशेनैव च कारकव्यापार इति महदेवाभ्यां एवं चारुह्यते हस्ती। निकर्मवंशा

वेशद्वर्यितंतोभाष्यन्यायविरोधादुपेक्ष्याइतिकैयटः।हरदत्तादयोप्येवं।नन्वेवमिहैवसूत्रेसकर्मकाणांप्रतिषेधोन्योन्यमाश्लिष्यतइतिभा
ष्यवार्त्तिकग्रंथः।संयोगरूपस्यफलस्यकर्मस्थत्वाभावादितिकैयटादिग्रंथश्चविरुध्यते।रूढिगमिष्यांसेहश्लिषेर्वर्षिष्यस्यपुरुक्तपपादत्वात्सं
योगाख्यफलस्यसर्वत्रतुल्यत्वादितिचेत्।सत्यं।उदाहरणदिक्प्रदर्शनेनन्ननुस्थितेनोदाहरणमितित्वोत्स्यादेनवाज्ञानेछ्योश्रिवयतस्त्वा
पिकर्तृस्थता।तदाश्विनुःकरोतेरपिकर्त्तानकर्मवत्स्या।दित्याशंक्यकरोतेर्यत्नोर्थत्वमेवनास्तीत्याह।करोतीति।भिन्नजन्यत्वादिस्त्रभाष्य
स्यष्टंतेनदिक्प्रदर्शनं।सकर्मकेनैवगावकस्यात्।यतनतइतिवदितिबोध्यं।करोतीति।ज्ञानस्यकर्तृस्थत्वमुसादनेनेत्यर्थः।अनुच्यवस्यमान
इतिस्वंउनुकारप्रयोगः।सकर्मकाणामिति।एतेनस्त्रजस्यात्मानमात्मनेतिव्याख्यातं।तथाहि।आत्मानमात्मनावेत्तीत्यस्यकर्तृस्यभावकत्वे
नसुसाधतेपिस्त्रजस्तीत्यंतोप्रहनवोतिकैनैवनिर्वाहः।स्त्रजेःकर्मस्थफलकतात्।अन्योन्यमिति।स्यादेतत्।यद्यपीहसंयोगानुकूलक्रिया
कर्मत्वकर्तृत्वोपयोगिनोउभयनिष्ठातथापिव्यक्तिभेदोस्त्येव।अतएवान्यनिष्ठाप्रत्यन्यस्यकर्मत्वं।अन्यथोभयोरपिकर्मत्वमेवस्यात्तनुक
र्तृत्वं।इमोगंगास्त्रवानइत्यत्रयथा।एवंस्थितेकर्मत्वोपयोगिनीयाक्रियातयातुल्यक्रियस्यतदीयकर्तुर्विधीयमानःकर्मवद्भावइहनप्राप्नोतेर राम
एवंस्त्रजस्यात्मानमात्मनेत्यत्रापि।तत्किंवारणिकारंभेप्याशंक्योदाहरणंतरमाह।अजेति।नयतेर्हिकिमकनपाअजारूपस्यकर्मणःक्रि २५८

स्त्विनविवक्षायामपिग्रामरूपेणकर्मणासकर्मकत्वाच्चानिर्देशाइतिभावः।स्यादेतत्।कर्मवत्कर्मणेतिसूत्रमेवमास्तु।नतरोगानितिकांप्रयो
गास्तुसर्वैपिनूकारान्तरेणव्यावर्त्यास्यते।नदोषः।एकस्यापिवस्तुनोवस्त्वाधिचोपाधिविशिष्टतांभ्यामौपाधिकंभेदमाश्रित्यसकर्तृत्वंकर्मत्वंचोपदे विदिछ्रता
शोकमेव।सिद्धान्तेपिकर्मणिरत्त्व।क्रियते।आत्मानमात्मनावेत्तिस्त्रजस्यात्मात्मानमात्मनेति एवंपच्यतेओदनइत्यत्रापिमुख्येकर्मण्येवप्रत्ययो
स्तु।शास्त्रवनिरूद्दनेपेक्षणात्।स्वयमित्यस्यात्मनेत्यर्थात्।एवंचस्थालीपचतीत्यत्राधिकरणइवकर्त्तनएवधातोरर्थःकर्मण्यपिलभ्यतइत्यपरमनुरू
ने लोकर्थंतर्हिपच्यतेओदनइतिभावेलकारइतिचेत्।माभूत्कर्मवत्कर्मण्येवास्तु।कर्मचात्मैव।नचैवंभेतव्यकुत्वलेनभिन्नमीपेद्देदमितिभावेकृत्वादयो
नस्युः।कर्मणिचेदात्मेतिविशेषानुरोधेनपुंस्त्वस्यादितिवाच्यं।सामान्येनपुंसकसंभवात्।स्वरूपमित्यस्यविशेष्यत्वसंभवाच्च।आत्मेतिविवक्षायांतु
पुल्लिंगतापाउक्तविवक्षायांस्तत्रपक्षेपिदुर्वारत्वाच्च।अतोयत्नेनकर्मवत्सूत्रमत्राचक्षाणेननडुहस्नुनमामितिप्रतिषेधआरम्भोनवा।आद्येदुहेर्कर्म
वास्यविषयःस्यात्।ततश्चदुग्धेनगौर्गोपालेनेत्यादिनसिध्येत्।दुग्धेगोपालेनेत्यादिवस्यात्।द्वितीयेतुनमतेदंडइत्यादिनस्यात्।कर्मणियकस्संभा
व्यकर्त्तरिनकोदुर्लभत्वात्।किंचचःकर्मकर्त्तरीतिविधिविकल्पोनिर्विषयएवस्यात्।कर्मवदित्यतिदेशस्यविषयीभूतःकर्ताहिकर्मकर्त्ता।नचासौ
नवास्ति। स्वदोस्याआत्मनाआत्मनायीत्यत्रापिविधिविकल्पापत्तेश्च।ननुनिरुक्तप्रेषणमाश्रित्यभूतपूर्वेकर्मणिसांप्रतिकेकर्त्तरिविधि

कल्पं ब्रूमः इति चेन्न। न हि भिन्नैव लकारादिष्वप्यथा यथार्थेशवादयः स्युः। यत्तु नस्यादिति कर्मवत्त्वे तत्र भवत्वप्रमारम्भ्यमेवेति दिक्। स्नजिधु। श्रवने नि
रा स्निग्धस्नादि भिस्सि भि निस्वथं यदि कि नु लसावधितुकान्तु दान्तलेहकने यत्कृतदानन्तं श्रूयेत। यत्तु भाचाश्रद्धावत्कर्तृकादजे यो निष्ठेण कर्तरि। नि के
विदित्वं। तत्र यणित्यतु ढौ। आत्मनेपदानुके च न्यूनते निदिक्। स्याकर्मेति। यत्तु भाचाहृ हृश्विग्रू पाथ्यः सनन्तानां च यक् णो नेत्यत्रं
नुत्तहल्दृइतिन्यूनं। कि रादीनां सर्वेषां ग्राह्यत्वात्। एतन्वादिष्यते आदने साधुदाहरन्यां मूले ध्वनितं। यदपि चिण्वदिट उपिनेतिके चिदिट्य
त्वं। तत्र केचिदि [illegible] संशोऽनुचिनः। उक्तं भाष्यवार्त्तिकास्वरसात्। भाष्यवार्त्तिके ति। चिण्वदिट्। यत्तु भाचान्तु इहति चिण्व
दिटोऽपि निषेधं मन्वाने नोक्तं न निषेध इति केचिदिति। तच्चाचिण्वदिति हि चिणीव कार्यमतिदिश्यमेन च चिण्वत्कृत्वा सो निर्देशो निषेधं हुं शक
ते। येन चिण्वदिटो निषेधः स्यात्। एवं च निषेधाभावस्यन्याय्यत्वे सर्वसंमतत्वे च केचिदित्युक्तेरनुचितता। यत्तु वदंति। चिण्निषेधस्य चिण
रेव हि नता भावात्तस्मिन्कर्तव्ये नास्य निर्देश इति। तदति रभसात्। अनिर्देशेन निषिध्यमद्रविवक्त्वे निषेधो [illegible]
नानिर्दिश्यत इत्यस्केरनुचितता। अतीकरोतीति। चिणि प्रतिषिद्धे दृणि ग्रीनि चङ्। यत्तु भाचा कर्मकर्तरि चङ्गेत्युक्ताकारविशेषदाहृतं। न चिणि राम
लताउपेक्ष्यं। यत्तु परिष्कुर्वंति चङ् विधौ कर्तरीति न कर्तव्यं। सामान्येन चङ् विधीयतां। तस्य भावकर्मणोः परत्वाच्चिण्बाधको भविष्यति। किं चाचि २५०

ए

स्येन पदद्वयतः चिणि निवर्त्तमाने पुनश्चिण्ग्रहणं बाधकबाधनार्थं। तथा च कर्तरि चिण्ग्रहणसामर्थ्याच्चिणैवात्र भाव्यं न तु चङेत्यादि। तद
त्यंतरभसात्। चिण्निषेधस्यैव प्रक्रांतत्वेन चिणैवात्र भाव्यमित्युक्तेर्व्याहतत्वात्। किं च कर्तरीति भाष्ये त्यसंगतमेव। कर्मणीत शाद्धमिति च
निप्रसक्तेः। न हि तत्रापि चिणस्तियश्च चङ्बाधनं। एवं च कर्तरि चिण्ग्रहणयोः सामर्थ्येऽपि वर्णितमपि कथमुक्तिसंभवे लभ्यतामित्यास्तां तावत्।
चिण्वदिटोऽपि निषेध इति। भाचोक्तमंस्वेउयन्निति। स्यादेवेति। यत्तु परिष्कुर्वंति। स्यमिचूस्तेचिण्वदित्यत्र नाममात्रेहनोर्दीर्घतानात्। चिण्निषेधोऽपि
चिणः कार्यमित्युक्तिदिश्यत इति। तन्न। तत्सम्बन्धं नादेव वामिति नैव वर्णितत्वात्। आत्मनेपदविधौ योऽकर्मकस्तमुदाहरति। विकुर्वते सैंधवा
इति। कृषि। तद्धेति स्ववृत्त्येत्यनुवर्तते। तदाह। नयमिति। किं सिति। तस्मिन्नेव विषये निभावः। अनुवृत्तेः फलमाह। यो विषये सिद्धिति। प्रसक्ति ग
पूर्वको हि निषेधः। यत्र तु प्रकोनप्रसक्तिस्तत्र न निषेधः। ना पि च्यतनूनापिस्तस्यान्नियोगारिष्टं परस्मैपदमित्यर्थः। तेन लिङ्डास्त्री। लिडोस्वादी
य नां च विषयेनेदं स्वबंधप्रवर्तनमित्यफलितं। यकोनुमिविशेषः। कुष्यंतीत्यर्थ। नियंतुमूस्वरेश्विशेषोऽप्युक्त एव। अत्रेदमवधेयं। कर्मकर्तरि ह अर
निकारादित्रिः प्राथेण स्वयमेवेति प्रयुज्यमानेन तद्विवक्षितं। आत्मनाकरणेनेति वा व्याख्येयं न तु कर्त्रेति। तथा सति कर्मण्येव लकारः स्यात्। तस्य
त्वं वेदं केय टादी॥ ॥इति कर्मकर्तृप्रक्रिया॥ ॥अभिज्ञा। अभिज्ञा स्मृतिः साकांक्षवाचिनेवोध्यते अन्येनेति विग्रहः। तदाह। स्मरतिबोधिनीति। स्मर

सीत्यत्र वाक्यार्थः कमपि पश्य मृगो धावतीतिवत्। हन्तेति क्रियायां विशेषणं। गोकुलाधिकरणकाऽस्मत्कर्तृकभूतानद्यतनवासक
र्मकं हलसंबोध्यकं स्मरणमिति फलितोऽर्थः। वासो लक्ष्यमिति। प्रसिद्धत्वात्। वारणं लक्ष्यमिति। सहसा बुध्यमाने हलस्य चिन्ताख्यमि
त्यर्थः। भूतेनापह्नव इति। अपह्नवोपलापः। नाहमित्यादि कलिङ्गे नाम जुगुप्सितो देशस्तत्र प्रविष्टत्वे त्याचिरं स्थितमिति कश्चिदुक्तः भ९
हना सेत्याह कलिङ्गान् जगामेति न केवलमवस्थानमेव निषिध्यते किं तर्हि तद्धेतुभूतं गमनमपीति भवत्यपह्नवः। यदा तु गमनमेवाभियुक्त पी४
स्तदेवापलपति। ननु दाक्षिणात्येनापह्नव इति लङेव भवति। प्रष्टव्यः प्रश्न इति। कर्मणि नङ्। आसन्ने ति। पंचवर्षाभ्यन्तरमासन्नकालं। पंच
वर्षाणि तु विप्रकृष्टकालमिति वर्णयंति। ननेति। पृष्टस्य प्रतिवचनमिति विग्रहः। यावत्पुरानिपातयोर्लट्। लक्षणप्रतिपदोक्तपरिभा
७८ षया अनित्यत्वज्ञापनार्थं निपातग्रहणं। सुवर्वेन महाव्याहतिग्रहणमप्येवमेव। तत्रान्यतरस्यां ग्रहणं कुर्वन्तं विभाषा। ननु कर्हिदाद्य
मनद्यतनविषयः। अनद्यतने र्हिलन्यतरस्यामिति किमो र्हिल्विधानात्। ननु भविष्यति घोगे लुडेव भाव्यं न तु लृट्। तत्कथमुदाहृयते क
र्हि भोक्ष्यत इति। अत्राहुः। भविष्यत्सामान्ये भोक्ष्यत इति लृट्। स तु कर्हिशब्देन संबध्यत इति। भोक्तेति। ननु भविष्यत्सामान्ये लड्विहितः सो राम
द्यतनेन लुटा बाध्येत तत्कथं विकल्पोदाहृतिः। अनद्यतने लुडित्यत्रार्थे योगोऽनुवर्त्तते। तेन लृड्विषयेऽपि पक्षे लट्। एवमुत्तरमेऽपि योगत्र २६०

यं न त्वनुवर्त्तते। तेन तत्र हि विषयेऽपि लुट्पाक्षिक एव न तु बाधकः। लिप्स्या सर्वेण सिद्धे समिति किं अरन्नार्थमि दमिति ध्वनयन्नुदाहरति
यो न्नमिति। वर्त्तमाना ये नोपाधिनेति। तथा हि। कुर्वन्त्यजोः स्थानेऽनुविहितः संज्ञाभ्यामेव न तु धातवेन स्यात्। तु ङीलादिविशिष्टकर्त्तरि अ
लं कृत्वा कुर्वत इत्युक्तः। सोपि तस्मिन्नुपाधौ सत्येवेत्यादि। कदा आगतोऽसीति। भूतकाले तु प्रश्नवाक्यमुदाहरणे भूतकालाभिव्यक्तये। एवं क
दागमिष्यसीत्यत्रापि भूतं। उदाहरणयोरयमेव इति पदाभ्यामागमनादेर्विनाभूतं यद्रूपं प्रस्वेदपरिकरबंधादि युक्तं तत्संनिहितविषये इदानी
मागमनमिति ध्वन्यते। तेन कदेति प्रश्नं प्रत्यार्थिकमुत्तरं संगच्छते। सामीप्यं च द्योतितं भवति। आरोपेणैव पत्नीमाश्रित्य प्रसाद्यान
माहरेति प्रवचनग्रहणं स्वरूपग्रहणस्य मा भूदित्येवमर्थं तदाह। लिप्सपर्याय इति। पंचदशारात्र इति। भाष्यप्रयोगात्। स्त्रीत्वाप्
४४ वैरात्रं क्लीबमिति तत्क्लीबत्वं तावन्नैव। अस्योदाहरणं निभूमात्पचारिस्यतः प्रश्नमिवोध्यानि। न नः प्रवीनेहत्तरस्तत्रेण विकल्पोक्तेः। किं किला अ
भिभवति। त्वत्कर्तृकं क्षुद्रीगमनमस्तीत्यादिरर्थः। जातु। अनवक्लृप्त्यमर्षयोरिति लिङ्लृटोः सिद्धौ वचनमिदं लेटो बाधनार्थं तदाह ल
टापवाद इति। संभावनेऽलं। संभावनमिति प्रथमया ससम्पन्नं विपरिणम्यते अलमिति च सप्तम्यन्तसंबंधः। एतच्चगौरवं सिद्धस्य गतिश्चिंतनी
येति न्यायेनाश्रीयते। अलमिति संभावने सिद्धाप्रयोगश्चेदिति सूत्रयितुमुचितं। अलमिति चेत्किं। पापेन गमिष्यति। हन्तेनिपलाय इति। हन

नहेतुःपलायनंहेतुमत्।लक्षणहे त्वोरितिशत्रादेशात्कृतंभवति।देवदत्तोगतोयाहइतियोगेचसहिधिरितिव्यवस्थितविभाषासु
प्रागतत्त्वज्ञानेनानुकामप्रवेदनइत्यपंसंख्यायेन।एवंचकामप्रवेदनेकच्चिन्नीतिसत्त्वंमास्त।अनेनैवसिद्धेरितिचेतन्न।मैवं।यच्चार्थप्रकरण
दिनापिकामप्रवेदनंगम्यते।तदर्थंतदारंभात्।नहितेनैवसिद्धत्वात्सूत्रमनर्थकमस्त्वितिचेतन्न।तेनलिङ्सिद्धेपिलोडर्थस्यारंभात्।लोटाचलि म
ङोबाधामाभूत्इतिलिङस्तुक्तेः।नहिलोड्यावेवोच्यतेमितिचेन्न।लिङोनुकर्षेनसंबद्धस्यविभाषाग्रहणस्याप्यनुकर्षप्रसंगादितिदिक्।लि
ङ्चासमानकर्तृकेषुतुमुन्निति।नःस्वयथेच्छार्थेषुलिङ्लोटावितिप्राप्ते लोटंबाधितुमेवंलिङ्मपिबाधते।नचचासरूपविधिः।कृत्यल्युट्तु
न्तेखलर्थेषुतदभावात्इतिलिङ्विधीयते।धातुसंबंधे।इहधातोःसंबंधोनुपपन्नः।स्वार्थस्मारणेनोपक्षीणत्वात्।पदार्थसंसर्गःकारक
वा विशिष्टक्रियायांवाक्यार्थइत्यभ्युपगमात्।शाब्दबोधेशाब्दोपिभासतेइत्यभ्युपगमेपिशब्दस्यस्वार्थप्रत्येवकारकत्वेनतद्वाद्दोनरंप्रति।अथो म४
क च्येत।यथासन्निधौक्रमत्वंसमानकर्तृत्वंचधातोरर्थद्वारकंविशेषणमाश्रितं।यथाचक्रव्युत्पत्तौसुबंतस्यक्रमत्वंतथेहापिधातोरर्थद्वारकःसं
बंधइति।तदपिन।तथाहिसतिपरस्परसंबद्धार्थबोधकानेकधातुप्रयोगेप्रत्ययाइतिफलितंस्यात्।ततश्चगोमानासीतभवितात्वेतितसिध्ये राम ३
स्य त्।नह्यत्रवर्त्तमानकालेस्तिःप्रयुज्यते।नचाप्रयुज्यमानस्यसंबंधोस्ति।तस्माद्धातुशब्देनतदर्थोलक्ष्यतइत्यभिप्रेत्याह।धात्वर्थानामिति।विषयव २६०

कृत्वापेक्षंबहुवचनं।एकैकविषयापेक्षायांतुधात्वर्थयोरितिबोध्यं।स्यादेतत्।अत्रहिद्विधिवाक्यैरेवस्वविषयेप्रत्ययाःसिद्धाःतत्किमने
न।यदितुयत्राप्राप्तास्तत्राप्येतत्सूत्रेणप्राप्येरन्।नहितत्रोपपदोपाधिग्रहणमितिप्रत्ययार्थानांसंकरेसतिस्वस्वोपलक्षणस्यादित्याशंक्याह।य
त्रकालेति।अयंभावः।कालमात्रमनेनबाध्यतेनत्वन्यदपि।अल्पबाधेनोपपत्तौबहुबाधस्यान्याय्यत्वात्।अन्यदेवनहिकिंचिदेकंबा
ध्यतामितिचेन्नकिंतदितिविनिगमकाभावात्।कालांशेपिकिंविनिगमकमितिचेन्न।प्रायदर्शनमितिगृहाण।वर्त्तमानसामीप्यइत्यारभ्यहि
कालान्यत्वप्रतिपादनमेवप्रायेणदृश्यतइतिभावः।स्यादेतत्।वनानिपश्यन्ययौ।निवेदयिष्यतोमनोनविव्यथेइत्यादिमहाकविप्रयो
गेषुदर्शनेनिवेदनाहीनामतीतानामपिलट्लृडादिभिःसंबंधोदृश्यतेसचकालबाधेपिसमर्थनीयइत्यनेनतदर्थमिदंसूत्रंतत्रयथो।विव
क्षइतिलिङ्क्ष्यस्यैवबाधःकिंन्नस्यात्तत्राह।तिङंतवाच्यमिति।प्रधानानुरोधेनगुणस्यनयनेनतुविपरीतमितिभावः।येतुप्रथमान्तविशेष्यकं
चोधंसेकामाख्यातस्वाच्यक्रियाप्राधान्यमाख्यातमितिभाष्यवार्तिकनिरुक्तास्मिन्पक्षेविचारस्तुपक्षेतेषामयमपिदोषःप्रसज्येत।उक्ता
र्थानामप्रयोगइतिकारकप्रकरणे।स्यादेतत्।व्यवहारस्यविषयेध्याहरतेलक्षितेपिवा।भूतभाविप्रत्ययनाधासिंबध्यंतां।यथायथा।तथाहि।अग्निष्टो
मयाजीतिभूतएवणिनिःजनितेत्यनंतसमभिव्याहारेतुउक्तवत्व्यवहरिष्यमाणइत्यध्याहारोक्तलक्षणावा।एवंगोमानासीदित्यत्रापिद्र

शाब्यवहारविषयत्वा आसीदित्यर्थः। अवश्यं चैतदभ्युपगंतव्यं। अन्यथा हि विभोक्तस्य मसीदित्यत्र स्वरीत्या भाविन्या हस्य भूतकाला
लत्वे भाव्यासीदिष्यत्वयोः ध्वयितायुगपत्प्रयोगो न स्यात्। तस्मै घटे वर्तमानं त्वं न कालं भाविन्या व्यवहरंतं तदिदानीमासीदिति तत्त्वार्थः। एवं
सर्वत्रासंजस्यैत्किंत्वनेनेति चेत्। मैवं। अध्याहारलक्षणप्रयुक्तकेंद्रां विनैव शायनो निर्वाहार्थं स्वनावेंभात्। न हि स्वं विदध्याहारादिकमंग
पि सापन्नी निसर्वत्वनत्वात्कत्तुमुचितमिति दिक्। क्रियासमभिहारे। अत्र यदि लोट इति षष्ठ्यंतेन तदादेशा लिङो लस्येरन्। वा च तध्वमोः
नित्यावाक्यशेषात्। तत्र हि मिति इः विशेषः स्यादिति तेनोपादीयते। तत्त्व पूर्वत्रि लोट् शब्दस्य नित्युपरत्वे सत्येव संगच्छते। अन्यथा सामान्यविहितानां
नित्यं हिस्वाभ्यां बाधे सति नित्यं ध्वमोरिति वाक्यशेषो निर्विषयः स्यात्। तथा सति नित्यं तत्वादवं लभ्यत इति गुणोप्यस्ति। तथा बहवोत्र दोषाः।
तथा हि। निपूर्वत्वि पूर्वमिपां स्थाने विहितस्य हेः स्यादित्वज्ञावेन पित्वात् ङित्त्वाभावात् लुनीहीति त्वं न स्यात्। ब्रूहीति ब्रुव ईट् स्यात्। तस्त्वीति तप
इ ह स्यात्। किं च। सर्वेषां नित्यं हावपि हिस्तोपर्यायेण स्यातां तन्नु पद्यवस्थायां। अपि च लोट् शब्दस्य नित्यं लक्षणाप्यन्याय्या। अतः संज्ञा न विरोधि
न्या उपक्रमस्य प्राकृत्वाद्वा यान्वये सस्य विषयसमन्यासुपपादनाच्च। तस्मात्लकारस्यैवादेशो हिस्वौ न तु लिङ इति सिद्धांतः। तदाह। तस्य च राम
स्याहिना। न त्वेवं हृदयोरपिलः परस्मैपदमिति परस्मैपदसंज्ञा स्यात्। ततश्च परस्मैपदिभ्य एव कर्त्तर्येव च हावपि स्यातामिति तदाह। नोचेति। अयं २६२

भावः। लोटो हिस्वाविति सूत्रे पूर्ववाक्यात् लोडित्यनुवर्त्तनेन च हिस्वाविति यस्य विशेषणं। न च हिस्वौ लौटौ भवत इति सामर्थ्यात्तिङ्मात्रविस
र्थः संपद्यते। तत्रापि मुख्य लोट् संबंधिनो धर्मस्यातिदेशो व्यर्थः। स्थानिवत्त्वेनैव लाभात्। अतः स्थानिवद्भावेन लब्ध लोट्व्यपदेशौ तिङः
स्तौ। ये हिस्वौ तयोरेव धर्म इहातिदिश्यत इति सिद्धमिष्टं। हिस्वविधाने मा। यदि पुरुषवचने न संज्ञे अपि स्यातां तर्हि पुरुषसामानाधिक
रण्येऽक्तत्वे च सत्येव हिस्वान्यां भाव्यं। तत्र व्यर्थो विधिरिति भावः। समुच्चयेऽन्यतरस्यां। माशुक्त मिति। लोट्त्वस्य च प्रसिद्धहिस्वदर्शो हिस्वौ न
ध्वमोर्विषये वेत्यर्थः। यथाविध्यनु। इह सर्वस्मिन्नितिस्य द्वार्थ। समुच्चये विशेषस्य वक्ष्यमाणत्वात्। यद्यपि संख्याकारकपुरुषकालविशे
षाणां हिस्वांतादप्रतीतेस्तदभिव्यक्तिसिद्धे मस्य न्यायतरेव अनुप्रयोगो लभ्यते। तथापि यथाविध्यर्थं वचनं। तेन याहि याहीति यातीति सेवानु
प्रयुज्यते न तु गच्छतीति क्रोति। तिवाहे वाच्य इति। यास्मिन्निति दिशक्तप्रक्रियायां व्याख्यातं। यत्तु वदंति। अस्य वक्तव्यस्य भाष्ये अदर्शनतादिति
न दृश्यतां। इति शाबिव इति। न च तेनैव व्यवधानाद्यातीत्यस्यानुप्रयोगतं कथमिति वाच्यं। अनुशासनस्येहात्तुषादित्वमात्रपरत्वात्। व्यवहितविष
यीतं प्रयोगयोरिष्टापत्तेः। एतच्चैकैयटहरदत्तयोर्थयोः स्फुटं। एतच्च भाष्यकारीयोदाहरणसम्यव्याख्यानाभ्यां निर्णीयते। भ्रममूलकमेवेति। ए
तेन सत्त्व विवेत्यपदाहत्य यदुक्तं प्राचाला लोडभावपक्षे लड्डादिः। पुनःपुनः पिबति पुनःपुनः खादती त्यभ्यवहरतीत्यादीति। तदपि भ्रममूलकमे

सि वैं ध्वनितं । तथा हि । पुनः पुनरित्यधिकावापः । इत्वं त्रापि नहि द्विवक्षायां हित्वाद्यापत्तेः । किं च लोडभावपक्षे प्रकाम्याः । अन्यथ वै रहेत । स्वनुप्रयोगस्य
हि स्वांतत्वे विहितत्वेन स्योपन्यसनं कथं संगच्छतां कथं वोपयुज्यतां । कालकारकसंख्यानां लडैवाभिव्यक्त्यादिति दिक् । अम एवेति । पुरुषांशेव
च्छिन्नांशे चेति भावः । एवं च पुरीमवस्कंदे त्यादौ तिङंतत्वं यथा यथं परस्मैपदात्मनेपदांतत्वं च सिद्धांते सिद्धं । पुरुषवचनसंज्ञे तु तस्त एवेति
द सर्वं सिद्धिः ॥ ॥इति लकारार्थप्रक्रिया ॥ ॥छ॥ ॥इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यां व्याख्यायां प्रौढमनोरमायां ति
ङंतं समाप्तं ॥ ॥छ॥ ॥श्रीभवानीशंकारार्पणमस्तु ॥ ॥छ॥ ॥श्रीरस्तु ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

२६३